पूर्वसाधनलक्षणासमयेप्रणाडिकाविशेषणाद्रवद्रव्यकयागापूर्वसाधनलक्षणायैवाभिप्रेतव्यवस्था

त्वामसंभवादिजिचेतनलक्षणायापिद्रवादावदृष्टप्रदर्शिकस्यनित्यं कर्मकारकान्यपसापेक्षस्यावयतेरनुरो

धेनयोग्यपदाध्याहारस्यापूर्वसाधनलक्षणातःप्रागवश्यंभावात्। नयाजायमानोहितात्पर्यबोधोयथा

श्रुतवाक्यार्थबोधात्प्राक्नोदेति। यागेनस्वर्गंभावयेदितिस्वर्गकामोपेतवाक्येश्रुतात्पर्यार्थवर्णायद्विरेपिहिमाद्दृष्टोवि

श्वजिद्विधेनस्वर्गमित्यध्याह्रीयते। यजतेरकर्मकत्वेनस्वर्गकामपदेनैवयथाश्रुतवाक्यार्थबोधनिर्वाहात्।

वीश्रोक्कृतीसाद्दोतुनेवयथाश्रुतबोधायकस्यचिदपेक्षा। तात्पर्यार्थबोधायापेक्ष्यमाणात्वपूर्वदिपविशेषोपस्थि

तिःसामान्यवाचिनाहिपदेनलक्षणयाप्युलभेतिसेवाश्रीयते। स्याद्वाविनैवलक्षणाध्याहाराभ्यामपूर्वदियवी

भा.दी.
४५
45

हीणामुद्देश्यत्वात्। श्रुतव्रीहित्वाकारेणैव तु न तस्मान्नापूर्वीयत्वाकारेण ततः किमिति चेत्। वस्तुतोपूर्वीया
नैवजनेनाकारेणानुपस्थितानामीनाहवनीयत्वादिरूपेणोद्देश्यविहिताधानस्याक्रत्वर्थवत्प्रोक्षणादेः क्रत्व
र्थत्वेनानर्थक्यापत्तिरिति स्पष्टमाकरे एव। न च येन च लक्षितापूर्वसाधनत्वस्य स्तुवादिसाम्येन हन्तिविधेर्दृष्टा
र्थत्ववैरूप्यापत्तिः। उपांशुयजुषेत्यस्य निगदेष्वदृष्टवत्पत्नीसंयाजान्तताविधेरूपाहृत्य वशामान्यत्र रुन्नस्यापि हन्ति
विधेः प्रयोजनवशेनैव स्तुवादिभ्यो निवृत्तिसंभवात्। किंच हन्तिविधौ यद्यपि व्रीहिपदं न श्रूयते तथापि दृष्टप्रयो
जनानुरोधेनौषधमात्रविषयत्वं गतो भवेत्तत्प्रकृतप्रधानहविष्ट्वाविशेषेपि सान्नाय्यादिविषयत्वस्य स्कंदनी
येतेषामर्थेन संबंधस्याधिकरणे यथाहुः कैश्चिद्दृष्टनिराकांक्षः स्वीणार्थापत्तिशांकिकः। नादृष्टार्थो विशेषोन्यत्र
शास्त्रः कल्पयितुं विधिरिति। तत्र यथाकरणैर्व्रीहिपदस्याभावेपि स्रुवादिषु हन्तिरापाद्यत इत्याशंक्य यद्यपि तदापा
दनं तेष्वनिवार्यं स्यात्तथापि पत्नीसंनह्यस्यैकवचनवत्सर्वत्र हन्तेर्दृष्टार्थत्वमेव स्यादिति कथं वैरूप्यापत्तिः। न चैव

रा.म.
४५

वमपि प्रोक्षणं जेप्रुस्यादिति चेत् । न लक्ष्यसाधनतायाः प्रणाडिकाविशेषणे ऽवैशिष्ट्यात् । अविशिष्टोद्देशो वाक्य
भेद इति चेत् । भ्रान्तोऽसि । न हि वयं प्रोक्षणादिवाक्ये प्रणाडिकामुद्दिश्य विशेषणतया निवेशयामः । किन्तु व्रीहि
पदेन व्रीहित्वेनार्थसमवायितया लक्ष्यो यः साधनताविशेषस्तस्यैवोपायतया निर्दिशामः । यो हि व्रीहि
शास्त्रस्य तात्पर्यावगतः साधनताविशेषो निष्कृष्टशक्त्यात्मकः प्रोक्षणवाक्यस्थव्रीहिपदेन लक्ष्यते । सोऽस्त्वे
नैवात्मना स्तुषादिभ्यो व्यावृत्तः । व्यापारभेदेन तु परिचीयते दृश्यते च । अनेकव्यापारैः कार्यं कुर्वतां काष्ठस्थाल्यादी
नां भिन्नसामर्थ्यव्यवहारः । काष्ठस्थाल्योरन्यतरेणापाकसिद्धिर्न्तं सापेक्षमन्यत्र वदन्ति । तं प्रत्येवं भिन्नसामर्थ्यव
तयोरुभयमप्यावश्यकमिति । यत्तु भिन्नजातीयमपि स्थालीद्वयमेकक्रियायामावश्यकं मन्येत तं प्रति तुल्यमनयोः सा
मर्थ्यमकृपेवालमित्येवं वदन्ति । अत एव व्यापारैक्ये न व्रीहिपदलक्षितनिष्कृष्टशक्त्यात्मनः साधनत्वस्य यवसाधारण्यात्तो

भा॰ टी॰
५६
56

स्मरणादीनां तत्साधारण्यसिद्धिः। अन्यथाऽयथावत्सकलमीमांसकानां प्रमाणादिकाविशेषविवक्षणेनस्तुवादि
परिहारं वदता श्रुतव्रीहित्वस्य वाक्यभेदस्वशेना विवक्षितत्वमापादयद्यथा साधारण्योक्तिर्मनोरथाविष्टप्रलपितरू
पैवापद्येत। अथ पूर्वस्मरणहेतुत्वादिरूपसाधनत्वमेव तृतीयार्थः। शक्तिरुक्त तदवच्छेदिके सैव मतमाश्रीय
तेन तथाविनादृशसाधनत्वशरीरे संबंधत्वेन प्रमाणादिकाप्रवेशस्यावश्यकत्वात्संभवति प्रमाणादिकायास्तुवा
दिव्याहन्ननत्पद्विचापकत्वां प्रमाणादिकालकसंबंधविशेषेण पूर्वस्मरणहेतुत्वरूपसाधनंतायाश्चयवसाधार
णपादुर्भवति धर्माणां तत्साधारण्यं न च व्रीहित्वाद्यवच्छेदकभेदेन साधनताभेदः एकजातीयापूर्वे व्यभिचारवा
रणाय साधारणशक्तेरेव तदवच्छेदकत्वकल्पनात्। तण्डुलनिष्पत्त्यनुवर्वैजात्याभ्युपगमेऽपि सर्वथाऽनुभवानारू
ढस्य पूर्वजातस्य स्मरणोरथयत्र लेनतत्कल्पनया व्यभिचारपरिहारायोगात्। अत्र एव यतः श्रयणस्य मेज्ञावरूणा गा॰
५६

न्यग्रहेपि च व्रीहिधर्माणां यवेषु न संभव इत्यपि परास्तं अस्मात्सापूर्वाणामिव व्रीहियवापूर्वजातेर्मानाभावात्।
तस्मात्प्रकरणादिकाविवक्षायां वा को भेदः यत्तु समासमपूर्वसाधनलक्षणायां यवन्यायेन फलं च मसे धर्मापादनं तद
नभ्युपगच्छतां प्रतिप्रतिनिधौ तदभावापादनं च तदप्यलीकं। व्रीहियवशास्त्रयोः कृत्स्नफलवत्सोमफलसमसथा
त्रयोः कृत्स्नप्रवृत्तित्वाभावाद्व्रीह्याद्यवगतसाधनत्वसोमसंबंधज्ञापनेन निवृत्तानां विधीनां विलंबावगतसाधनत्वफ
लं च मसंबंधेः सामर्थ्यात्प्राप्तेष्वणादिशास्त्रं हि नित्यवत्स्थितत्वे न व्रीहिशास्त्रतुल्यकालप्रवृत्तितया प्रतीयमानम
पि व्रीह्यनुवादेन प्रोक्षणादिविधानं कुर्वत्सत्कार्यं हि व्रीहिशास्त्रमिमं तरेण तदयोगात्तत्संस्ये व्रीहिशास्त्रं तावत्सतीष्वेव प्र
वर्तिते तस्मिंश्च प्रतीक्ष्यमाणेनां तदीयकृतपाय वशास्त्रमपि प्रतीक्षितमेवं भवति व्रीहियवशास्त्रप्रवृत्तोः पौर्वापर्यं सर्व
थैव हेतोरदर्शनात् प्राप्तौ [redacted] क्षिते च तस्मिंस्तु भयमपि व्रीहियवशास्त्र
हृदयेभेदः यावप्रकरणादिकं वेकापूर्वसाधनतया प्रागपदुपस्थितं भवति। ततो व्रीहिपदेन लक्षणया तादृशसाधनरूपमुद्दिश्य

मा॰ द्वा॰
४८

विधीयमाने प्रोक्षणादियवसाधारण्यं भज्यत इति नाश्चर्यं पूर्वावगतेन साधनतारूपेणोद्देश्यतावच्छेदककोटीकृतानां
प्रोक्षणादिभावनानां प्रसक्तेरुद्देश्यत्वप्रतीतेरवर्जनीयत्वात्। एवं यदि सोमफलचमसशास्त्रे गुणयत्नवर्त्ते नातत्सोमशास्त्रं
प्रतीक्षमाणो विषयादिशास्त्रैः फलचमसशास्त्रमपि प्रतीक्ष्यतस्यापि धर्मसंबंधः कीयेतां न चैवमस्ति। धर्मविधीनां स्वगत
सोमानुवादायैव फलचमसविधेः स्वकार्यस्येमापवादाय सोमशास्त्रप्रतीक्षित्वेन धर्मविधीनां फलचमसविधेरुद्गुणस्यपर
त्रित्वात्। किंच यथा पर्णताविधिः सोद्देश्य उक्तः प्रकृताविव विकृतावपि प्राप्तिसत्वेपि न विकृत्संगत्वेन पर्णताविधानेऽपि वि
कृतौ न तस्या अतिदेशेन संभवत्प्राप्तिकत्वात् तथाभिषवादिविधिः सोद्देश्यतावच्छेदकीभूतापूर्वसाधनतायाः सोमफ
लचमसयोः स्वप्राप्तिकत्वेन फलचमसांगत्वेन धर्मान्विधत्ते कार्यापत्त्यैव तस्यैव धर्माणां तत्र प्राप्तिसंभवात्। न चैवय
वेष्टापि तत्प्राप्तिसंभवस्तुल्य इति शंक्यं सधर्मकत्वेन क्लृप्त सोमकार्योद्देशेन फलचमसस्यैव क्लृप्तत्वाद्धि कार्योद्देशेन य ए॰म॰ ४८
वाविधानात्। फलचमसो हि नाहृतस्य यागसाधनत्वेन प्राप्तः तमस्मै भक्षं प्रयच्छेदिति भक्ष्यत्वेनैव श्रवणात् प्रदेयत्वात्।

पूर्वीयद्रव्यरूपसोमसंस्कारकस्य भक्षणस्यान्वयसत्त्वाद्दृग्रूपस्यैव फलं चमसे संभवतीति भक्षणान्वयाद्यागसाधन
त्वविशिष्टद्विर्वाच्या सोमस्य यागसाधनत्वे धर्मसंबंधे चाङ्गत्वे भक्षणान्वयस्यैव यागसाधनत्वसाधकत्वं संभवतीत्यवश्यं
तदुभयसिध्यर्थमेव फलचमसः सोमकार्ये विधेयः। धर्माणां कार्यप्रयुक्तत्वाच्च सधर्मककार्यान्वयेनैव तथा सति
सकलसोमधर्मलाभोपपत्तेर्नाभिषवादिविधिः फलचमसे विध्याक्षिप्यते नचैवं पत्वविधेः प्राग्व्रीहीणां सधर्मकका
र्यसंबंधलक्षणः कश्चिद्विशेषोऽस्तीति यवैर्यजेतेति यष्टव्ययजिसंबंधश्रवणान्तत्र यदि च तत्तुल्यकारिता वीह्यभावे व्रीहिसंनिकृ
ष्टत्वमात्रेण व्रीहिशास्त्रेण विषयीकृता न पुनर्नीवाराः प्रधानविधिस्पर्शाभावे तत्तदोक्तः फलचमसस्यापि येन कार्यापत्या
लब्धहिंसादिनियमनयानीवाराणां निराकांक्षत्वान्नैव हिंसादिविधेर्नीवारेषु साधारणत्वं भवद्युक्तं स्यात् तात्त्वं स व्रीहिका
र्ये हि प्रधानविधिबलात् साधनत्वं प्रतिपद्यमानानां नीवाराणां तत्कार्यान्वयमहिम्ना धर्मान्तरमेतुं रेवेति किमिस्यवधातादि
विधौ व्रीहिपदस्य व्रीहित्वावच्छेदकत्वमात्रमुपग्रहस्य संबंधेनाप्रवृत्तिं नीवारादिसाधारण्येन लक्षणाश्रयणात् प्रोक्षणादिविधौ तु न

भाट्टा॰ ५८ तद्बीजोहंसादिनियमवत्सोमस्तोनीवाराद्यपेक्षितत्वस्यवक्तुमशक्यत्वात्तत्र च हंसादिविधिशेषप्रपाठ एव तद्बीजाद्या
यपाठस्य संदिग्धनिर्णायकत्वेन निर्णीतत्वे पदार्थोपादानाशक्तेः। यत्तु प्रसिद्धसंबंधेन यववत्फलचमसलक्षणाया अ
संभवेन तयोर्धर्माभावाभिधानं तदप्यसत्। सुरद्रव्यप्रतिनिधित्वलाभेऽप्यतीव्रत्वसादृश्यत्वेन प्रतिनिधित्वं व्यागृह्यमाणा
योऽपि यववत्फलचमसयोर्धर्माभावापत्तेः। अथ तद्वद्रवाणामपि लक्षणाये व्रीहित्वसोमत्वपरिच्छेद्यत्वयोग्यतारू
पः प्रसिद्धसंबंधोऽस्त्येवेति वाच्यं तदा नैमित्तिकयोरपि तयोः संबंधः केन वार्यते कथं च प्रधानविधिनानीवारश्रु
तिः। न हि व्रीहिपात्रस्थव्रीहिमात्रप्रापकत्वेन तत्संनिकृष्टद्रव्यग्रहणेन काचित्स्वार्थसिद्धिर्भवति यस्य प्रधान
विधिर्नीवारणे वाक्षिपेत्। एकादशे त्वपरिष्टात्सोमानामाजापस्यैश्वर्यं तीव्रत्वप्राकृतकालप्रत्यासत्तिलाभाय यद्यत्र
वर्णात्सोमानामुपरिष्टात्साजापस्य प्रचारो विधीयत इति पूर्वपक्षं प्रदर्श्य नत्राकृतकालप्रत्यासत्तिमात्रेणाचोदकानुग्र रा॰म॰
होऽभवतीत्येवं स्यादतः सर्वसोमानामुपरिष्टात्स विधेय इति सिद्धांतितं। यथा च विहितकालसंनिकर्षेणान विहितका ५८

लाङ्गुग्रहः। तथा विहितद्रव्यसंनिकर्षेणापि न विहितद्रव्यानुग्रहः। कथं भवतापि व्रीहिशास्त्रान्नीवारप्राप्तिः
कथ्यते कथं वा सत्यामपि तत्साम्ये मुख्यत्वेन प्रतिनिधित्वेन च गत्यमाणयवादिधर्मलाभालाभव्यवस्था उच्यते अ
श्रुतितावन्मन्त्राणामिव विधीनामपि प्रकरणपाठक्रमत्वर्थत्वं। अर्थवादाधिकरणे वार्त्तिककृता तदुपपादनात्
। अन्यथोपकारप्रदार्थदृष्टभावेन शास्त्रातिदेशोक्तेरानर्थक्यापाउच्छेदापत्तेः। तत्र च सामर्थ्यान्मन्त्राणां प्रयोगसम
वेतस्मरणमिव विधीनां प्रधानविध्यपेक्षितज्ञातांगसमर्पणमेव द्वारत्वेनाध्यवसीयते समर्पणं च क्वचित्प्राप्तिः
क्वचिन्नियम इत्यपि तत एव हेतोर्लभ्यते। एवं चानेन मन्त्रेणो तदर्थप्रकाशनद्वारेणाक्रतावुपकर्तव्यमिति शास्त्रार्थ
वत् व्रीहिभिर्यजेतेति विधिना प्रकृतिद्रव्यनियमेन क्रतोरुपकर्तव्यमित्यपि शास्त्रार्थोऽध्ययनविधिमूलक एव
सर्वैरभ्युपेयः। नियमश्चाग्नेययागतावच्छिन्ने हविः प्रकृतित्वेन व्रीहय एवोपादेया इत्येवंरूपस्तदेवानेन विधिना
सिध्यति यद्यत्र स्वव्रीहित्वाकृत्या लोकदृष्टव्यक्तिलक्षणावेलायां स्वपरिच्छेद्यत्वयोग्यतासंबंधेन तद्वपवाञ्छपिल

स्यांतेसंतिहितेपिप्रयोगायेषुव्रीहितंडुलाएवतास्मिंटमेववालभ्यंतेनतुव्रीहयः।नचतत्प्रयोगस्थानामाप्येय
यागव्यक्तीनांयवप्रयोगस्थानामिवपरिहारितोपनियमः।स्यात्किंचिदेतदद्भुतशास्त्रमस्ति।अतस्तासुव्रीहिनि
यमसंभवाद्यवयवनियमसंभवान्नियमेनतास्वपिव्रीहिविधेरुपकारकत्वायव्रीहिपदंलक्षणयावयवपरं
कल्पयितुमुचितं।प्रकरणावगतशेषिभावानांतासामनुरोधेननियमात्मककार्यानुरोधेनालूनलक्षणाक
ल्पनेसमर्थस्यगुणोत्पत्त्यापूर्वकल्पनेतिन्यायस्यहिलूनलक्षणायांविषयाधिक्यकल्पकत्वेनाश्चर्यं।आग्नेया
दिप्रधानविधिरपिपुरोडाशप्रकृतित्वेनावयवानेवसाक्षादपेक्षतेजातिसिध्येपरंजातिंव्यक्तीस्वापेक्षेतानचसाक्षा
त्तदपेक्षितसमर्पणोसंभवस्तथाभावउचितः।अतोव्रीहित्वावच्छेदयोग्यावयवनियमपरंव्रीहिशास्त्रंनचतन्मा
त्रपरमपिव्रीहितंडुलतासिष्टानांमेवयत्रलाभसंभवस्तत्रप्रयोगेऽनन्यलभ्यव्रीहिनियमेनैवव्रीहिविधेःकृतो
पकारित्वस्यवक्तुमुचितत्वात्।अतस्तावतन्मात्रनियमपरं।उभयथापिनियम्यावयवेषुनियम्यतावच्छेदकत्वेन

व्रीहित्वादन्यत्किंचिद्रूपमवश्यमभ्युपेयं। न हि निरूढलक्षणयोपादीयमानव्यक्तेर्विशेषाकृतिकलक्षणयाप्र
तीयमानावयवानांशकलस्यैवावच्छेदकत्वमिति शक्यं वक्तुं। केनापि रूपेण तु यथारूढस्यैव सांकेतिकलक्षणासंभ
वात्। युगपच्छक्यलक्ष्ययोर्जातिव्यक्त्योरुपस्थापिकायां निरूढलक्षणायामाहात्तुध्यारोहानपेक्षत्वात्। तच्चा
वयवगामि रूपं सकलव्रीह्यारंभकावयवेष्वनुवृत्तं यवावयवेभ्यो व्यावृत्तं जातिगुणसंस्थानाद्यात्मकं केषुचि
न्नीवारावयवेषु संभवद्वृत्तिकमिति नियम्यमानावच्छेदकावच्छिन्नसकलावयवीलाभदशायां संभवति व्रीहिशा
स्त्रस्य नीवारगतविकलतदवच्छिन्नावयवनियामकत्वं। एवं च सति पूर्वोक्तन्यायेन व्रीहियवशास्त्रबोधितमपू
र्वसाधनत्वं व्रीहिपदलाक्षितमुद्दिश्य धर्मान्विदधद्विधिर्व्रीहिगतावयवानामिव नीवारगतावयवा
नामपि कथं न धर्माः प्राप्नुयुः। नीवारगतावयवानामप्यलाभे च व्रीहिशास्त्रं यद्वियवगतविकलतदवयवा
नप्युपादापयेत्। तदा श्रुतिविनियोज्याः प्रोक्षणादयो लिंगविनियोज्या व्रीहिणां मेधेनि मंत्रादयो नीवारावय

भा॰ द्दी॰ वेष्टिवयवावयवेष्वपि मंवेष्टुरेवयवशास्त्रोपादापितेषु लिंगविनियोऽस्मान्तुतिष्ठुक्तिविनियोऽस्मानां संभवे
पिलिंगविनियोऽस्मानामसंभवणोज्ञथापि शास्त्रोदापितेषु यवेयछास्त्रावृगतासंभवः पूर्वसाधनत्वहिय
५० द्धर्मविधिप्रूद्देश्यतावच्छेदकत्वेनाभिप्रेतं तस्मापकविधिविधेयत्वेमेवतद्धर्मविधिप्रुद्देश्यत्वेनियामकाख्यापकतत्याव्या
प्तिधी विषयत्वमिव विधेयत्तया ऽनुमितिविषयत्वशास्त्रावगतलिंगकल्पक्रतोप्रोक्षणादिविधाविवापूर्वसाधनलक्ष
50 णायाम्भ्रूयगमात्। साहित्रप्रोक्षणादिशास्त्रवद्धीहिपदप्रुक्तापुतानचवलात्प्रुक्तांकल्पयितालक्षणांगीकरणामुचि
तशक्नुतेचेतन्मंत्रप्रकाशितेः पूर्वकुर्यादितिकल्पितक्रतेव्रीहिशास्त्रेणोवेकवाक्यतयालिंगेनकाल्पितायाविनेव
लक्षणायामंत्रस्यापूर्वसंबंधलाभोदध्यानस्येवाग्रकवालक्षमुत्व एव कुशलवनेलवनमंत्रविनियोगोनगौणोप्रुप
लयाव्यतणलवनादाविति नार्मीयन्मायस्तहस्तेन समानप्रकरणाख्योपजीव्यव्रीहिशास्त्रमंत्रेचव्रीहिपदार्थैक्यो रा॰म॰
चित्सालोचमस्तहस्तनतल्लिंगेनचव्रीहिशास्त्रविषयीकृतप्रयोगेष्वेवविनियुज्यमानस्यव्रीहिणांमेधेतिमंत्रस्य ५०

कालिकत्वविधौ व्रीहिशास्त्रबोधितमेवापूर्वसाधनत्वमुद्देश्यतावच्छेदकमिति तद्विहितानां व्रीहीणां तत्सजातिनिषिधभू-
तानां नीवाराद्यपवादी नाभवति तन्मते शेषित्वाभावान्न भवति च यवशास्त्रप्रापितानां यवानां तत्सजातिनिधिभूतानां वा व्रीही-
णां मापि एतेन सोमप्रतिनिधिभूतेषु नैमित्तिकत्वेनोपात्तेषु न्यग्रोधस्तिभिन्यापि सोमधर्माणां तद्विधिभ्यः प्राप्त्यप्राप्तीवो-
ध्ये उक्तन्यायेन हि सोमस्य तत्सजातिनिषेधश्च सोमविधिप्रापितं पूर्वसाधनत्वमुद्देश्यतावच्छेदकीकृत्य धर्मविधयः प्रवर्तन्ते
नैमित्तिकविधिबोधितं। न तु सिद्धं सत्सोमस्यापूर्वसाधनलक्षणायां नैमित्तिकप्रतिनिध्यो धर्मलाभव्यवस्था संभव-
तीति। यत्त्वारंभणीयाविधावनिष्टापादनं तदयुक्तम्। आरंभयोग्यतासंपादनद्वारेण दर्शपूर्णमासोभावये दिति त-
योरेवमुख्योद्देश्यत्वांगीकारेण दर्शादिपदस्यैवापूर्वसाधनलक्षणांगीकारेणात्। न च तयोरारंभनिरूपकत्वेनाप्यन्च-
यादारस्यापत्तिः। वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र तत्कालमात्रविशिष्टेन बृहस्पतिसवेन वाजपेयं भावये-
दिति शेषित्वेनान्वितस्यापि वाजपेयस्य विनैवारस्योत्तरकालतानिरूपकत्ववत्तयोरप्यारंभनिरूपकत्वोपपत्तेः। उत्त

भा.द्दा. रकालत्वावधारणं समस्यापि संबन्धित्वेनान्यार्थोपस्थितत्वं विनमादायपर्यवसानात्। अन्वारंभणस्य दर्शपूर्णमासो
५१ पत्तिद्वारत्वायोगेनापि तन्निरूपितत्वलाभाच्च यच्च त्रिः प्रथमामन्वाहेत्यत्रोक्तं तदपि नायत एव सामिधेन्यो दृष्टार्थाः प्रधा
नापूर्वलक्षणायां च प्रथमापुनर्नामितिव्यवस्थितनिर्देशमासानर्थकं प्रसज्यते। अत एवानर्थकात्तदंगन्यायेन प्रथमोत्त
51 मर्द्धयसाध्यनियमापूर्वयोरेव प्रथमोत्तमशद्वानां लक्षणां ब्रूमः। न च प्रत्यक्षं नियमादृष्टभेदाभावः। इयमेव प्रथमेय
मेव द्वितीयेत्यादिविभिन्ननियमानां हंति विधिनियमवद्विभिन्नापूर्वजनकतायां एवौचित्यात्। समुदायापूर्वभेदे भवदे
वोक्तन्यायेन धर्मभेदस्येव तद्देदेकस्य कत्वौचित्याच्चानापि नियमादृष्टस्य धर्मप्रयोजकत्वासंभवः। तस्याप्युद्देश्यतायाः प्रा
गुपपादनात्तद्दसत्वेप्यभिज्ञातप्रकारजयाधर्मग्राहित्वोपपत्तेः। सूक्तवाकाधिकरणवार्त्तिके तन्न्यायसुधायां च सूक्तवाक
स्य दृष्टार्थप्रहरणार्थत्वप्रयुक्तानर्थक्यपरिहाराय नियमादृष्टार्थत्वोपन्यासाच्च। न चैवं प्रोक्षणादिविधावपि संनिहितव्री ए.म.
हिनियमादृष्टसाधनत्वस्येव लक्षणास्यादिति वाच्यं व्रीहिशास्त्रजन्यादृष्टविषयीकृतस्य प्रधानापूर्वसाधनत्वस्येवासत्ति ५१

बाधके लक्षणोचितत्वात्। यच्चैकस्तोत्रापूर्वसाधनत्वेन बृहद्रथंतरयोर्धर्मसांकर्यं स्यादिति तत्र ब्रूमः। आस्तां बृहद्
रथंतरयोरेकस्तोत्रसाधनत्वं। यद्यपि च तदपूर्वसाधनत्वमेव बृहद्रथंतरशब्दाभ्यां लक्ष्यते। तथाप्यन्वारंभणीयाया आ
रंभद्वारा दर्शपूर्णमासार्थत्ववत् स्तूयमानप्रदृष्टसमभिव्याहारेण प्रस्तावात्वं रथंतरभक्तिद्वारैव निमीलनादीनां स्तोत्रापूर्वार्थ
त्वप्रतीतेर्न बृहति प्रसक्तिः एवं बृहत्सामोत्पाणां रथंतरेपि न तु रथंतरशब्दस्यापूर्वसाधनलक्षणया सामद्वयसाधारण्येप्रस्ता
वोपद्रवमयनिरूपित एव द्वारं स्यात्। मेवं प्रथमबोधवेलायां रथंतरीयभक्तिविशेषस्य द्वारत्वे निर्णीते पश्चादानर्थक्य
परिहाराय सर्वस्यापि रथंतरशब्दस्य लाक्षणिकत्वे बाधकाभावेन पूर्वावगतद्वारविशेषपरित्यागायोगात्। नैमित्तिकानुरो
धेन नैमित्तिकस्येव द्वारविशेषानुरोधेन द्वारिणोपि संकोचसंभवात्। अन्यथा नित्यकाम्यविधिभेदेन नित्यका
म्यापूर्वयोर्भेदावश्यंभावेनान्वारंभणीयाया विधौ दर्शपूर्णमासपदलक्षितद्विविधापूर्वसाधननिरूपितारंभांगत्वेन
विहितायाः स्वांनित्यापूर्वसाधनारंभचिकीर्षयाऽनुष्ठितायाः काम्यापूर्वसाधनतदारंभचिकीर्षयामाहत्तिः स्यात्न

भा॰ दी॰ च पूर्णमासारंभवेलायां दर्शारंभस्यैव नित्यापूर्वसाधनारंभवेलायां काम्यापूर्वसाधनारंभस्य चिकीर्षानिय
५२ मेनाक्षिप्तौ येनोभयोद्देशेन तंत्रेणान्वारंभणीयानुष्ठानं स्यात्। अतस्तत्र दर्शपूर्णमासारंभत्वेन यथारंभस्य द्वा
रत्वोच्यते न ह्येवं काम्यारंभापपुननावृत्तिं सिध्यतीति तत्सिध्यै दर्शपूर्णमासारंभत्वेनारंभस्य द्वारतामिच्छद्भिरेव
52 स्यमपूर्वसाधनलक्षणतातः पूर्वापास्थितिरेवशरणीकरणीया। तथा च तेनैव न्यायेन रथंतरीयपक्षावस्य द्वार
त्वान्न बृहति रथंतरधर्माणां प्रसक्तिः। यद्वा यथैव त्रिः प्रथमामिस्यास्तोऽव्यवस्थितनिर्देशानर्थक्यभयात्त्रखानापू
ल र्वसाधनैक्षणापरित्यंअस नियमापूर्वलक्षणामीक्षा। यतेनथेहापि रथंतरे प्रस्तूयमाने बृहति प्रस्तूयमान इति व्यवस्थि
त निर्देशबलाद्विभिन्ननियामापूर्वलक्षणायाधर्मव्यवस्थोपपादनीया। यद्यपि वैकल्पिकव्रीहियवयोर्नियमापूर्व
मेकमेवैषा करे विकल्पनिरूपणास्य प्रसंगचिनात्वात्तिसिध्येस्यापि तंतथापि प्रकृते व्यवस्थित धर्मविध्यन्यथानुपप रम॰
त्याभिन्नमेव तत्कल्प्यते। तस्मादपूर्वसाधनलक्षणा निर्दोषेति हंति विधोनतदापादनमुखेन व्रीहिविधिनायवेषु हेति ५२

।नियमाधारत्वात्तस्मिंश्च यवानामनुपात्तत्वात् उपात्तनियमगतपाक्षिकत्वस्य नियमविधिलक्षणघटकत्वेऽनुपात्तनि-
यमफलके व्रीहिविधावव्याप्तिरिति सिद्धं न चैवमनुपात्तनियमस्यैव पाक्षिकत्वं लक्षणघटकं स्यादिति शंक्यं व्रीहि-
विधावव्याप्तेः। न च तत्र तावदुपात्तविधेयगतपाक्षिकत्वविवक्षा। न चव्रथनविधावव्याप्तिः। उपात्तविधेयद्वयन-
स्यैव नियमत्वसंभवात् इत्थं च मूलस्य पिष्टस्य स्वयमेव प्रहरणार्हं भवेन्न तत्र तत्कूलव्यापारान्तरः प्रकृते कर्तृकत्वप्रथ-
नस्य नित्यप्राप्त्यभावात् उपघातादिजं चैतत्सकलसंकर्षखण्डने। नापि व्रीहिविधावव्याप्तिः। तस्यानुपात्तव्रीहिनियमपरत्वा-
त्। तथा हि आसां व्रीहिविध्यभावे संस्कारवाक्यानां मंत्रवर्णस्य वा व्रीहिप्रापणासामर्थ्यं। आसां च तदभावे प्रोक्षणादि-
स्यादेव स्वाधारणाभावः। तथा पिष्टस्य श्रुतिविनियुक्तयवावहननकर्मणि कथमिव संस्कारवाक्ये मंत्रवर्णाद्वा व्री-
हिप्राप्तिः कल्पयितुं शक्यते। न च यवानामपि साक्षाद्यागांगतानुपपत्तौ चानेन पुरोडाशद्वारकयागांगत्वं कल्प्यमे-
वेति कथं तैः संस्कारवाक्यादिहेतुकव्रीहिप्राप्तिकल्पना। अत एव यथेति शंक्यं यत ऐन्द्री विनियोजकश्रुतिलिंगयोर्लिंगाक्र-

मा॰ दी॰
५३
53

त्तिकल्पकत्वे लिंगेनैव श्रुत्या विनियोगात् तथैकस्याश्चापि कल्पनाया अनपेक्षणात् यथा श्रुतेः प्राबल्यं तथा संस्का
रविधिवर्णाभ्यामिवयवश्रुत्यादिविनियोगात् तथैनकापि कल्पनापेक्ष्यत इति स्वीकार्यमिव परश्रुतेः प्राबल्या
द्विनियोगोत्तरं तु समापतन्ती कल्पना न विनियोजकस्य दौर्बल्यमावहति गौणेति श्रुतेर्गौणसामर्थ्यकल्पकत्वेन
दौर्बल्यापत्तेः । अतः प्राबल्यवशात् प्रतिकूलाभ्यां संस्कारविधिमंत्राभ्यां व्रीहिनियमाप्राप्ते व्रीहिशास्त्रं स्वविषयनि
यमफलमेव संभवतीति कथं हिंसादिनियमफलत्वेन वक्तुमुचितं । किंच केनापि हेतुना कश्चिद्विप्रयोगविशेषेऽप्राप्त
स्मरणाय तं कुर्वन् विधिर्नियमविधिरित्युच्यते । यस्मिंश्च प्रयोगे एककलसंस्कारसहितप्रधानपर्याप्ता नीवाराणाम
वे पुव्रीहियस्य प्रधानमात्रपर्याप्ता भवेयुस्तत्र संस्कारविधिमंत्राभ्यां नैव व्रीहीत्युपादानं प्राप्नुयात् । व्रीहिविध्य
भावे हि ताभ्यां प्राप्नुवन्तोऽपि व्रीहिस्थ्यः पुरोडाशार्थत्वेनैव प्राप्नुयुः । तदर्थत्वेनैवापेक्षणात् तावत्स्य व्रीहीणां ताम॰ ५३
शेषकार्याणां च पुरोडाशार्थत्वे तुल्ये सति बहूनां शेषकार्याणामनुरोधेनोक्तप्रयोगे नीवाराणामेवोपादानं

प्राप्नुयात् । अस्ति तु व्रीहिविधौ येन प्रयोगांगत्वेन विहितव्रीहीणां यो यं यद्यप्यर्थात्पुरोडाशद्वारेण यागांगं भवंति नैताव
ता पुरोडाशस्य शेषाः । एकहायन्याद्वारेणैवं ज्ञातः प्रधानांगस्यैव व्रीहीणां वृद्धेभ्योपि संस्कारेभ्यो बलवत्त्वेन
संस्काराणामनादृत्य व्रीहीणामेव ग्रहणं प्राप्नोति तस्माद्विधेयव्रीहीणामुक्तप्रयोगेप्रायत्तामनन्यलभ्यं व्रीहीवि
धेः फलं संभवतीति न विध्यंतरविषयीभूतहविर्द्रव्येषु नियमनं व्रीहिविधेः फलत्वेन वक्तुमुचितं एवं सति कथं
व्रीहिविधावव्याप्तिः । वस्तुतस्तु नियमः पाक्षिके सतीति वार्त्तिकोक्तलक्षणोऽनुपात्तमपि व्याप्त्यायवाकृतयानि
ष्फलमुपात्तादपि परंप्राप्तिव्याप्त्यास्तूपन्यासः केवलमुपहासायैव भवति । तस्मात्पक्षे प्राप्तं येनानियम्यते स नियम
विधिरिति लक्षणमुद्दिष्टमिति चेन्न । न पूतिकानां प्रति विधित्वेन नियमार्थे विधावव्याप्तेः सुसदृशेषु द्रव्यांतरेषु स
त्स्वईषत्सदृशानां पूतीकानामप्राप्तेः । यथाप्यपूर्वविधिलक्षणावसरोक्तन्यायेन पूतीकानां प्राप्तिकत्वमुप
पाद्येत तथापि विहिरापणगर्भः समवर्त्तिनामिडस्यासारमाया पत्नीषेत्वेति शास्त्रं चाच्छिन्न इति पदिधौ पञ्चं निपुंजीतोक्तरे वाजीनमा

भा॰दी॰ सादयतीति नियमविधिरेव प्राप्तिः। तत्र तत्र कार्यविनियोगबलेनैव कल्प्यसामर्थ्याभावे तद्विधिविधेयानां विनियोगा
५४ त्प्राप्तेः। अलक्ष्मा एवैतद् इति चेत्, सत्यं तु तथा तथा विधेयेन नियम्यते स नियमविधिरित्येतावतैव लक्षणनिर्वाहे सति शेष
वैयर्थ्यापत्तेः। अथ येन द्रव्याद्युद्देश्यः पाक्षिकः स नियमविधिरित्युच्यते न तु तथा सति नमुकोनेत्यादिषु वेष्टनाया विधि
54 त्वाप्तिः उत्तरवेदिविशेषेण प्रकृतावप्यग्नेः पाक्षिकत्वावश्यंभावात्। अथ येन नियम्यते तदंशे वैलक्षण्यं वार्त्तिकस्याऽपि पा
क्षिकत्वोक्तिस्तत्रासम्बन्धेनैवेति चेत्, किं तन्नियमनं यद्विधिकर्तृकं तेन व्यपदिश्यते। अमावास्यायामिति चेत्, तर्हि न सर्वे
भ्यः कामेभ्यो दर्शपूर्णमासाविति वृहद्रथन्तरसामा पृष्ठ्यः षडह इत्यत्रापि व्याप्तिः। अग्नेः स्वर्गे तत्फलांशपूरणार्थत्वात्
द्वितीयस्य तृतीयादिषु षडहः पृष्ठ्यवैरूप्यादिवदुद्देश्याप्राप्तांशपूरणार्थत्वात्। अथा निर्दिष्टत्वेनाप्राप्तांशो विशेष्यते सर्वकामया
केच स्वर्गः प्राप्तः फलान्तरमप्राप्तमिति निर्धारणान्नातिव्याप्तिः। षडहवाक्येऽपि पाद्यहिकयोराद्यहोर्वृहद्रथन्तरे प्राप्ते तृतीया राम॰
दिषु प्राप्तमिति निर्धारणान्नातिव्याप्तिः। हन्तैवं केषुचिद्व्याप्तिः केषुचिदिति निर्धारणाभावादुक्तविधौ लक्षणं सम्भवतीति चे ५४

ता। एवमपि अग्न्याधाने दक्षिणोत्सर्गविधौ प्राकृतदक्षिणाकार्ये विहितस्याग्न्यस्य सर्वार्लिम्भो देयत्वया प्राप्तस्येत
र्त्विग्भ्य आर्त्विज्यप्रसक्तं वंधं विदधति अश्व ब्रह्मणे देय इति विधावनित्या प्राप्तिः प्रागस्माद्विधेः कश्चिदश्वोऽत्र ब्रह्मणे देयः
कश्चिन्नेति प्राप्तस्य प्राप्तेः। निर्द्धारणात्। ननु षड्वा असौ ब्रह्मणे देय इति च वाक्ये दृष्टार्थत्वादेतु वचना विधिवन्नियमविधि
त्वमेवास्तीति कथमतिव्याप्तिर्विषयत्वमिति चेन्न हि श्रुतस्य न्यायतया पूर्वोदाहृतानामाधानामन्त्रादिविधीनां नियमविधित्वमे
वोचितमिति तेषु पक्षप्राप्तविषयत्वाभावाद्व्याप्तिः। न हि तत्तदुदाहरणेषु विषयप्राप्तिकत्वं केनाप्युपपादयितुं शक्यं अतः
कथं नियमविधिलक्षणमिति चेन्न अतीहण्ण इति पक्षे कचिदुद्देश्यसंपादनसमये। यादृग्रूपे विधिपर्यवसानं तादृग्रूपं प्रमा
दार्थः। आप्तिः कर्त्तव्यतावगतीतिः अनाप्तिरकर्त्तव्यतावगतिः। विशिष्टमानान्तरानधिगतं साधनतारूपं दधातामितिपतीति वि
धिः स्वपर्यवसानगोचरीभूतरूपविशिष्टविषयस्य कचिदुद्देश्यसमये कर्तव्यतांगीकारेणाकचिदुद्देश्यसमये कर्तव्यत्वशंका
यामज्ञानसाधनताक्षेपको नियमविधिरिति वाक्यार्थः। उक्तविधप्राप्तिप्राकर्तव्यत्वशंकायां यत्कर्त्तकआक्षेपआपनमितस्तत्

भा॰ द्वा॰
५५
55

यमविधिरितितु निष्कर्षः। हंतिविधिनाहि हंतेरपूर्वीयवितुषीभावार्थत्वेन कर्त्तव्यत्वे बोधिते जायत एव प्रेक्षावत्तामी
दृशी शंका हंतिविनापि वितुषीभावसंभवे क्वचित्प्रयोगे हंतेरकरणं किं न स्यादिति। तद्दृशेन नियमदृष्टे हेतुतामेवआ
क्षिपतीति हंतिविधेर्नियमविधित्वमुपपन्नं। यद्यपि स्वर्गकामो यजेतेत्यादिविधिनाऽपूर्वाक्षेपः क्रियते तथापि तद्विषये
शक्यत्वसंदेहात्साक्षिप्तं कर्त्तव्यत्वं काकोपि संभवति तथा न तस्यां स आयत्तत इति न वातिप्रसंगः। यद्यपीषत्वोतिष्ठि नन्नी
त्यादौ विधौ दृष्टेपि विधेयमंत्रादेः स्वरूपेणासमवेतार्थप्रकाशनादिदृष्टकार्यासमर्थत्वेन तादर्थ्याप्रतीतेर्नैयायिका कर्त्त
व्यत्वशंकास्पदत्वात्तथापि यादृग्रूपे। छिनद्मीत्यध्याहारादिविशिष्टे विधेये विधेयेविधेः पर्यवसानेतादृग्रूपस्पतस्पता
दर्थ्यप्रतीतो भवत्येव तादृशशंकास्पदत्वमितित्रलक्षणाप्रसंगशंकावायन्नुमुक्तार्थप्रशस्त्यहृणं॥ नन्वेवमपि
नियमादृष्टमनाक्षिपत्सु केषुचिन्नियमविधिषु तदाक्षेपघटितस्योक्तलक्षणस्याव्याप्तिः स्यादेवा तथा हि श्रोतुं वरो पूर्यो
भवतीतिवेक्ष्णतो न विधिना नैव नियमापूर्वमाक्षिप्यते। स्वादित्याजन्यत्वेन ज्ञातनियमादृष्टं प्रतिहेतुत्वाक्षेपादुपपत्तेः। स्वा

रा॰ म॰
५५

द्विरोपूर्वो भवतीति वदन्न विधिनाऽनुमानानुगतेन साधनत्वमप्याक्षिप्यते। कृतस्य साधनतोक्तस्य तस्यैव सर्वप्रयोगेषु फ
लोपधानमित्याक्षेपमात्रेण तदुपपत्तेः। उत्तरेऽहनि रात्रस्य गत्यन्तरस्यात्रैव नियमाद्दृष्टसंबंधाक्षेपोपि ग्रहणस्यै
व कृत्स्नपूर्वफलोपधानमित्याक्षेपमात्रेण तदुपपत्तेः। एवमिश्रमते वेष्टते ऽर्थान्तरं दृष्टं भवतीति विधावपि तत्संबंधाक्षे
पाभावो वा ध्रुवः कृतो भार्यामुपेयादित्यत्र विधेयस्यादृष्टसामान्यमपि प्रतिहेतुत्वं नाक्षिप्यते न तत्र नियमदृष्टंप्र
ति। अकरणस्य प्रत्यवायहेतुत्वाक्षेपपूर्वकं तत्परिहारार्थत्वाक्षेपमात्रेणानुपपत्तेः। ब्राह्मणं प्रति दृष्टार्थं याजना
दिनियमविधौ तु विधेयस्य न कंचित्सन्निपातार्थमप्याक्षिप्यते उपायान्तरस्यैव प्रत्यवायहेत्वाक्षेपेणानुपपत्तेः। प्रतिग्रहस
मर्थोपि प्रसंगं तत्र वर्जयेदिति शास्त्रवशेनाकरणस्य प्रत्यवायहेतुत्वायोगात्। यत्वाकारोक्तं पक्षान्तरमुक्तं रिक्थादिध
नाभावेनावश्यकर्तव्यं धनार्जनं यदा भवति तदा क्रीयमाणाद्दृष्टप्रतिग्रहोपि दृष्टाय इति नियमो दृष्टमात्रं वृद्धधनसंपन्नस्यानि
यतोपायेऽर्जने प्रवृत्तस्य प्रत्यवायाभावापत्तेः। व्यत्यये कर्मणां साम्यमित्यादिशास्त्रेण चतुर्दृशार्जनस्य त्वसंगतिगा

मा॰ दा॰ मिहीमजातित्वापादकप्रत्यवायहेतुत्वावगतेः॥ एवं निषेधानां विध्यादिवैविध्याङ्गीकारेनानृतंवदेदित्यादिषु क-
५६ त्वर्थपुरुषार्थनिषेधेषु नियमात्मकेषु नियमादृष्टाक्षेपघटितलक्षणासंभवो दर्शयितव्यः क्रत्वर्थेषु स्नानायिगो-
56 वर्जनस्य क्रतुत्वपूर्वहेतुत्वाक्षेपेण पुरुषार्थेषु च निषेध्यस्य प्रत्यवायहेतुत्वाक्षेपेण तदुभयोपपत्तेः॥ अतो नियमा-
दृष्टाक्षेपघटितलक्षणानुपपत्तिरिति चेन्न तस्यैव न क्रतुलक्षणे नियमादृष्टप्रवेशोक्तिः आक्षेपसामान्यघटितत्वा-
पि तत्स्वप्रसिद्धोदाहरणोपन्नं दर्शयितुं परं तत्र संभवन्नियमादृष्टाक्षेपणो योऽस्माभिरुदाहृतः॥ भवतु दाहृत नियमोदा-
हरणेषु तु भवदुक्तरीत्यैवेदात्तिभावत्तकस्थितं कश्चिदाक्षेपः संयोकविधपाक्षिकाकर्तव्यशंकानिमित्त एवेति संभवत्स्वेव
तेषु लक्षणानुगमः अत एव त्वादृशो यूपो भवतीत्यादिवैकृतविधिविधेयस्य त्वादिनादेर्निज्ञातं नियमापूर्वसाधन-
भावस्यापि यादृश एव तत्संबंधः प्रागज्ञाततत्तादृशाक्षेपेण लक्षणालक्षणं तन्नोपपादनीयमिति सूचनार्थो मूले ज्ञाना- राम॰
र्थो विशदः नन्वयथैवान्वयव्यतिरेकसिद्धत्वाद्धेतुव्यापार्थत्वबोधो न हंतिधेः फलं॥ तथा हंति नियमोपि न्नूनत्फलं हंतिप्र ५६

काशनसमर्थस्यावरक्षोहिवः सपत्नं वध्यासमितिमंत्रस्य लिंगप्रकारेणावगतकर्तव्यार्थत्वादुपपत्तिकल्पितविधि
नैवतत्प्राप्तिसंभवात्। उक्तं हि तत्रीये ध्याये ग्रहणावेक्षणसम्मार्जनप्रकाशकमंत्राणां भक्षानुवाकसमाम्ना
सहपठितलिंगावगतस्यमर्शणोपयोगिग्रहणादिप्रकाशनार्थत्वस्य निर्वाहाय ग्रहणादिनियमकल्पनां वद्वारेणो
पत्ताविचारे वैवं कर्णोयज्ञावचद्धतिसा त्रिणादर्शादियागसाधनत्वेनावगतो लूखलमुसलयोरुत्पत्तिशिष्टद्रव्यां
नणवत्तद्धायेयोरिष्प्रभाक्षारसंभवत्साधनत्वयोः केनहविर्गणातत्रिर्वा हरस्याकांक्षायां पुरोडाशप्रकृतितया विहि
तव्रीहीणां वैतुष्योपायांक्षामात्रोवयनोहंतिमात्रसामर्थ्येवानयोरणोवयनाभवत्स्येवंवुद्धिः। उलूखलमुसलो
भ्यां हन्तिद्वारेण क्रत्वाद्युपकुर्यादिति। नचहंते रनित्यत्वेन तद्वारेण तामप्यां नित्यवदुपकर्तृत्वं शक्यत इति तद्धैलेनेवभ
वतिस्मृति नियमसिद्धिरितिनहंतिविधेर्नियमफलकत्वसंभवः। किंतेहितत्प्रयोजनमितिचेत् नखेशाना मंत्रविधिना
गर्दभरशनायाइवामुनापियथापरिसंख्येवमवगुनवघामस्यापि नियमस्याभ्युदयशिरस्कं पुनर्विधानमेवोचितं। अ

भा॰ द्वा॰
५७
57

नारम्भाधीतस्यापूर्वस्य विधिवन्न तु परिसंख्याफलकत्वमिति शंकास्पदं दर्शनामन्त्रविधेरपि तथैवाभ्युदयिकि
रत्नं पुनर्विध्यर्थत्वापत्तेः। न चैवमपि हन्ति स्वरूपस्य न नियमस्यावायवेम्यः परिसंख्यानं मन्त्रीयत इत्यत्र किंनिया
मकमित्यपि शंकास्पदं यत्तु तां प्राप्तिमालोच्य विधिः परिसंख्याफलत्वं प्रतिपद्यते तस्य स्वरूपप्राप्यकत्वे स्याद
यं स्वरूपपरिसंख्याविधिः। न चैवमस्ति लौकिकप्रमाणमेव हि हन्ति स्वरूपप्राप्यकं यदि तन्मात्रालोचनेनायं
विधिः प्रवर्तेत तेनानियतप्राप्तस्य नियमपरत्वेनान्यतन्त्रमन्त्रलिंगकल्प्यविधिना नियमप्राप्तिमालोच्य
प्रवर्तते अत एव परिसंख्यापत्नीमयनित। तत्र परिसंख्याफलत्वापादिकां प्राप्तिं कुर्वन्नाख्यात्रेणानियमप्राप्ति
मालोच्य क्रीयमाणा परिसंख्या रशनामन्त्रविधाविव हन्तिविधावपि नियमगोचरैव भवितुमर्हतीति। स्यादेतत्
नियमप्राप्तिमालोच्य यः परिसंख्याविधित्वं प्रतिपद्यते आलोचयेदेवाहो स्वरूपप्राप्तिं तत्पूर्वभाविनीमपि तदानीं
अन्यथा नियमस्यैवतु ध्वनारोहानात् तुल्यैवालोचने शब्दोपात्तस्वरूपस्यैव परिसंख्या युक्ता नाशब्दोपात्तस्य निय

राम॰
५७

मस्येति। भेवंस्वरूपपरिसंख्यायां हि निवृत्तिनियमान्नियमादृष्टं न रुकल्पनामापद्यते नियमपरिसंख्यायां तु नियमादृष्ट
स्यावश्यकत्वात् स्वानंगत्वमात्रमिति लाघवात्। स्वरूपपरिसंख्यायामापद्यमानात्स्वरूपनियमोभयप्राप्यकमानबाधान्निय
मपरिसंख्यायामापद्यमानस्य नियमप्राप्यकमानमात्रबाधस्यौचित्यात्। अत एवाङ्गिरसां द्विरात्रे षोडश्यग्रहणं इति
वाक्ये हि निकारमतेन परिसंख्याङ्गीकारे पि तत्र षोडशग्रहणवैकल्पिकषोडशिस्वरूपपरिसंख्यामनङ्गीकृत्य षो
डशिग्रहणस्य नारम्भवादप्राप्तनियमपरिसंख्यैवाङ्गीक्रियते। न तु हेति विधेर्यैव परिसंख्यार्थत्वे
प्रोक्षणविधेरविनष्टार्थत्वमेव स्यात्तुल्यन्यायत्वात् न तथा सति व्रीहीन्निर्यजेतेस्मस्मवैयर्थ्यापातः इदं हि शास्त्रं न
व्रीहिनियमपरं तस्यान्यलभ्यत्वात् किंतु प्रोक्षणाहंतिशास्त्रगतव्रीहिनिर्यजेतेस्मस्मवैयर्थ्यापातः इदं हि शा
स्त्रं न व्रीहिनियमपरं तस्यान्यलभ्यत्वात् किंतु प्रोक्षणाहंतिशास्त्रगतव्रीहिपदयोरपूर्वसाधनलक्षणापाद
नेन यवेष्टप्रोक्षणाहत्योः प्राप्तनियमफलं तु पादितानापूर्वसाधनलक्षणाधस्तात्। अतो न हेति विधेः

मा॰ दी॰ ५८ 58

परिसंख्यार्थत्वमवगन्तुं न हि समाख्यागोचरत्वापादकेन हननावधर्युकर्तृकत्वप्रापणार्थत्वमस्येत्यपि न शंक्यं
मंत्रगतसमाख्याया ऽध्वर्युकर्तृकत्वेन नियतत्वे हंतिमंत्रे ऽचवध्यासमित्युक्तत्वान्न पुरुषप्रयोगे तो वमंत्रो ह्यार
पि न कर्तृकत्वावगत्यासत्त्वात् न च याजमानकांडेपि हंतिवाक्याम्नानमहिम्ना प्राप्तेन यजमानकर्तृकत्वे
नाध्वर्युकर्तृकत्वस्य बाधः स्यादिति शंक्यं तत्राम्नानस्य हंतृसंपादनात्मकगुणविधानेन चरितार्थस्य मानां
तरबाधावहार्थाप्रापकत्वादिति मर्थ एव हंतिविधिरिति चेन्न व्रीहिविधेर्व्रीहिनियमपरत्वसंभवस्यापि प्राग्
उपपादितत्वात्। अतो नैव हंतिविधेर्नियमपरत्वमित्याशयेनाह किंत्विति। समाधत्ते नियम इति। तमेव विवृणोति
सचेति। अयमाशयः। व्रीहीनवहंतीत्यस्य न तावत्फलतः परिसंख्यात्वं संभवति यवसाधारण्येन हंतिप्रापकश्रु
तिकल्पनामूलभूताया अवरक्षः इत्यादिमंत्रस्य प्रकरणे नित्यवदाम्नानं किमर्थमित्याकांक्षायां व्रीहिहंतिसंबं
धबोधकश्रुतिदर्शनेप्यनुच्छेदान्न परिसंख्याभिधानी व व्रीहयोपि सर्वप्रयोगेषु अनुयन्तैरनंतरमिमामगृभ्णन्निति मंत्री

राम॰ ५८

यानित्यवदाम्नानकेऽसमर्थाकांक्षापाश्रया अभिधानीसंबंधबोधबोधकश्रुत्सेवा वा रूप इति मन्त्रीय नित्यवदाम्नान
केऽसमर्थाकांक्षापाया व्रीहीन्हंति संबंधबोधकश्रुत्सामवेदुच्छेदः। स्याच्छ्वग ईमाभिधास्याद्वयवानामर्थान्निवृत्तिः। न
चैवमास्ति। अथ यथाह्नि केऽपि व्रीहीन्हन्तो प्रकाशपत्वेन लब्धे मन्त्रः किमर्थ इत्याकांक्षानिवृत्तं नित्यवदाम्नानस्यापि वयो प
स्यापाक्षिकशेष्यनुष्ठेयेन पाक्षिक्कत्वस्योचितत्वात्संभवत्से व्ययवसाधारणा हंतिप्रायकश्रुतिकल्पनोच्छेदेन फलतः प
रिसंख्येसंचेतानर्थस्यपि हंति विधावाक्ये यतः पक्षप्राप्तं हंतिप्रकाशपत्वेन व्रीऽवरक्ष इति मंत्रस्योल्लूखलमुसल
योश्च केऽसमर्थाकांक्षोपशमान्नैव हंतिनियामकश्रुतिकल्पनोत्थानमिति हंति विधेरपानि यमविधित्वमेव स्यात्। न हि विधि
तः पक्षप्राप्तस्येव हन्तारत्वं नापक्षेन इत्यत्र नियामकमस्ति। अभ्युदयेष्टिगततदधिपयसोः प्रणीताधर्मप्रायकन्यायेन क्रतोपिप्रमा
णाद्वगताष्टर्वसाधनभावस्य द्वारत्वोचितात्। अथ मंत्रस्य नित्यवदाम्नानान्यथानुपपत्त्या यवसाधारणेन हंतिप्रायकश्रुति
कल्पनामभ्युपेत्य हंति विधौ पाक्षपरिसंख्येवो चेत्तत्र दोषत्रयापत्तिः ततो वरमभ्युदयेष्टिश्रुतनियमांगीकरणमिति। प्रका

मा॰ दी॰
५९

रांतरेणाक्षेपपरिहारद्योतनार्थ एव कामिन्नक्रमस्य श्रुत्यनेनैवेति। अयमाशयः। यद्यपि मंत्रस्योलूखलमुसलयोर्वि
गलानुपपत्त्याऽर्हतीति नियमविधिरनुमीयते तथापि श्रुतेरर्हतीति विधिनैवार्हतीति नियमः क्रीयत इति शाक्यत एव वक्तुं अ
नुमितविधिः कल्पनाद्विनिरूपणमानाभावात्। यो मंत्रबलादनुमितः स एवापमितिप्रत्यभिज्ञासंभवाच्चाको हि प्रेक्षा
वान्धूमेन पर्वते वह्निमनुमाय ततः पर्वते स्वदृष्टधूमजन्यनसमर्थवह्निप्रत्यक्षेणानुभवत्स एव मयानुमितः स एवायमि
ति न प्रत्यभिजानीयात् नन्वेवं मंत्राधिकरणे तदर्थशास्त्रादिति पूर्वपक्षसूत्रावयवेन मंत्रलिंगप्राप्यविनियोगार्थानां शा
स्त्राणां सिद्धांतिनं प्रति प्रदानर्थक्यापादनं कृतं तच्च सिद्धांतिनां तेषां परिसंख्याद्यर्थतयार्थत्वमुक्तं तदुभयमप्यनुप
पन्नं मंत्रलिंगानुमितैः सह श्रुतानां भेदाभावेनाप्राप्तत्वेन हि विनियोगपरत्वस्यैव संभवादिति चेन्न लिंगाद्यनुमेयानां लिंगा
दिविनियोजकमंत्रादिगोचरश्रुतीनां नित्यानुमेयत्वेन प्रत्यक्षश्रुत्यभेदायोगात्। न हि अगृहीतसौरभेण धूमेन वह्निम राम॰
नुमाय ततः पर्वतोपरि दृष्टं तं वह्निं प्रत्यक्षेण पश्यन् कश्चित्प्रेक्षावान् प्रत्यभिजानीयात् यो मयानुमितः सोऽयमिति। न चैवमवरक्षे ५९

त्ति मंत्रानुमेयोहंति विधिरपि नित्यानुमेयत्वाच्छ्रुताद्भिन्न इति शंक्या लिंगादिविनियोज्यमंत्रादिशेषिभूतहस्तादिविष
याणां विधीनां क्वचिदाम्नातानामेव मंत्राम्नानाद्यनुपपत्तिकल्प्यत्वस्य वक्तुमुचितत्वात्। नतु मंत्रसामर्थ्येन मंत्रवि
षयिणी श्रुतिर्नित्यानुमेयैवानुमीयते तच्छेषिविषयिणी तु क्वचिदाम्नातैवेत्यत्र किं नियामकमिति चेन्न श्रुत्यालिं
गादिकल्प्यात्तद्विनियोज्यमंत्रादिविषयत्वावच्छिन्नयोर्लाघवान्नित्यानुमेया एव त्वीक्रीयंते। आम्नातानां हि स्वरूप
सत्वमनादिकालीनानेकपुंकर्तृकाध्ययनविषयत्वं च कल्प्यमिति गौरवं। नित्यानुमेयानां तु सत्वमात्रमित्यतिला
घवं। प्रतिपत्रकरणां चाम्नानविधिविहितांगेभ्योधिकसंख्यानां लिंगादिविनियोज्यांगानां विधायिकाः श्रुतयोनुपल
भ्यमानानाम्नातत्वेन संभावयितुमपि शक्यंते। ईदृशवेदप्रस्थानमहिम्ने च बलाधिकरणादौ लिंगादिभिर्नित्यानुमेयश्रु
त्यनुमानकथनं मंत्राधिकरणे तदर्थशास्त्राणां परिसंख्यापूर्वत्ववर्णनं च संगच्छते। यद्यप्युक्तरीत्या लिंगादिविनि
योज्यमंत्रादिशेषिभूतं विषयश्रुतेरपि नित्यानुमेयत्वे लाघवं तु स्यात्तथापि दृष्टश्रुतेराम्नाताया एव कल्पनमुचितं तथा

भा०द्रा०
६०
60

हि मंत्रगतलिंगादिना प्रथमे मंत्रस्यैव विनियोजिकाश्रुतिस्तु मीयते अनेन मंत्रेणाहं तिकुर्यादिति तत्तोमानांतरानवग
तविनियोगस्य हंतेरहेः स्वपत्वानुपपत्त्या हंतिविधिः कल्प्यते । स च यदि नित्यानुमेयः स्यात्तदैव मानांतरस्यात्तस्यानपेक्ष
प्रमाजनकमेव हि स्वप्रमाणांतरं न च नित्यानुमेयस्यानुमापकमनपेक्ष्यमाणत्वमपि संभाव्यते । अतो हंतौ मंत्रविनि
योगस्य लिंगप्रमेयत्वावगतहंतिविनियोगस्य मंत्रविधिप्रमेयत्वमापद्येत हंतिविधेर्नित्यानुमेयत्वेन च यदि विधिप्रमे
यविनियोगं यत्नतस्य तद्विधिविधेयभावनायामुद्देश्यत्वं संभवति । अतो यथोद्देश्यत्वानुपपत्त्या हंतिविधिः कल्प्यते नि
त्यानुमेयहंतिविध्यनुमानेतस्याद्रव्यत्वस्यात्कचित्प्रामाण्यतस्यैव तस्यानुमानमुचितं तद्रूपं तत्प्रतिपक्षकरत्वं मंत्राध्या
म्नानान्यथानुपपत्तिमहिम्ना संभवत्यातिक विनियोगानां मंत्रादिशेषित्वांविधयः तथाहि दर्शपूर्णमासयोस्ता
ल वद्दृष्टदृष्टुपदेशयोरामनास्तान्यथानुपपत्त्या स्तंबं यतीपिंडानूनिकृन्तादिति मंत्रबलेन च संभवत्यातिके पि पेषणे विधि
राम्नातः तंडुलान्पिनष्टीति जनप्रत्यैतासंयोमीकि मंत्रबलेन संभवत्यातिके च संयवनेऽपि प्रतिसंयौतीति द्रव्यत्वाप्रवि

राम०
६०

तामग्रयणत्वविरहं तत्तः अग्रयणेनेति मंत्राभ्यां संभवत्प्राप्तिके अग्रयणे कपालेषु अग्रयणनीति । न चैषां यवपरिसंख्यार्थ
त्वं संभवति । एषु व्रीहिष्वग्रयणान्नानापूर्वार्थसंबंधप्राप्त्यर्थत्वं । एषं पौर्णमासस्यच्चमपुरुषेणा संयवनेन तत्राप्तेः पेषणा
आग्रयणयोरन्येषां चागतान्यकर्तृकत्वयोः समाख्यायाऽध्वर्युकर्तृकत्वकल्पनायोगात्प्रयोजककर्तृत्वस्यानुप्रेष
महिम्नैव सिद्धेः । न च अग्रयणविधेर्व्रीहिषु तंडुलेषु व्रीहित्वनियमनिवृत्तिफलत्वमपि । अन्तविधिन्यायेन मंत्रकल्प्य
अग्रयणविधिना प्रतिसिद्धेः । तथा पशौ परिवीरसि युवासाः परिवीतइति करणं क्रियमाणानुवादिमंत्रबलेन संभ
वत्प्राप्तिके परिव्याणे । अग्निर्रशनेषबलेन संभवत्प्राप्तिकयोः संज्ञपनविशसनयोः छागस्यच वपाया इति मंत्रबलेन
संभवत्प्राप्तिके प्रियच्छेदकत्वविधयोरनन्यप्रयोजनं आम्नायं ते । तथा सोमे पिगवा तेक्रीणामि सोमं ते क्रीणाम्यूर्ज
स्वंतमिति मंत्राभ्यां संभवत्प्राप्तिके क्रये उपयामगृहीतोसीन्द्रवायुभ्यां त्वा जुष्टं गृह्णामि । उपयाम· मित्रावरुणाभ्यां
त्वा जुष्टं· मीत्यादिमंत्रैः संभवत्प्राप्तिके षु ग्रहणेषु च विधयः श्रूयंते । न च प्रतिप्रकरणमाम्नातानामीदृशानेकवि

मा द्वा ।
६१
61

धीनां वैयर्थ्यं शक्यं वक्तुं। न च प्रत्येकमभ्युदयशिरस्कप्राप्तिकत्वमपि युक्तं अनेकादृष्टकल्पनागौरवात्। प्राप्त
स्याप्यभ्युदयशिरस्कविधिसंभवे च विहितस्य विधानायोगेन कर्मान्तरकल्पनायाः चाप्यनुदयापत्तेः। ईदृशावेद
प्रस्थानमहिम्नैव चाकरे तत्र तत्संभवत्प्रयोजनानां नाराणामपि विधीनां मंत्राद्याम्नानान्यथानुपपत्तिलभ्यविधिका
र्यैणां विधित्वमंगीकृत्य सिद्धांतवर्णनं दृष्टपते चतुरश्चतुरो मुष्टीन्निर्वपतीत्यत्र तावदमुष्मै जुष्टं निर्वपामीति मंत्रे
णासंभवत्प्राप्तिकस्यापि निर्वापस्य विधिमंगीकृत्य चतुर्मुष्टिनिर्वापस्य यदार्थत्वान्नैवानुसमय इति सिद्धांति
तं पंचमे चतुःसंख्या मुष्टिपरिमाणयोश्च निर्वापांगत्वसाम्यात् तत्र दशमाध्याये च तोन्नथमोपस्थित चतुःसंख्यानु
ग्रहः कार्यैकत्वं दशमे। शक्यते चात्र वक्तुं मुष्ट्यनुवादेन चतुःसंख्या विधीयत इति। न हि मंत्रेणासंभवत्प्राप्तिकस्य
निर्वापस्य प्रायणोत्पमुद्भूतावैयर्थ्यशंका अभ्युदयशिरस्कत्वकल्पनापर्यन्तं व्यासीयते न तु दामुष्ट्यनुवादेन चतुःसं — राम ।
ख्याविधिर्वाकामप्रयोजनत्वेन स्वीकरोतीति संगच्छत इति मंत्रानुमितस्यानुमेयप्रत्यस्यानिर्वापस्यात्राप्यभ्युपगमे सिद्धांतद्वय — ६१

मप्यनुपपन्नं स्यात्। नवाप्राप्तमुद्दिश्य प्रवासात् संभवत्यपि शंकास्पद। पक्षप्राप्तानुवादेनापि गुणविधिसंभवात्।
सामान्यशास्त्रप्राप्तितदह्निहोमहुतगतप्रवासे हितपंचाग्निकर्तृकव्यापारप्रकाशकेन पञ्चतां पंचेति मंत्रे
णानिर्धार्यां गतयावधारितेन मुष्टिनिर्वापाति संभवाद्यानथा क्रमावगतौ गमाद्याभिर्वात्रयी पूर्णमासामिति
वचोभ्यां व्यवस्थापिताभिरनुवाकाभिः संभवत्याक्ययोर्विदेवतयोरग्नीषोमाभ्यामाज्यभागौ प्रजवीतिवाक्ये वि
धिं मंगीकृत्य दशमे सिद्धान्तितं प्रथमाज्यभागोऽप्रमान प्रधानदेवतासंस्कारको दृष्टोपात्तयावद्दुप्याधयप्रसंगाद्दा
गशाकाजेचात्र वक्तुं इतरेतरयुक्तयोर्देवतात्वं विधीयत इति नहि तादृशेऽपि प्राप्ते जने संभवस्यभ्युदयाधिरुकात्वं वक्तु
मुचितं तत्पश्चद्वयोरप्याज्यभागयोः संस्कारकर्मत्वं स्यादिति सिद्धान्तहानिरेवमन्यत्राप्युपांश्वञ्चवंः हप्रासिद्धांतयत्यानि
कुर्वतामाचार्याणामेष एवाभिप्रायो लक्ष्यते यन्मंत्राम्नानान्यथानुपपत्त्या मंत्रशेषिविषयत्वेन कल्प्यमानास्तु
तिर्न स्यानुमेयाश्रितोपकारिचिह्नाम्नातेवत्तथैव वेदप्रस्थानदर्शनादिति। उचितं च वेदार्थनिर्णायाय प्रवृत्तैर्वेदप्रस्थान

मनुस्मृत्यैव वेदार्थनिरूपणं कर्तुं शक्यत एवं स्मृतिपादे वार्त्तिककारैः सर्वाचारप्रामाण्यनिर्वाहार्थमाचाराः प्रमा
णमित्यत्रैव श्रुतिः कल्प्येति प्रसक्तरूपपादितेति न्यायसुधायामुक्तं कतिपयाचारमूलश्रुतीनामुपलंभात्तत्सैका
चारमूलानेकश्रुतिकल्पनमेवाभिप्रेतमिति। तथा विध्यन्ताधिकरणे सोमादिषु लौकिकस्थालीपाकादिविध्यं
तप्राप्तिमाशंक्योक्तं सत्यपि स्मार्त्तकर्मणामपि प्रत्यक्षवेदविहितत्वेन चोदकत्वेन प्राप्येतानि कर्मनिरूपणो
देशेन प्रवृत्ते त्वयी प्रवृत्तस्य देशपनिरूपणत्वेन स्मृतसदृशत्वाद्दर्शादिविध्यन्तस्यैवातिदेश इति स्थितः सिद्धमेतन्मन्वाद्याम्ना
नाद्यनुपपत्त्याहंति विध्यनुमानेऽपि न श्रुतविधेर्हतिनियमार्थत्वव्याघातः क्वचिदाम्नानं विपरीकुर्वतानुमानेनास्यै
व विपरीकरणसंभवादिति एतेनाकरणाकरणनिमित्तप्रायश्चित्तविध्योर्यथाक्रमं विधिनिषेधानुमापक
त्वसंभवेऽपि संध्यावंदनादिविधिब्रह्महत्यादिनिषेधानां वैयर्थ्यं निरालोचो ध्यः यस्मिन्नेव हि ज्ञानीयेऽधिकरणे
ग्रहणावेक्षणसमाजरणमंत्रवलाकूहणादिकं त्वैयतानुमानमुक्तं तत्रैव नमनेन सम्यग्जरणाभावे प्रायश्चित्ता

ज्ञानबलादपि सम्पादयितुरनुव्यक्तानुमानमुक्तं। तत्र यदि लिंगादिभिर्मन्त्रादिश्रुतपदस्वभावप्राप्यस्थितविधिभिर्नि
त्यानुमेया विधिनिषेधा अनुमीयेरन्। तदानींरेव प्रतिपन्नार्थाः इति विधिनिषेधाः समस्ता व्यर्था एव भवेयुः।
न च तेषां क्रशक्राशाबलं वचनेनापि प्रयोजनां तत्स्वकृतेऽशक्यं। अतो नानुमीयमाना अपि विधिनिषेधा न प्रत्यक्षेभ्यो भिन्ना
अनुमीयन्ते इत्यंगीकृत्यैवार्थवत्त्वमुपपादनीयमिति। अथ परिसंख्यालक्षणो न नाम्नैवेति पदाभ्यां शेषितो
विवक्षितो। उक्तशेषो उक्तशेषशेषिभावनिरूपकोऽयं विज्ञः उक्तनिमित्तभूतो। उक्ता अथ भूतो। अथ विध्युपाङ्गानुपाङ्गो।
अथ प्राप्त्यभाववर्णनीयो। न्यायः। शास्त्रं तावत्परिणीयासंतिष्ठतः इति शेषपरिसंख्यायामव्याप्तिः। अनेकस्मिन्शेषिणि एक
शेषप्राप्तिमपेक्ष्य प्रवृत्तो विधिः परिसंख्येति हि लक्षणं तादृशी प्राप्तिमपेक्ष्य प्रवृत्तेर्विधावेव संभवति न च प्रोक्ता विधि
स्तादृशाः। एकस्मिन्नपायणीया रूपशेषिण्यनेकशेषप्राप्तिमपेक्ष्येव प्रवृत्तत्वात्। न द्वितीयः तथैव दिशा प्राप्तिरुक्तलक्षणस्य
रूपस्याभिधानीमादतेर्दंडीपोषणं नन्वाहेति शेष्यंशपरिसंख्यायामव्याप्तेः न तृतीयः तथा सति हि शेषशेषिभावसंबंधे

भा०द्वा०
६३
63

नानेकस्मिन्नेकप्राप्तिमपेक्ष्य प्रवृत्तत्वं लक्षणमुक्तं स्यात्। तच्च संपज्जुहोतीति प्राप्तं जुहोतीति निमित्तपरि
संख्यायामव्याप्तिः। एकस्मिन्नग्निहोत्रेऽनेकजीवनानां यावज्जीवपदान्निमित्तत्वेन प्राप्तिमपेक्ष्य यं वि
धिः सायंप्रातःकालानवच्छिन्नजीवनानां निमित्तानां परिसंचष्टे न शेषशेषिभावसंबंधेन। तथा वाग्वा एषा पदैं
द्रवायवाः यदैंद्रवायवाग्रहा गृह्यंत इत्याश्रयांतरपरिसंख्यायामव्याप्तिः। अयं विधिर्हि सुक्ताग्रतादिकाम्यगुणप्र
तिधारग्रहा धारग्रहाणामाश्रयत्वेन प्राप्तिमपेक्ष्याधारग्रहनिवृत्तिं करोतीति न शेषशेषिभावेनान चतुर्थ्यं च भोशे
षांतरशेषत्वं नरपरिसंख्या स्वव्याख्यापत्तेः। ऐन्द्रहविष्षु तथा समिस्सर्वीकोदाहरणानां सग्रहसंभवादिति चेत्। सत्य
त्वं यथा पियदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान्ग्रहान्गृह्णीयादिति परिसंख्यायामव्याप्तिः। अनेन हि विधिना या
सु रथंतरसामकास्तु अतादृशीषु च विकृतिष्वैंद्रवाय वाग्र[illegible]ता याः प्राप्तिमपेक्ष्या रथंतरसामकविकृतिप्व
न्तस्या निवृत्तिं कुर्वन्परिसंख्यात्वमनुभवति न त्वंगासांमध्ये नैतद्विध्युपात्ता काचित्। एवं दीक्षाः सोमस्य दक्षिणाः सो

राम०
६३

मस्येति परिसंख्याविध्योरप्यव्याप्तिः। ङ्योति ह्येम विद्धति पुनरङ्गविकृति प्रचरीक्षादक्षिणस्य प्राप्तिमालोच्य
स्यथं विधिरङ्गविकृतिमपि तत्परिसंख्याकुर्यान्न चासामध्ये काचिदेतद्धि प्युयान्ना। अथोच्येत परिसंख्यालक्षण
वार्त्तिकगतानामान्तरन्यशब्दाभ्यां सर्वनामत्वेन निर्दिष्टत्वमिति निर्देश स्वभावाभ्यामपि न निर्दिष्टत्वमिति निर्देशाः संभ
वति चानिर्देशार्हस्याश्वाभिधान्यादेः सामान्यतो विशेषतो वाग्रागनिर्देशात। किंतु यथा सस्यदेवतेति सूत्रे सेति
सर्वनाम्नाग्रागनिर्दिष्टस्याप्यर्थादेर्विधित्सितनद्धितप्रकृतिशब्दार्थत्वेन बुद्धिस्थस्य तत्तद्धितान्तशब्दनिष्पत्तिकाले प
त्येकरूपेण परामर्शः। तथा निरूपणीयपरिसंख्यालक्षणघटकप्राप्तिविषयतावच्छेदकीनयाद्यत्वव्यावर्त्तनीयता
भ्यां बुद्धिस्थानामश्वाभिधान्यादीनां गर्दभाभिधान्यादीनां चतुर्दशाहरणे परिसंख्यातोपपादनकाले प्रत्येकरूपेण ता
भ्यां परामर्शः। ततश्च ग्राह्येषा वर्त्तनीयेष्वाप्तिमपेक्ष्य प्रवृत्तत्वं परिसंख्यालक्षणं भवेदिति ष्टसमपक्षोयुक्त इति चेत्तन्न
एवमपि अत्र त्येषावयन्तीति परिसंख्यापामव्याप्तेः। अनेन हि विधिना पवमानगतगायत्र्यादिभ्योऽन्यत्रावाप परिसंख्या क्री

भा॰ द्वा॰ पतेएतद्विध्यभावेचग्रात्याः सूक्तगायत्र्यादिष्वावायोनैवप्राप्नुयात् किंतुतद्भिन्नत्तोत्रीयस्यैवप्राप्नुयात्। तथाहि। अस्तु

६५ त्वावत्सामान्नामेवावायप्राप्तिवक्तव्या नवीन्स्र योग्यत्वात्। विहद्धूत्सोमककत्तुष्युवमत्सामकगर्गानयनेनैवत्तोमविहद्धेः

सामंज्ञस्यात्सामावाप्तेरेवनप्रसक्तिर्नतरांगायत्र्यादिषु। येषप्यप्राकृतसाम्नांप्रकरणादंगत्वमवगतंतत्रापितदीया

64 नांयोन्युक्तरर्वप्रकरणादंगत्वेवगमेनैवप्राकृतस्तुतेषांसाम्नामावापप्रसक्तिर्नतरांगायत्र्यादिषु। यत्कृत्वंगम्नूतानांत्व

प्राकृतसाम्नांयोन्युत्तरर्चोनोत्तरग्रंथगतप्रकरणपाठकृत्वंगत्वेनावगताः तत्रानिर्दिष्टावगतांगभावा कृतस्याम त्रा॰ १

कृतसा ... पाठमप्रसक्तावपिनगायत्र्यादिष्वृतस्त्रसक्तिः अंतेतुवादरायणाइति

न्यायेनमाध्यंदिनाभवयवमानांसतत्वयोरेवतेषुमज्जागतयोत्तत्त्वसक्तेः अत्रत्येवावर्यंतीतिविधिनातगायत्र्यादि

न्योन्यत्रावायपरिसंख्यायांकृतायालिंगायवर्तनतोत्रांगभावनिर्वाहायायप्यकर्तव्यसावायएवपरिशेषादेवगायत्र्या राम॰

दिष्वप्रप्तिरितिग्राह्यत्वावर्तनीयसावारणीभावायप्रसक्तिमपेक्ष्यप्रवृत्तत्वाभावाद्गुक्तविधावव्याप्तिः। नत्वनोक्तलक्षणो ६४

भुक्तं रूपणा निसंगयं नेतथादिशायं ताभ्राय णीया संतिष्ठत इत्यत्र तावत्की दृशी परिसंख्यां भवतो मिश्रेताय स्यां प्रथमलक्ष
णा व्याप्ति रूपस्य स्नान नावकाशं नांगरी जिविधिम गीहस्थग हमेधीयाऽप्यभागा विधिवत्फलत परिसंख्या दाशमिकाधिकरणा
विरोधात्। तत्र हि मैत्र हि धिनातं दृतांगरी तिर्विधीयते वाक्याय विधेरप्यभावात् किंतु शांयुषाकानंतरकालीनः संपूर्वकति
ष्ठत्यर्थो विधीयत इति सिद्धांतितं। अत एव नशाह परिसंख्या पिवाक्यीय विध्यपेक्षयादौ पत्नीसंयाजांगीकारस्याप्युक्तत्वमतश्च
न च संपूर्वक तिष्ठतेर्गांगाम्नास्याग वाचीति स्तोत्रस्यैवेषा परिसंख्या। अत्रेत्येवावयंतीति वदितस्य पिशं कांउद वत्तायस्संस्थाप्येत न
यो तुल्यार्थत्वे पृष्ठशमनीयवदेकाहस्याप्यनंगतापत्तेः। संस्थिते संस्थिते हविनीसादेःपत्तु कामउक्थ्यग हतोयादिवचो मू
लके उक्थ्ये संस्थोऽग्निष्टोम इत्यादिव्यवहारे संपूर्वकतिष्ठतेः समाप्तिवाचित्वेन प्रसिद्धत्वाच्च समाप्तिस्तु परमापूर्वोत्पत्ते
यावत्स्वेतरांगं प्रतीक्ष्य पदार्थात्मिका वाऽसंभवत्संकल्पविशेषात्मका वेत्यन्यदेतत् सर्वथापि तावदत्र नापाम्नायाः शंयु
वाकुकालीन समाप्तेर्विधिरपूर्वविधिरेव वक्तुमुचितो न परिसंख्या हं ति विधोदलनादि निवृत्तेरिवेहांगांतरनिवृत्तेरानुवं

भा०सू०
६५
65

मिकत्वादतः कथं मंत्राप्राप्तिः किंच रथ्यानादंडविध्योः शेष्यंतरपरिसंख्योक्तिः साप्ययुक्ता यथैव हि अपूर्वविधिनियमविधिभ्यां
कयोरप्युद्देश्यविधेययोः संबंधबोधयद्भ्यामपि विधेयप्राप्तिनियमाभावेव फलत्वेन स्वीक्रियेते उपपादितं चेतत् तथा परिसं
संख्याविधिनाप्युद्देश्यविधेययोः संबंधं निवर्त्तयतापि विधेयनिवृत्तिरेव फलत्वेन स्वीकर्त्तुमुचितेति गर्द्दभाभिधान्यादेर्मंत्रादिनि
वृत्तिरेव विधिफलत्वेन वक्तुमुचिता। न चेह द्वितीयलक्षणाव्याप्तिरपि एकस्मिन्नार्द्दभाभिधान्यादाने शेषिणि मंत्रस्य च प्र
सादेश्चानेकशेषस्य प्राप्तित्वेन यथोक्तलक्षणस्यासंभवात् यथा च सायं जुहोति वाग्वा एकेति विध्योर्व्याप्तिः। सा विना
काम्याग्निहोत्रे नियमार्थत्वेन संभवतो विधेः परिसंख्यार्थत्वायोगात् हंति विधिनाहलनादिनिवृत्तेरिव निमित्तांतरे निह
ते रमुनानुषंगिकत्वेन संभवात् अश्वाभिधारयागृह्णातीति विधिनेव संनिहितेनाग्रता काम्यविधिष्वधारोग्रहयोराश्रयत्व
निवृत्तिसंभवेन वाग्वेसादेरपि परिसंख्यार्थत्वासंभवात् यथा च मे वानयोः परिसंख्यात्वं तथोपपादितं फलसांकर्यखंडने	रा०म०
नापि यदि रथंतरसामा सोमः स्यादितिरीक्षाः सोमस्येति विध्योरव्याप्तिः। प्रकृतावेव संभवत्प्रयोजनयोस्तयोर्विकृतिपरिसं	६५

त्वार्थत्वकल्पनायोगात् विकृतिपरिसंख्यायाश्चानुषंगिकत्वसंभवात् तथाहि क्वचिद्दूषंते दैवाद्बृहद्रथंतरामित्रार्त्विंगला
मे स्तोत्रविध्याश्रिमय। किंचित्सामकपृष्ठविशिष्टं निरस्यो ज्योतिष्टोमप्रयोगं परिकं श्चिकुर्यात् तस्मात्स्य योगात्साठप्राप्तापार्थ इवा
यवाग्रतायाः परिशिष्टं स्वार्थं यद्दिथंतरे सामद्वि विधिर्भेमिन्निकृतां बोधयति। अस्ति च तत्प्रयोगे यातज्ज्योतिष्टोमव्यक्ता विवधुपा
तायां रथंतरसाम कल्पयक्ता वपिपाठादेरवायवायतृप्राप्तिरिकं थमव्याप्तिः। तथा दीक्षादक्षिणासांगप्रधानार्थत्वेकस्य चिदा
दुपकारिणः सोमां वास्य दीक्षाकाले कर्त्तव्यस्यदेवादवभृथपर्यंतविस्मृतस्यावभृथोत्तरमनुष्ठानायाश्वावेश्मवेस्या दिवि
धिना दीक्षा संपादनीया स्यात्। अपसध्ये चाह निर्देवादयगतानां सोमर्त्विजां सुसातंमनसमये संनिधाय वरूपं भाविता निर्णये
संतिरेक्षप्रयोज्यानां स्वतंत्रर्त्विजामानत्येढार्दशशतं देयं स्यात् तदुभयं यनिवृत्यै दीक्षादक्षिणासांगार्थत्वनिवृत्तिः। क्रीय
तदीक्षासोमस्य दाक्षिणाः सोमस्येति। उपपादितं चैतत्त्वस्मल सांकर्यत्वं डुने। अस्ति च सोमांगेष्विव सोमाख्ये विधुपाने विशे
षितोतत्स्यामि दितिकथमव्याप्तिः नाप्यत्रहोवावर्ष्यतीस्यत्राव्याप्तिः। यद्यपित्रिष्टुवगतीछंदस्कयोःस्मस न्नसाम्नां माध्यंदिना

ऽं विषमवमानगतं छंदोन्यत्र । भिन्नछंदस्का— त्तु तत्त्वं न साम्नाचाते नुवादरायणा इति न्यायेनां सन्न चयोर्देवं साम्नास्तिः त
भा द्वा॰ थापि गायत्री हहस्तनुष्टुछंदस्कयोस्तत्त्वं न साम्नां वैकृतानां कचित्साहतर्थ्यावायेप्राप्तेः स्वरचयोर्नेप्राप्तिः । यथा
६६ म्नातसाम्नोर्थ्याप्राप्तत्तो त्रसाधनभावस्य शास्त्रावगतस्य न्यायवशेनान्यथात्वकल्पना । याअनो चित्सात् । योनि
66 भिन्नछंदस्कर्ष्टुचसंज्ञा । विलेशवशेन नत्वन्यथाभावस्यावष्यंभावात् । संति च द्वादशांहांतर्गतदशरात्रस्य दश
मेहनि गाहशसाम्नां विषयः आजिगं भवत्याभीकं भवत्युत्सेधो भवति उत्सेधेन वै देवाः पशूनुदसेधन्निषेधेन पर्य
गृह्णन् तदुत्सेधनिषेधौ पशव्यायतियमिति । तत्राजिगस्यत्वाद्दिष्टयेति गायत्रीयोनिः । आभीकस्यो त्वाज्जातमिति
गायत्र्येव । उत्सेधनिषेधयोस्तु बृहत्योनिः । यवत्वदेववीतय इति । न चैषां योनयः उत्तरा वोत्तराग्रंथे ऽस्याहुः प्रकरणोप
ठिताः । अत एवोहग्रंथे आजिगाभीकयोः प्राकृतगायत्रतृचे उत्सेधनिषेधयोश्च प्राकृतबार्हततृच एवोहो दर्शितः राम॰
। न चेद्दशसाम्नामसत्त्वविध्यवस्थापकं कस्मिंश्चिदृचने त्रैष्टुभजागततृचयोः प्राप्तिः संभावयितुं शक्यते अथोच्येत सं ६६

शरविलेशं तंगीकारेणापि साम्नः स्तोत्रसाधनत्वात् यानासंगतं शास्त्रबाधः। अस्य तु चयोर्निवेशाभावे तु तत्स्थानापकृन्याय
स्यांसंगतवाधः स्या तु न चैवं ब्राह्मणेनोपपन्नावस्थंतवाधः स्वीकर्तुमुचितः अतः साम्नामपि संशरविलेशप्रसंगो न स्यात् च
योरेवागं तु साम्नां निवेशः स्यादिति नेतत् न्यायवशेन शास्त्रगोचरे ब्रह्माधस्याप्यन्याप्यलात्। अत एव पंचमे शाब्द
लोकं पृणायात्तस्याः संपूरणार्थत्वादित्यधिकरणे लोकं पृणाछिद्रं पृणेति मंत्रानुमेयस्यापि चित्यंतरेष्वावकाश
स्यापि लोकंपृणेष्टकापूरणार्थत्वविधेरनुरोधेनांतेनुवादत्वायत्तत्र तिन्यायं वाधित्वोपानुनाकाकांडपठितप्रत्यक्ष
श्रांस्य एव विहितानां चित्रिणीपादीनां मध्यमायां चितेः शालोकंपृणाया निवेश उक्तः। नत्वमध्यमचितिमात्रे लोकं
पृणानेतः प्रायपत्येन्यायस्यानुरोधेन पूरणार्थत्वविधिं चित्यंतरविषयं स्वीकृत्य लोकंपृणानां तन्निवेश स्वी
कृतः अतो गात्रयवमानगतगायत्र्यादिषु प्रस्तोत्वकदाचिदावापः प्राप्नोति रित्यनारभ्याधीतेनात्रत्ये वा वयंती
ति विधिनोक्तगायत्र्यादिषु स्तोत्रांतरीयर्क्षु चावापः प्राप्तिमात्रमालोच्य संभवस्येव स्तोत्रांतरीयर्क्षपरिसंख्योत्था

दिभक्षणपरिसंख्यावत्एवं च सकलोक्तदोषपरिहारेपि बहुलदूषणोपसंभावितो दाहृशां तत्प्राप्यकत्वाभि
धायदि सम्ममैवागीक्रीयते न तु तत्रापि कश्चिद्दोषइति चेत्।नैवं यथा ह्येष्वावर्जनीये च प्राप्ते सति ग्रहणमात्रे ल
क्षणां विवक्षितं उत्तरत्र तु विशेषणत्वेन नित्यत्वमपि लक्ष्यते नियम्यते अयथावा समुच्चितत्वं तद्विशेषणत्वेन त
त्र निवेश्यते। नाद्यः प्राप्त्यहंते व्यावर्त्यविहलनादेः स्वप्राप्तिमपेक्ष्य प्रवृत्ते हतिविधावतिव्याप्तेः न द्वितीयः पंचपंच
नखा भक्ष्या इत्यत्राव्याप्तेः। शशादीनां श्वादीनां भक्षणस्य नित्यप्राप्त्यभावात् तृतीये तु यद्यपि नोक्तदोषो हन्ति वि
धौ श्राव्यावर्जनीययोः परस्परविरोधेन समुच्चित्यप्राप्त्यभावात् शशादिश्वादिभक्षणयोश्च समुच्चित्यप्राप्तिसं
भवात् तथापि षडहा भवन्ति चत्वारो भवन्ति शतो भक्ष्यं भवति सर्वोऽस्मिन्निदितिविधिष्वतिव्याप्तेः। केषुचिदहःसु
षडहविध्यन्तः परेषु च्छन्दोमविध्यन्त इत्येवं विध्यन्तद्वये समुच्चित्यप्राप्ते च्छन्दोमविध्यन्तविषयेपि षाडहिकविध्यन्त
प्रापणमाद्यवाक्यद्वयेन क्रीयते। शतं संभोहगीतो प्रतिदशामाधोत्तमाहोर अग्निष्टोमसंस्थामध्यवर्त्तिश्वष्ठसु तू

न्यसंस्थेष्वेवं संस्थाद्वयेयमुच्चितसप्राप्तेऽग्निष्टोमविषयेषु क्रत्वसंस्थाप्रायणं मध्यमेन क्रीयते। अग्निष्टुदाद्येकाहे बहि
ष्पवमाने त्रिवृत्स्तोमस्तोत्रान्तरेषु तत्स्तोमान्तरप्रणीत्येवमनेकस्तोमेषु समुच्चितसप्राप्तेषु स्तोमान्तरविषयेऽपि त्रिवृत्स्तोम
प्रायणं मध्यमेन क्रीयते। अतोऽप्राप्तप्रापकेष्वपि लक्षणागमनादतिव्याप्तिः न च विकल्पत्वसमुच्चयस्याप्यवान्तरकार्यैक्य
एव वक्तुमुचितत्वात्स्वक्रतोदाहरणेषु चाहर्भेदेन स्तोत्रभेदेनावान्तरकार्यभेदात्कथं समुच्चितप्राप्तिर्व्यवहर्तुं शक्येस्य
पि शक्यं। अवान्तरकार्यभेदेऽपि परमकार्यैक्यमात्रेण समुच्चयोपपत्तेरवश्यवक्तव्यत्वात्। अन्यथाऽऽज्यभागप्रयाजादी
नामवान्तरकार्यभेदेनाज्यभागौ यजतीति गृहमेधीयस्य परिसंख्याविधावव्याप्तेः। एवमनेकदोषाणां समुच्चितप्राप्त्या
तिव्याप्तिर्दर्शिता अव्याप्तिं चानेकदोषिणामपि तादृशशास्त्रातिव्याप्तिः। तथा सत्रब्रह्मणोदेयः सर्वे ब्रह्मणो परिहरन्तीति। एणावाश्च
सोमचमसहविःशेषेषु ब्रह्म — दिजर्त्विजां समुच्चितप्राप्तोप्रसामृत्विगन्तरविषयस्यापि ब्रह्मसंबन्धप्रायणार्थत्वादेषां। ए
वमप्राप्तप्रापकेष्वतिव्याप्तिर्दर्शिता अत्र पक्षप्राप्तविषयेष्वपि सा। यथा पत्नीसंयाजान्तान्यहानि संतिष्ठन्त इति। चतुर्जुह्वां

गृह्णातित्रयाजेष्वत्तदितिचा। आद्यविध्यभावे पत्नीसंयाजानां तानांतदुपरितनाच कदाचित्समुच्चितस्य प्राप्तिः स्यात्।
द्वितीयविध्यभावे प्रयाजानामितरेषां च जोहवाऽपेक्ष कदाचित्सत्वात्। अथ निष्कृतिफलकत्वमुक्तलक्षणोधिकं योऽप
ने। अत उक्तविधिषु केषांचित्प्राप्तिफलकत्वात्केषांचिन्नियमफलकत्वान्नातिव्याप्तिः। आत्यंता वर्ज्यो योऽर्थः सजातीयेन सं
बंधेन प्राप्तत्वे विवक्षणीयं तथा सन्निदीक्षितो न जुहोतीत्यत्र सत्यपि निवृत्तिफलत्वे सत्यामप्यग्निहोत्रहोमस्य कृत्वर्थहो
मैः सहैकस्मिन्प्रयोगे तन्मात्वप्राप्तौ नातिव्याप्तिरिति तद्वारणार्थत्वान्न विशेषणवैयर्थ्यं। यद्यप्येवमपि न हिंस्यात्सर्वा भूतानीत्या
दौ नातिव्याप्तिनिवारणं पुरुषार्थहिंसादेः पुरुषार्थभोजनादिभिः सह समुच्चितस्य प्राप्तौ सत्यां हिंसादिनिवृत्त्यर्थत्वात्। तथा
प्यपि नित्यत्वावस्थानाप्राप्तेति विशेषणान्न निवृत्तिः। यस्मैहि रागतो हिंसायां प्रवृत्तस्य हिंसानिवृत्तेरपि पक्षे प्राप्तिः। न तेनापि पक्षे क
रोति नातिप्रसंगेऽपि नं गृह्णातीत्यादेरपि निवारणसंभवात् लक्षणं तन्मात्र एवं सामीक्रियत इति चेन्न। एवमपि पुरुषार्थ
संध्यावंदनादिभिः सहाग्निहोत्रस्य समुच्चितस्य प्राप्तिसंभवं नदीक्षितो न जुहोतीत्यत्रातिव्याप्तितादवस्थ्यात् संभवश्चा

दार्चित्कशान्तिकाम्बादिभक्षणनिवृत्तिं कुर्वन्ति विधावश्याश्च अथ निवृत्तिफलकत्वमेव लक्षणं तदुपलक्षणार्थं तत्र
चान्यत्र चेति वार्तिकं। निषेधास्तु सर्वे परिसंख्या एवेति नजेषु तिव्याप्तिरिति चेन्न। न। अग्निहोत्रादिकरणानिवृत्ति
फलकौ। अग्निहोत्रं जुहोतीत्यादिविधावतिव्याप्तेः। न च तत्र वान्यत्र प्राप्त इति शङ्कांशो नापि तत्परिहारः। यामगमना
यकरणेन सहाग्निहोत्रादिकरणस्य समुच्चितस्य प्राप्तिसंभवात्। अथाभावैकस्वभावनिवृत्तिफलत्वं विवक्ष्यते। त
थाप्यतिनिषेधमुखप्रवृत्तपरिसंख्याविधावव्याप्तिः तस्याभावरूपनिवृत्तिफलकत्वादिति परिसंख्यालक्षणमयु
क्तमिति। ननु तत्र वान्यत्रेति शब्दाभ्यां यागस्य यावदंशस्याभिधीयेते इति तावदुक्तं प्राक्। तत्र यथा ऽव्यावर्त्यस्यैव प्राप्ते
सति प्रवृत्त इति लक्षणं यस्मिन्विधौ नेयं तद्विधिनिरूपितमेव शास्त्रत्वं व्यावर्त्यत्वं च तत्र प्रतीयते। उचितं चेदृशमेव सहृ
दययोक्तिर्व्याख्यानं। तत्र शास्त्रपदेन लक्ष्यभूततत्तद्वाक्यशाप्यो यथाश्रुतवाक्यार्थ एवोच्यते व्यावर्त्यपदेन च तत्तल्लक्ष्य
शास्त्रफलभूतनिवृत्तिप्रतियोग्यभिधीयते· एवं च स्वफलीभूतनिवृत्तिप्रतियोगिनि स्ववाक्यार्थे प्राप्ते सति प्रवृत्तं शा

त्वं परिसंख्येति सिद्धं लक्षणेन तावदपूर्वविधिषु नियमविधिषु चातिप्रसंगः तेषां स्वफलीभूतनिवृत्त्यप्रसिद्धेः अत्र
तश्चात्र निवारणाय श्रुतार्थिकस्य निवृत्तिफलकत्वस्यानपेक्षणात् द्विवक्षाप्रयुक्तं श्रुतवैयर्थ्यापादनदूषणायास्तां ना
प्यपूर्वनिषेधेषु नियमनिषेधेष्वग्निहोत्रादिविधौ चातिप्रसंगः ज्ञाप्यवाक्यार्थस्य तत्र दृष्टानिष्टसाधनतात्मनः प्राप्त्यभा
वात्। अपि च परिसंख्योदाहरणेष्वाख्यातस्य स्वाभिधानीसंबंधादेर्निवर्त्यस्य धात्वर्थांतरसंबंधादेः प्राप्तिरिति नातिप्रसंगदो
षोपि। स्यातां वापि स्वीकार्यव्यावर्त्यवर्जनीये आख्यव्यावर्त्तसंपदाभिधेये। तथापि संख्यामात्रावगत्युभयप्राप्तिनिमित्तकत्वं
शास्त्रप्रवृत्तेर्गम्यं तेपरोद्देश्यप्रवृत्तेश्च पराथ्येन प्रसिद्धत्वात् सापार्थ्यविशेषात्मकत्वाच्च तात्पर्यस्य तत्र चान्यत्र च प्राप्ते
प्रवृत्तमिति प्रवृत्तिपदस्य तात्पर्यपरत्वाभ्युपगमेन तदुभयप्राप्तिनिमित्तकतात्पर्यकत्वं लक्षणं बोध्यं तन्निमित्तकत्वं च
तन्निर्णायकत्वं तत्रश्चाख्यातस्य व्यावर्त्योभयप्राप्तिनिर्णायकतात्पर्यकत्वरूपे लक्षणे सिद्धे न तावदपूर्वनिषेधेषु नियमनिषेधेषु
चातिप्रसंगः॥ तदीयतात्पर्यस्य तत्तदर्जनविषयस्य व्यावर्त्यप्राप्त्यधीननिर्णयत्वेपि आख्यप्राप्त्यधीननिर्णयत्वाभावात्। ना

पि हंसादिविधिषु तत्प्रसंगः तदपि तात्पर्यस्य नियमगोचरस्य ग्राह्यहंसादिपाक्षिकप्राप्त्यधीननिर्णयत्वेपि व्यावर्त्ये
प्राप्त्यनपेक्षत्वात्तस्याः अपि रजतादिप्राप्तेर्हंसादिपाक्षिकप्राप्तिसंपादनेनान्यथासिद्धेः। अतो भार्यामुपेयादित्यस्य
थात्स्यपाक्षिकप्राप्तिमात्रेण नियमपरत्वाच्चानापि षडहा भवंत्यग्निहोत्रं जुहोतीत्यादावपि प्रसंगः तदीयतात्पर्य
स्य जन्नत्रायणविषयस्य तन्नरपशास्तिमात्राधीननिर्णयत्वेन द्विविधप्राप्त्यनपेक्षत्वात्। परिसंख्यामूलविधिनिबंधे
पंचग्राह्यत्वाभिमतशशादिभक्षणादेर्व्यावर्त्यत्वाभिमतश्वादिभक्षणादेश्च प्राप्त्यभावे श्रुतार्थतात्पर्याबाधेनाश्रुत
निवृत्तितात्पर्यायोगादस्यैव द्विविधप्राप्तिनिर्णीयतात्पर्यकृतत्वं श्रुततात्पर्यगोचरीभूतोपि चार्थाश्वाभिधाद्युदाहरतो ना
त्पर्यगोचरीभूतनिवृत्तिप्रतिपक्षपायत्वेन ज्ञाप्यते न ज्ञाप्यते च पंचनखोदाहरणादित्यन्यदेतत्। अतः संभवत्येव परि
संख्यालक्षणमिति चेन्न अत्रस्थेवावयंतीत्यत्र द्विविधलक्षणास्याप्याप्तेः। तत्राप्यस्य स्तोत्रांतरीयगाधिकरणकायाय
निवृत्त्यात्मनोऽर्थस्य प्राप्त्यभावात्। न तद्गोचरतात्पर्यनिर्णयस्य द्विविधप्राप्त्यनधीनत्वात्। यद्यपि बहिष्पवमानगतगायत्र्या

मा॰ द्वा॰
७०
70

द्विधाबाधायोनप्राप्तः स्यात्तथाप्येवकारसामर्थ्याद्भवेदेव निवृत्तिपरत्वमस्येति न कथंचित्परिसंख्यालक्षणोपप
त्तिरित्यत आह तूभयस्येति ययोर्यादृशसंबंधो निषेध्यत्वेनाभिप्रेतस्तदन्यतरत्तदन्यत्वोभयपदार्थः। तादृशसंबं
धनिरूपकत्वेन प्रतीतिश्च प्राप्तिः। विधिफलभूतया व्यावृत्तिपदवाच्यया निवृत्तिप्रतीत्या नियतैककालत्वमेव
वतादृशप्राप्तेः प्रसक्त्याभिविवक्षितं न तु पूर्वकालतामात्रमिति ज्ञापनार्थोऽपुग पछ हृ४। तदन्यतरतदन्यनिरूपित
तादृशसंबंधप्रतीतिर्निवृत्तिफलक इति वाक्यार्थः। तादृशोभयनिरूपितादृशसंबंधावगाहिनिवृत्तिप्रतीतिफल
क इति तु निष्कर्षः। मंत्रेणाश्वाभिधानीमादधान्न गर्दभाभिधानमपीत्येतादृशप्रतीतेः परिसंख्याविधिफलभूतायाः
सर्वत्र तादृप्यसंभवान्नाव्याप्तिः। नाप्यपूर्वविधिनिषेधेष्वतिप्रसंगः। यतस्तत्फलभूता निवृत्तिप्रतीतिर्ययोर्यसंबंधं
निवर्त्यत्वेनावगाहते अवगाहत एव यद्यपि तं तदन्यतरनिरूपितत्वेन तथापि न तदन्यतरान्यनिरूपितत्वेनावगाहते।
अश्वनयनकर्तृत्वं मीमांसामानपेक्ष्यादौ फलभूता निवृत्तिप्रतीतिर्यद्यपि तदन्यतरान्यनिरूपितत्वेन तादृशसंबंधमवगा

एम॰
७०

हते। तथाविनाशेन तदन्यतरनिरूपितो विभागो मन्मा गामानयत्यादौ फलभूता निवृत्तिप्रतीतिर्यद्यपि नादृशो म
यनिरूपितं संबंधमवगाहते तथापि नाशेनादृशः। यथोर्व्रीहिदलनयोः संबंधो यादृशो निषेध्यः तदन्यतरव्रीही
णां तदन्यतरान्वयेन हंतिना संबंधमवगाहमाना प्रतीतिर्यद्यपि हंतिविधेः फलं भवति तथापि नाशो दलननिवृत्तिप्रती
तिफलकः। यद्यप्येषविधिरग्निहोत्रविधिश्च विधेयाकरणानिवृत्तिप्रतीतिफलको भवत्येव तथापि यादृशोऽकरणा
पुरुषयोः संबंधो निवर्त्यो नैव तादृशसंबंधस्तदन्यतरतदन्यनिरूपितत्वेनावगाहते अवगाहेत हं सकरणां पद
करणेन समुच्छिस्यमानं तदकरणं यदि विध्युपायं स्यात्। यथोर्यादृशः संबंधो निवर्त्यस्तस्य चोद्देश्यभागे विधिप्रयोज्य
त्वेन या निवृत्तिर्विवक्षिता विधेयदलांतर्गतनिवृत्तिपदेनाभिसंबोधकेन निवोध्या। यद्वोद्देश्यदल एव तस्य निवर्त्यत्वं स्वफ
लीभूतनिवृत्तिप्रतियोगित्वमेव वाध्यं तेन दलं न न निवृत्ति हस्य कारणानिवृत्तिं वा साधयन् हंतिविधावतिप्रसंगः। अस्यान
यनकर्त्तर्मी गामानयेत्यत्रानुपयानयनव्यक्तिरेकैव निर्द्देशवृत्त्यालंवनं तदा परिसंख्येव निर्द्देशवृत्त्यालंवनभूतानयनव्यक्ति

मा॰ द्वा॰ ७१ मेदेऽनुनैवपरिसंख्यो। एकत्रोभयोः प्रसक्तौ चैकस्यप्राप्त्यपेक्षनिवृत्तिफलकत्वाभावात्॥ नादृष्टानिवृत्तिफलकत्वस्ये
वलक्षणतावच्छेदकत्वात्तन्न च तत्रातिप्रसंगः। तत्फलभूतायानिवृत्तिप्रतीतेस्तदन्यतरनिरूपितसंबंधानवगाहित्वादि
तिबुधीनिरूढ्यं सामान्यविशेषबलाबलवच्चापूर्वनियमविधिबलाबलस्यापिलोकवेदसाधारण्याप्रसिद्धेः किंकापदेषु
जातिवाचित्वादिविवेकवल्लौकिकविषिष्टपूर्वविधित्वादिविवेकोपिनात्रचित्तत्वेन शक्यः। अस्ति चात्रत्येवावपतीत्य
नाप्युक्तलक्षणां यवमानगतमायआदिष्ठुआवायः कार्येनान्यत्तोत्तीयर्द्विनिविधिफलभूतप्रतीतेस्ताद्रूप्यात्तानु
नाक्ष्माद्वाकाद्युक्तविषप्रतीतिः संभवति तथाहि नतावदन्यत्तोत्तीयर्गाधिकरणकावायनिवृत्तित्वेन निवृत्तेरेवकारवाच्य
त्वात्ताट्टशप्रतीतेर्निर्वाहः सर्वप्रयोगेषु एवकारस्य तादृशानिवृत्तित्वप्रकारकप्रतीत्यजनकत्वात् अथान्यव्यवच्छेद
मात्रमेवकारार्थाच्चं अन्यत्वस्यपवमानगतगायआदिनिरूपितत्वं अन्यत्वाश्रयस्यत्तोत्तीयर्गात्मकत्वमावायेत्तरधि रा॰म॰ ७१
करणकत्वं सर्वेतदन्यलभ्यमितिचेन्न यतोऽन्यत्वस्यगायआदिनिरूपितत्वं समभिव्याहारलभ्यं वाच्यं न च तत्संभव

71

त्तिगायत्र्यादीनां स्वपदोपात्तकारकोपसर्जनतयाऽन्यत्वस्य स्वपदोपात्तार्थान्तरोपसर्जनतया मिथोऽन्वयायो
ग्यत्वात्। अत एवान्यत्वाश्रयस्य स्तोत्रीयगीत्यकत्वमपि नान्यत्वमध्यंदिनपवमानगतगायत्र्यादिनिरूपित
मन्यत्वं निमित्तीकृत्य कंचिदर्थं प्रतिपादयेदेवकारः। तदा ताभिः सदृशीः स्तोत्रान्तरीयर्च एव प्रतिपादयेत्। समा
नमितत्वच्छेनेनेतरशाब्दविषयाद्वार्त्तिककारोक्तन्यायात् नाप्यधिकरणत्वस्यान्वेतिसमभ्युक्तस्यात्वर्गान्वयः स
मभिव्याहारलभ्यः संभवति। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्। अन्यविशिष्टव्यवच्छेदवाचिनैव
कारेणोपसर्जनतयोपस्थापितस्यान्यपदार्थस्य समभ्यर्थान्वयायोग्यतात्। अथैवकारस्यान्ययोगव्यवच्छेदे चाश
क्तिर्भवतु न तु विशिष्टे। अत एवकारोत्तरस्तु समभ्युपस्थापिताधिकरणत्वेनैवकारोपस्थितान्यान्वयाभ्युपगमद्भव
त्या वापेन्यर्थाधिकरणकत्वलाभः। यद्यप्येवकारसमभिव्याहारात्तत्प्रातिपदिकार्थस्य स्ववृत्तित्वेनैवान्वयो दृष्टस्तथा
पि तत्समभिव्याहारे स्थलान्तरे वैचित्र्येण प्रातिपदिकार्थस्य सगुणप्रकारकत्वेनैवकारोपस्थापितान्येनचान्वयात् संभवसन्

मा द्वा. त्वस्य पचमानगतगायत्र्यादिनिरूपितत्वलाभः। यद्वा तच्छब्दस्य बुद्धिस्थधर्मप्रकारकबुद्धिजनकत्ववदेवकारस्यापि
७२ बुद्धिस्थधर्मावच्छिन्नान्यत्वबोधकत्वान्न लाभः। भवतु चैवकार एव त्वया चेन्यत्वसमभिव्याहृतगायत्र्यादिनिरूपितत्वस्य
लक्षणया बोधकः। एवकारस्थलीयसमस्यज्ञिवैचित्र्याद्युगपच्छ्रुतस्योपस्थितिरपिनासंभवती। अतः संभवत्युक्तप्र
72 तीतिनिर्वाह इति चेत् भवतु नाम तत्कथंचिदेवमेवकारोपस्थितेनान्यत्वेऽपचमानगतगायत्र्यादिनिरूपितत्वलाभः। तथापि गा
यत्र्याद्यमाधिकरणकावायकर्त्तृत्वतोपस्थितिमपेक्ष्यैनेवकारस्यावच्छेदबोधकत्वं संभवति। न हि पदानां विरम्य व्या
पारः संभवति न च तमन्तरेणान्यात्मकैकार्थबोधयितास्य पदान्तरालोचनतदुपेनार्थान्तरान्वयेन सिध्यं तंविशिष्टावा
पबोधं प्रतीस्पव्यवच्छेदात्मकार्थान्तरबोधकत्वमेवकारस्य संभवति। कथं तर्ह्येवकाराद्यवच्छेदप्रसिद्धिरिति चेत्। अस्व
रणं यथैवप्रव्याद्युपसर्गाणां मेमाउनजीडोदिप्रतीतिदर्शनेऽपि प्रहारादिविहारादीनां तादौ न जाउनजीडादेरूपसर्गार्थत्वं क राम.
ल्प्यते प्रत्ययानां च कस्यचित्स्वार्थबोधनतायामव्यस्थितिसिद्धायां बाधापत्तेः किंतु धातोरेव प्रसिद्धार्थत्यागेन जाउनजी ७२

डादौ प्रत्यादिसोऽसौ शक्तिः स्वीक्रियते तथैवकारसमभिव्याहृतस्य पदस्य स्वार्थमात्रयोगे च स्वप्रसिद्धित्यागेन स्वार्थान्ययोगो
चरणशक्तिरेवकारस्योत्सर्गिकी कार्या एवकारेण च तत्रैवम्प्रवच्छेदमात्रं बोध्यते । न चोक्तप्रत्यादिवर्यान्तकत्वेनैवोपस्थापनात्
नार्थबोधकत्वमेवकारस्य स्यादित्यपि शक्यम् । उपपूर्वकणोऽत्सिष्टति न यस्योर्मत्रकरणाचार्यकरणाभिधयत्वं द्योत
यता प्यात्मनेपदेन भावनाद्यर्थबोधनात् । जनतश्चात्रत्ये वाचयन्तीत्यचैतस्याभिकरणकाबापेन कार्यं इति बोध्यावि
नैवप्रयुक्तस्य तरकस्यानन्तविनैव च पदस्य विरम्य व्यापारस्तुपपन्नः । एवं चैतदधिकरणकावायपत्नीत्यनुदयात्सम्भव
स्यैवकाम्यनङ्गीचरविधिशक्तिप्रतिबन्धकत्वयवहारः ततश्चैतद्विषफलम्नृजायानिवृत्तिप्रतीतेस्तादृशसम्बन्धावगा
हित्वाभावादस्यां परिसंख्यायां लक्षणाव्याप्तिरिति चेन्न । एवकारसमभिव्याहृतपदस्य स्वार्थान्ययोगे चरणशक्तिरेका एव
कारस्य तद्योतनशक्तिर्द्वितीयान्तस्यैव व्यवच्छेदशक्तिस्तृतीये तिशक्तित्रयस्य त्यनेऽग्निगोचरस्वानात्मत्रविवृद्धिप्राय
कशास्त्रैकप्रमाणकावायस्यैवकारेण तत्रैवव्यवर्जनबोधने मीमांसकमर्यादया विकल्पापत्तेश्चात हि किमेवकाराणपरि

भा॰ द्वा॰
७३
73

संख्यासिद्धिरिति चेन्न सर्वोपन्यस्तदोषपरिहारेण प्रकारांतरस्य संभवात् । तथा हि एकारेण द्वावन्योन्याभावोपस्था-
प्येते पुष्पवंतपदेन च सूर्यचंद्रौ शक्यतावच्छेदकशक्यतावच्छेदकयोर्भेदे च न शक्त्यनेकत्वशंकावकाशः । यस्य द्वार्थी-
न्वितार्थबोधनपरस्यैवैकारस्य तत्पदगतप्रकृत्यर्थविभक्त्यर्थनिरूपितावेवत्तोपस्थाप्येते । यद्यपि प्रकृतिविभक्त्योर्य-
थासंख्यं विभक्त्यर्थक्रियान्वितार्थप्रतिपादकत्वमेवास्ति तथैव वस्तुस्थितेः । तथाप्यन्यार्थामपि विशिष्टेणोपस्थिति-
मपेक्ष्य संभवत्येवकारस्य नत्वप्रतियोगिविशिष्टान्यत्वबोधकत्वं चेत्तथा यान्यस्मैव देहि चेत्यादन्यस्मा त्वग्रहाणसमा-
नमितरच्छोनेनैतस्या देवलोकवेद्योरन्यत्वबोधकशब्दमात्रेण तथाविशिष्टप्रतीतिजनकतायादृष्टत्वान्नाभिनवस्तुत्व-
त्रैवैवकारैकस्यनापत्तिः ससंबंधिकार्थबोधकपदमात्रे चेत्स्वविशिष्टधीजनकत्वमनुभूयते । तुल्येपि हि केपपर-
भारत्नयोरेकहायन्युपसर्जनकप्रतीतिजनकत्वेपरेकहायन्याः पदानंगत्वेन चानन्वयनस्यापदार्थयुक्तत्वं तत्रेदमेव ग॰ म॰
बीजं । यत्रार्थमेकहायन्युपस्थितिमपेक्ष्यपदस्य त्वस्य विशिष्टबोधकत्वात्तनोन्यत्वबोधकमात्रेणाभिनवाप्युपपत्तिः ७३

कल्प्यते न तेन तत्तदेवकारो द्वाभ्यामपि च तत्तदीनाभ्यामन्यत्वाभ्यामन्यपदोपस्थितान्यत्वेनैव धर्मेणैको निरूढलक्षणायो
पस्थाप्यते। स चान्यत्वप्रतियोग्यत्र यिनि विशेषणं। चादिनिपातानां तदर्थवद्द्योतकार्थस्यापि धात्वर्थे नामार्थे वा साक्षा
दन्वये वाधकाभावात्। अतः पार्थायैव देहीत्यत्र पार्थसंप्रदानकं दानकुर्विति वोधः। पार्थ एव धनुर्धर इत्यत्र प्रथमा
यास्त्वभिन्नार्थत्वे पार्थाभिन्नः पार्थान्याभिन्नान्यश्च धनुर्धर इति वोधः। एवमन्यत्राप्यूह्यं। प्रकृतोदाहरणे च गायत्र्याध
धिकरणको गायत्र्याधिकरणकश्चावायः कार्य इति प्रतीतेरुक्तरीत्यासिद्धायाः पर्युदासरूपप्रतीतेस्तुल्यत्वात्र
विकल्पावसरोऽपि तादृशप्रतीत्या चासंजातप्रसक्तिनिवृत्तिपर्यवसायित्वेन विधिफलभूतयाफलांतरपरिरोधात्तस्मैव स्वे
वकारस्यार्थांतरगोचरविधिशक्तिप्रतिवंधकत्वमवहारोपि। अस्ति च तस्या उक्तरीत्या लक्षणाया रुकताद्दृशसंवंधा
वगाहित्वमिति तिनाव्याप्तिरित्यनवद्यं। नापीति शशाद्यभक्षणे दोषस्य तन्निवृत्तौ च प्रायश्चित्तस्यस्यादिभक्षणनिमित्त
प्रायश्चित्तविधिनापेक्षितत्वस्य च तन्निषेधस्य कल्पने गौरवादित्याशयः। उक्तलक्षणासद्भावाद्द्वाभ्यामपि न नियमप

परत्वमित्याह पंचनखेति अयमर्थः पंचनखपदमत्र न पंचनखत्वावच्छिन्नभेदवत्परं किंतु पंचयद्दक्षमानाधिकरणेन पंचन
खपदेन शशादिपरामर्शात् द्विंनपदार्थभेदस्य चाप्रतीतिबाधके समानाभिजत्वादित्यादावितरपदोक्तभेदवत्सजातीय
निवेशस्याभावाच्छ्वादिपर्यवसानं भवति। एवमग्रेऽपि तत्र श्वादिभक्षणस्य शशादिभक्षणस्य च ग्राह्यत्वेन निवर्त्यत्वेन
च युगपत्प्रतीतेः शास्त्रफलमूलभूताया हेतोः परिसंख्यालक्षणमस्तीत्याशयः। पक्षद्वयमनंतरमुपपत्तीस्पकारश्ले
षः। पाक्षिकाप्राप्तिः पाक्षिकास्वीकार्यत्वं वा का नियमलक्षणघटकत्वेनोक्तास्याप्तद्विधितात्पर्यगोचरत्वमिह न्ना
वभावान्न नियमनिखिललक्षणमत्रेत्याशयः। उपपादितमेतदधस्तात् द्विविधेत्यनंतरं शाब्दी शाब्दी च शाब्दी च द्विविधेति
शेषः। व्यावृत्तिभेदः पवमानगायत्र्यादिप्रतियोगिकोऽधिकरणप्रतियोगिकश्चाजस्यैव कारेणाभिधानादित्यर्थः। अ
भावादिति तत्तच्छ्वाभाववाचिपदस्य तात्पर्यत्वे एव श्रौतत्वात्तार्किकपरिसंख्ययोर्भेदः कोऽस्याशयः। एवेत्यवधारणं श्रुत्य
तेन सेन श्रौत्यात्रिदोषत्वपरिहारार्थं। तस्मात्रैदोषाभावस्य स्फुटत्वात् किंतु फलतः परिसंख्यायां त्रैदोष्यपरिहारार्थात्

प्याहि प्रत्यक्षश्रुत्याऽश्वाभिधान्यंगत्वेनावगतस्य मंत्रस्यैकैमर्थ्याकांक्षानिवृत्तौ सत्यां स्मानाद्ध्ये विनियोजकश्रुति
कल्पनापत्तिर्बाधान्नैवाश्वाभिधान्यां मंत्रविनियोगो मानान्तरसिद्धोस्ति येन श्रुतेन तस्मिंस्तात्पर्यं हीयेत। नापि गर्दभाभि
धान्यां मंत्रविनियोगो मानात्सिद्धो येन तन्निवृत्तावश्रुतार्थांतात्पर्यं कल्प्येत तत्प्रापकश्रुतिकल्पनापत्तिर्बाधादेव वचनप्रा
मबाधोऽपि फले तु विधेयतोच्यमाने प्रत्यक्षानुमेयश्रुतिभ्यामश्वाभिधान्यां मंत्रशक्तिसंभवे तुल्येऽपि प्रत्यक्षानुमेयश्रुतिप्रति
बंधेन तत्समानाया प्रत्यक्षश्रुत्याऽश्वाभिधान्यंगत्वबोधने कृतं तन्न गर्दभाभिधान्यामनुमेयश्रुत्या मंत्रशक्तिर्माभूदित्येव
मर्थमिति निर्णयात्फलतः परिसंख्यासिद्धिः। ननु परिवचनं गर्दभाभिधान्यां मंत्रनिवृत्तिर्न बोधयेत्तस्मैवेतस्मात्तन्निवृत्तिः
सिध्येत् मंत्रस्याश्वाभिधान्यादानांगत्वेनैकैमर्थ्याकांक्षानिवृत्तावपि गर्दभाभिधान्यादाने तस्या एवाकांक्षासत्त्वेन तन्मंत्रप्र
तादर्थ्यापत्तेः। न चाश्वोपलम्भेनोपदृष्टादिनास्याकांक्षाया अपि गर्दभाभिधान्यादानीयाकांक्षोपशमसंभवात्तन्मंत्रस्य तादर्थ्या
पत्तिरिति वाच्यं नियमसंभवेऽनियमस्यान्याय्यत्वात् अपूर्वीय गर्दभाभिधान्यादानस्याकृतत्वेनाकांक्षापूर्वसंबंधानामु

भा.स.
७५
75

इष्टादीनां स्वीकारात्क्लृप्तापूर्वसंबंधमंत्रस्वीकारे लाघवाच्च । उक्तं हि तृतीये आग्नेय्याग्नीध्रमुपतिष्ठत इति वचनं लो-
त्राद्यंगत्वेन विनियुक्तामपि प्रकृतामेवाग्नेयीं विनियुङ्क्ते । न तु प्रकृतां तस्या अपूर्वसंबंधद्वारसंबंधे च बोध्यमाने तिगौ-
रवारंवादिति । न च वचनस्याश्वाभिधानीमंत्रसंबंधबोधकत्वेपि तत्तद्व्यतिरेके संभवस्यासिकत्वबोधनप्रयुक्तवे-
युर्थ्यानुपपत्त्येव गर्दभाभिधान्या मंत्रनिवृत्तिः शंक्या तथा सति पंचपंचनखा इत्यत्रापि त्रैदोष्याभावापत्तेः । शशादि-
मन्त्राबोधकत्वापरित्यागेपि त्वयस्यैव वैयर्थ्यानुपपत्त्येव श्वादिनिवृत्तिसिद्धेः किमिति क्लृप्तहान्यक्लृप्तकल्पने स्वी-
कार्ये तस्मात्केनापि मानेन संभवत्प्रातिकस्यार्थस्य निवृत्तिबोधकवचनं विना वैयर्थ्यानुपपत्तिमात्रेणान निवृत्ति-
सिद्धिरिति स्वीकार्यं तथा सत्युक्तरीत्या गर्दभाभिधान्याः संभवत्प्रातिकमंत्रनिवृत्तिसिध्ये क्लृप्तवचनेनैव लैंगिकवि-
नियोगप्रतीक्षस्य निवृत्तिपरेणाभवितव्यं तस्मान्निवार्यं त्रैदोष्यमिति सिद्धं गर्दभाभिधान्या दानस्यसत्तामपि स्मारका-
कांक्षायां सत्स्वपि च मंत्रस्य क्लृप्तापूर्वसंबंधस्य मंत्रस्य तादर्थ्यानापत्तेः । तथा हि हिरण्यगर्भः समवर्तताग्र इत्याद्या-

ए.म.
७५

माधारयतीत्याधारसामान्येविनियुक्तस्यमंत्रस्यकर्माधारंप्रसंगत्वमितिसाकांक्षासंभवेपिप्राजापत्याधारस्यचप्र
कृतात्वविविकृतावप्यविनियुक्तोपायाक्षेपकत्वप्रयोजकस्यसाकांक्षासत्वेपिप्राधारस्यचोदकप्राप्तमंत्रेणा
नेनाकांक्षस्यसंभवेपिहिरण्यगर्भमंत्रस्यपूर्वस्मिन्प्राजापत्येयोग्यतायाउक्तत्वाद्भिन्नेचायोग्यतायाःस्फुटत्वेपिनिय
मादृष्टकल्पनागौरवभयादेवपूर्वाधारंप्रतिहिरण्यगर्भमंत्रस्यनांगत्वमाश्रीयते। आश्रीयतेचोत्तराधारंप्रतितत्रनियमा
दृष्टस्यक्लृप्तत्वात्। प्रकृतेतुआग्नाभिधान्यादानस्यमंत्रान्तरावरोधःनापितन्त्रमंत्रस्यायोग्यत्वविशिष्टचवचने
नतत्रैवविनियोगोदृश्यते एवंसत्यभिनवनियमादृष्टकल्पनापादकंगर्दभाभिधान्यर्थत्वंतदीयस्याकांक्षा
मात्रवशेनकथमाश्रयितुंशक्यं आग्नेय्यांतुक्लृप्तविनियोगविधिबलान्नियमादृष्टंक्लृप्तंतस्यैवप्रकृताग्नेयी
जन्यत्वाश्रयणात्अभिनवनियमविधिबलान्नियमादृष्टकल्पनापत्तिःयदिगर्दभाभिधान्यामपिप्रकृताप्रकृत
मंत्रसाधारण्येनविनियोगःस्यात्ततःक्लृप्तनियमादृष्टेप्रकृतमंत्रस्यैवसाधनत्वंस्वीक्रियेतनचैवमस्ति। अथाग्ने

मा दी. ७६ ७८

कस्मात्काक्षेपान्नियमादृष्टकल्पनमपि लघीयः अतः स्त्रीकृत्स्नापि तत्कर्दमाभिधान्यां मंत्रविनियोगो वक्तुमुचि
तः इत्युक्तं चेत् तर्हि हे रण्यगर्भमंत्रोपि तथैव पूर्वाधारे लब्धविनियोगोन्नप्राशे गोदानापादकमगत्वं गच्छेत्। अथ
गर्दभाभिधान्या दानस्यानेकस्मात्काक्षेपकत्वेनेतः शाल्मसंल — तपूर्वाधारस्य प्रकृतावितिचेत्। किं ततः न हि प्रकृ
तावाक्षेपलभ्यस्य विकृतावतिदेशो नियेन तत्र साक्षेपगोदानं परिहीयेत। न चाक्षेपलभ्यानामुपायानां ताप्र
कृतस्यपूर्वसंबंधः क्लृप्त इति विकृत्यपूर्वसंबंधोपि क्लृप्तो वक्तुं शक्यते येन तत्कल्पनागौरवं न स्यात्। किं च भव
न्मते प्रकृतावपि पूर्वाधारस्य नानियतानेकोपायाक्षेपकत्वमुचितं उपांशुयाजादिगोचरविनियोगेन क्लृप्तापूर्वसं
बंधस्य प्रकृतप्राजापत्यमंत्रस्यैव वाचो ज्ञापयिमाणस्य मनसालोच्यमानस्य वा स्मारकत्वेन स्वीकार्यत्वात्। आग्ने
यीन्यायसिद्धत्वात्। तत्र च प्रकृतौ पूर्वाधारेपि नियमादृष्टं कृत्स्नमिति हिरण्यगर्भमंत्रोपि लिंगाविरोधात् तदंगमे
व स्यात्। किं च प्रकृतौ मेष्याः प्रत्यक्षविधिना विनियोगेन तस्यापूर्वसंबंधं विनाऽपर्यवसानाद्द्वारसंबंधे पूर्वसंबंधे च वो एम. ७६

ध्येगोत्रंश्रवेतीतियुक्तंउपद्रष्ट्रादीनांतुलोकप्रसिद्धस्याधनत्वाल्लोचनेनास्तिप्रमाणानांनैवापूर्वसंबंधापेक्षा
अतः कथंतत्कल्पनानिमित्तगोत्रापत्तिः यत्परिजिहीर्षयागृह्याभिधान्यांमंत्रोनियम्येत किंचतस्यामपिउ
पद्रष्टादीनामपूर्वसंबंधापेक्षायांनैवतत्कल्पनापत्तिः॥ अश्माभिधान्यादानद्वारामंत्रस्यैवप्रकरणान्नामंत्र
कवाक्यमादिपदार्थद्वारोपद्रष्ट्रादीनामप्यपूर्वसंबंधस्यकल्प्यत्वात्। अथनकल्प्यापूर्वसंबंधत्वेनोपद्रष्ट्रादि
लौकिकेगोत्रंवदामिकिंतुकल्प्यस्यानासंबंधत्वेनायथाहिपुरावाचः प्रवदितोनिर्वपेदितिअध्वरकल्पाप्रक
रणपठितेवचनेकृत्स्नप्रातःकालसंबंधत्वेनप्रातर्विहितप्रधानसंबंधिनएवनिर्वापस्यप्रातःकालगतविशेष
संबंधोविधीयतेनतुमध्याह्नादिविहितप्रधानसंबंधिनः। तस्यप्रातःसामान्यसंबंधेनद्विषेतद्विषेनतद्विशेषसंबं
धेचाभिगोत्रात्। उक्तंचैतदेकादशेनतथाऽश्माभिधान्यां। विनियोगेनकृत्स्नस्यरशनासंबंधस्यमंत्रस्यगृह्याभिधान्या
स्यैवतद्विशेषसंबंधोवक्तुमुचितः नतूपद्रष्टादेः तस्यरशनासामान्यसंबंधेनतद्विशेषसंबंधेचाभिगोत्रादित्यत्रचैत

नैवं। अक्लृप्तप्राप्तः संबंधस्य हि प्राप्तः कालविशेषसंबंधविधिरपूर्वविधिः स्यात् क्लृप्तप्राप्तः सामान्यसंबंधस्य तु तद्विशेषसं-
बंधे नियमविधिरिति युक्तं प्रातर्विहितप्रधानसंबंधिनिर्वापस्यैव कालविशेषविध्यंगीकरणं। न च त्वदुक्तरीत्या रशनासंबंध-
क्लृप्त्यक्लृप्तिभ्यां विधिव्यापारे कश्चिद्विशेषोऽस्ति अप्राप्तरशनासामान्यसंबंधस्यैव प्राप्तस्याभिधानीसंबंधस्याऽपि गर्दभाभिधान्यं-
गतायाः अप्राप्तायाः एव प्रापणीयत्वात् न च द्वारां संबंधव्यतिरेकेणापूर्वसंबंध इव गर्दभाभिधानीसंबंधकर्तृत्वं नो विधेः रशनासा-
मान्यसंबंधे प्रथमव्यापारोऽस्ति यद्वा एवमप्यक्लृप्तसामान्यसंबंधमेव स्वीकुर्यात् न तु अर्थवत्त्वयं पृथिवीद्रव्यसन्नेयसामान्यसंबंधा-
नापेक्षते न व्याप्तीयते च तेषु तथैव रशनासामान्यसंबंधमपि नापेक्षते न क्वचन तत्र व्याप्तीयेत किं चोक्तविधया मंत्रस्योपद्रष्टृद्वारीनां च
क्लृप्तसामान्यसंबंधत्वे तस्येऽपि यदि क्लृप्तरशनासामान्यसंबंधतान्मंत्रोपादानं गर्दभरशनार्थमापद्येत तत्राऽऽपद्येत न तदा क्लृप्तगर्दभरशना-
संबंधत्वेन गर्दभरशनादानविधेरेव स्मारकत्वेनोपादानांतरस्य प्राप्तगर्दभरशनादानप्रतीतिद्वारेण क्लृप्तसामान्यसंबंधस्य प्राप्त
तत्प्रातीतिद्वारेणाप्यपूर्वसंबंधे तिलाघवात् अतः क्लृप्तविधे गर्दभाभिधानीनि हत्विपरत्वाभावे विप्रायकप्राप्तारणानिरोधे मेकार्दभा

मिथ्यानीनिवृत्तिसिद्धेः संभवस्य त्वेतद्दोषाभ्याहितपरिसंख्योऽप्यवहार्यश्चाचार्याणामिति तानन्नुपेक्ष्य गर्द्दभरशनानिवृत्तिरस्मृतासतीक
त्स्याप्सैव प्राप्तबाधस्त्विके तिनाङ्गकल्पनातः प्राप्तबाधस्य दृष्ट्येहोषत्वेनोपन्यासः संभवतीत्यत आह अत्रास्मिंश्चेति
यथैव त्वयाश्रुतेऽर्थे शब्दवृत्तान्तस्यार्थकल्पनमन्याय्यत्वात्त्वयं दोषस्तथैव मानप्राप्तस्यार्थस्याबाधेनोपपन्नो वा धस्यान्याय्य
त्वात्प्राप्तबाधोऽपि तत्त्वं तत्र एव दोषः इत्याशयः। अतश्चेति ननु यद्यपि देवस्य त्वेत्यादिमंत्रेऽग्नयं निर्वपामीति पदद्वयंस
मवेतार्थस्य भवति प्रकाशकं नैतावता संपूर्णस्य मंत्रस्य तत्प्रकाशकत्वं संभवति देवस्य त्वादिपदानामसमवेता
र्थत्वादिति चेन्न तेषामपि स्वार्थविशिष्टत्वेन निर्वापप्रकाशनार्थत्वात्। विशिष्टस्य प्रकाशनस्यानुष्ठानानुपयो
गित्वेऽपि मंत्रनियमादृष्टएवोपयोगसंभवात् ननु तथापि क्रोञ्चशास्त्रमंत्राणां नैवप्रयोगसमवेतोऽर्थः प्रकाश्यः
संभवति तेषां द्विपत्संस्कारार्थत्वस्य द्वितीयेनिरस्तत्वादिति चेन्न यत्प्रकाशनं प्रयोगसाध्यापूर्वेणापेक्षितं तत्प्र
काशकत्वस्य लक्षणेन विवक्षितत्वात्तत्प्रकाशने स्वरूपेणापेक्षितं प्रकारस्य द्वारेणावेत्यन्यदेव तत्। न चैवमपिता द

शार्थप्रकाशत्वस्य जपमंत्रेषु संभवत्तेषामुच्चारणाद् दृष्टोत्पत्त्युपगमादिति वाच्यं जेषामप्यन्यत्र क्रतोपयोगा
उवाकार्थस्तोत्रशास्त्रयोर्वा विनियोगेन तादृशार्थप्रकाशकत्वादृष्टप्रभावात्॥ इत्योहोपपत्तिवद्धानांचार्थाभिधान
द्वारेवादृष्टार्थतापादकत्वमुचितत्वान्नपथ्योक्तं तन्त्रसारे। इत्यूहोपनिबद्धमंत्राणां दृष्टफले विधिः। श्रुवादिशब्दाह
शाकृः सोमाभिधानाभिधायकत्वान्नियमयापि साममिमैर्वसमाक्षा लौ व्यर्थोभिधीयते। जथाव्यग्रक्षणाभिव्यक्तिद्वारा संभ
वतिजेषामर्थप्रकाशकत्वं जथाग्निप्रजापतिहृदयादीनामनुक्तसामान्नार्थाभिधानार्थत्वमितिचेन् नतान्याथि
यत्र कर्माणि विनियुक्तानि तत्पूर्वेणापेक्षितस्य त्वविशिष्टत्वेन प्रयोगविधिप्रयोगप्रसायनस्य तैःपिसंपादना
त्। जहि किंमंत्रोच्चारणस्यादृष्टार्थत्वेन क्वाप्यत आह। येषां क्वापीतियेषां मंत्राणां प्रामाणिकविनियोगवत्त्वेन क्वा
पि प्रयोगे निविष्टानां तत्रार्थप्रसापनार्थत्वेन संभवति तत्र तदुच्चारणस्यादृष्टार्थत्वेप्यन्यत्र विनियोगवशे
नतेषामेवार्थप्रत्यायनार्थत्वसंभवान्न क्वापि मंत्रे प्रतीयमानार्थाविवक्षाशंकेत्याशयः। नचैवं मंत्राणां विवाक्ष

तार्थत्वलाभेपि कथं स्मारकत्वेनाभिमतानां तेषामनधिगतबोधकत्वरूपं प्रामाण्यमिति चेदत्र केचिद्धर्मार्थत्व
मात्रेणैवां स्मृतिवत्प्रामाण्यमित्याहुः । अन्ये तु चोदनालक्षणोर्थो धर्म इति द्वितीयसूत्रे चोदनाशब्देन प्रवर्त्तकत्व
पर्यायत्वमधिकरणस्य मंत्रार्थवादाद्येकवाक्यतापन्नस्य विधेरभिधानाद्यथाप्रतिज्ञातं मंत्रार्थवादविधिप्रामाण्य
मेकरूपमेव वक्तुमुचितं संभवति च मंत्राणामप्यनधिगतार्थगंतृत्वं । धन्वन्निव प्रपा असि कुमारा विशिखा इवे
त्यादीनां तावत्प्रपाशिखाधारणादितत्त्वगतं श्रेयःसाधनत्वं चानधिगतं तच्छास्त्रानुमानेन ज्ञापयतां स्वरूपमेव तावत् । ए
वमनधिगतं यागस्य रूपं तद्धुतमापुरोडाशादिसाधनत्वं च बोधयति सूक्तवाकेपि तथा शास्त्रान्तरप्राप्तानामन्वाधाना
स्ताक्रमणानीति वचनक्रियाणां यथाक्रमं यजमानगामृत्विग्गाम्युभयगामि वक्रमिषं विजिहाथां मा मा संताप्तमि
ति चोदितनाप्यमध्यात्मकश्रेयःसाधनतां ज्ञापयत्स्वममा — — — वेविति अस्मा विस्तृमावाम वृतन्नो स्टहेति मंत्रेषु एष्टृदा
हरणोयनावदानेयादिविधिवद्दर्शपूर्णमासविधिवच्चाविहितं धर्मं प्रामाण्यं । एवमिंद्र ऊर्ध्वो अध्वर इत्यादिमंत्रस्यानधि

मा॰ टी॰ ७९ 79 गत्वमंत्रयागं बोधयतः प्रयाजविधिवत् । ये तु द्रव्यविशेषदेवताविशेषकर्तृविशेषक्रमविशेषप्रकाशका मंत्राः छा
गस्य वपाया मेदसोऽनुब्रूहीति समिधः समिधोऽग्न आज्यस्य व्यंत्विति आयुर्दा अग्नेऽस्यायुर्मे देहीति होतेव नः प्र
थमः याहीति तेषामपि चतुर्ज्ञेक्षा ग्रहणाति प्रयाजेभ्यस्त दिक्सादि विधिवत् । सर्वेषां च लिंगविनियोज्यमंत्राणाम
पूर्वस्माधनीभूतेलवनादावात्मनो गर्भग्राहयतां तत्र हृदेवा । अंततन उदाहृतानुदाहृतानां सर्वेषामेवं प्रयोगकालेऽपूर्वसा
धनत्वेन स्वार्थानुसंधानाकर्तव्यतां गाययन्तामिति परे त्वाहुः । नैवमपि चोदनावन्मंत्राणां शब्दविधया शामाण्यप्रसि
द्धिः मद्धि चोदनागतेर्विध मंत्रगतेः पदैः रूपस्थितैः पदार्थोऽनुक्तोदाहरणेषु काक्षादिस्मृचिवास्तां तामनधिगत प्र
मा जनयंति । अपि तु तं तमर्थं बोधयंतां तेषां मानान्तरानुपपत्तिः । न च शब्दानुपपत्त्या अतं ज्ञानं शब्दलिंगकाकाशानु
मिति वक्तव्यत्वेन प्रवहनुर्ज्ञशकं अतस्यापि शब्दविधया शामाण्यपथा कथंचिदैकरूप्येण ज्ञप्तिज्ञोपपादनेन तस्य
रूपपनधिगतार्थगंतृत्वे यथार्थज्ञानजनकत्वस्य रूपेणो च प्राप्तिज्ञोपपत्तिः । किं न स्यात् । न चानधिगतार्थगंतृत्वम एम॰ ७९

पि सर्वमंत्रप्रामाण्येन शक्यं निरूपयितुं। अन्यथा साम्नाकेनापि स्वरूपप्रकारेण न संभवात्। अत एव द्वितीयसूत्रे चो
दनापदं नार्थवादमंत्राद्येकवाक्यतापन्नविधिपरं उक्तं विधयाविध्यर्थमंत्रेष्वेकरूपप्रामाण्यप्रतिज्ञाया असंभवात्
न चैवमप्रतिज्ञातस्य मंत्रादिप्रामाण्यस्य कथमाकरेण निरूपणमिति शंक्यं। प्रथमसूत्र एव सामान्यतो धर्मप्रमाण
निरूपणप्रतिज्ञायाः कथं लक्षणको धर्म इति भाष्येण प्रदर्शनात्। पदैकवाक्यतयार्थवादादेः प्रामाण्यं यन्मूलत्वेन
स्मृत्यादेः प्रामाण्यं तस्य प्रधानप्रमाणत्वेन तत्संदर्शनार्थतया द्वितीयसूत्रे चोदनाग्रहणोपपत्ते तस्मात्सर्वमंत्राणां त
त्र हि नियोजकविधिवाक्यार्थपदार्थाविधयाऽनुप्रवेशात्पदार्थानां च वाक्यार्थप्रामाण्योपयुक्तानां क्रियार्थेन समाम्नायो
ऽर्थस्य तन्निमित्तत्वादिति सूत्रेऽर्थस्येत्याद्यवयवव्याख्यानं कुर्वता भाष्यकारेणोक्तं पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्या
पाराणि। अथेदानीं पदार्था अवगताः संतो वाक्यार्थं गमयंति। वार्तिककारेणापि। अवाचकत्वं वाक्यस्योपयुक्तानामिती
रितं हेतुः स्यात्तन्निमित्तत्वं मूलं वार्थस्य कस्यचित्। पदार्थमूलको ह्येष न भ्रांतिरिति गम्यते साक्षाद्यद्यपि कुर्वंति पदार्थप्रति

भा॰ टी॰ पादनं। वर्णानि तथापि नैनं तस्मिन्नपर्यवस्यंतीति निष्फलो वाक्यार्थमिति जयेतेषां प्रवृत्तो नांतरीयकं पाकेज्वालेवकाष्ठानां पदार्थ
प्रतिपादनं। प्रयोजनं न यथा चैयामर्थमिच्छंति भावमा क्रियेनिनितेन हम्समाम्नाय प्रयोजनमिति। अस्य चेत्यमभिप्राय उ
८० क्तो न्यायरत्नाकरे। ये हि वाक्यमेव सभागं निर्भागं वा वाक्यार्थस्य वाचकं मन्यंते ये च निर्मूलमेव वाक्यार्थज्ञानं तेषामु
80 भयेषामपीदं सूत्रं शास्त्र निराकरणं तन्त्रतद्भूतानामिति सूत्रावयवेन वाक्यस्य वाचकत्वनिराकरणं लोकसिद्धेषु पदार्थे
षु वर्तमानानां पदानामेव वाक्यार्थोपायत्वान्न वाक्यस्य वाचकत्वमिति अर्थस्य तन्निमित्तत्वादिति तत्र च हेतुः पदार्थाना
मेव निमित्तत्वोपपन्नेर्निःप्रमाणकं वाक्यस्य वाचकत्वमिति। यद्वार्थस्य वाक्यार्थस्य मूलं कथ्यते तन्निमित्तत्वादिति प
दार्थमूलको हि वाक्यार्थबोधो न निर्मूलत्वेन्नातितथाशंकितव्यः। न चैवं वाक्यार्थभूतक्रियाप्रतीतेः पदार्थामिश्रितत्वे
पदानां क्रियार्थेन समाम्नायः कथमिति शंक्यं। पदार्थेषु पर्यवसिताभिधाव्यापाराणामपि पदानां वाक्यार्थ एव तात्प राम॰
र्यपर्यवसानात्। एवं च क्रियार्थेनेत्यस्यायमर्थः प्रयोजनपरोमाभिधेयपर इति। न चैवमपि पदार्थज्ञानानां हेतुत्वमनंगी ८०

ष्टत्वपदार्थानां तदङ्गीकारे को हेतुरिति शङ्क्यं। गोपदजन्यज्ञानं तज्ज्ञानव्यक्तीनां हेतुत्वमपेक्ष्य गोपदाभिहितगोत्वस्य हे
तुत्वाङ्गीकारे लाघवात् एवं शुक्लयागाकाशादिशब्दानामित्यपि द्रष्टव्यम्। किञ्च गुणक्रियाद्रव्यवाचित्वमते श्वेतत्वा
दिजातिवाचित्वमते वा नानापदार्थानां वा कार्यधीहेतुत्वमते लाघवं बोध्यं। न चाज्ञातपदार्थानां वा कार्यधीहेतुत्वायोगा
ज्ज्ञातपदार्थानां तद्वाच्यं तथा च लाघवाज्ज्ञानानामेव हेतुत्वमस्त्विति वाच्यं गोत्वादिरूपविज्ञतवाक्यार्थधियं प्रति गोत्वा
दिभिन्नार्थगोचरज्ञानानां हेतुतायोगेन गोत्वादिज्ञानानां हेतुत्वं वाच्यं तथा च लाघवाद्गोत्वादीनामेव हेतुत्वमस्त्विस्यपि
वक्तुं शक्यत्वात् वस्तुतस्तु पदाभिहितगोत्वादीनां वाक्यार्थधियं प्रति हेतुत्वं पदाभिहितत्वं च पदविषयीकृतत्वं लक्ष्य
गोणसाधारणम्। अतो नैवकारस्य नावच्छेदके ज्ञानप्रवेशः। न चातीतानागतपदार्थानां कथं हेतुतेति शङ्क्यं स एकः स एक
इत्यपदस्था बुद्धिजन्यत्वेनोद्धा विस्तवाधितधीविषयस्महितत्वस्यातीतानागतामपि पदार्थाभ्यां बुद्धिस्थान्मनाजननवदुपपत्तेः। त
त्सिद्धपदार्थविधया मन्त्राणां धर्मे प्रमाणमिति मवदेव स्वाहा नैव मन्त्राणां शब्दविषया पदार्थविधया वाऽनाधिगतार्थ

भा॰दी॰
८१
४।

णेन तद्रूपप्रामाण्यनिरूपणप्रयोजनं प्रतिवेदवाक्यं मादृशप्रामाण्यमनुसारेण स्यासंभवात्। न हि विहिताकार्यो
त्तादृशप्रामाण्यमस्ति। कथंचित्साक्षात्पारंपर्येण वा धर्मप्रमित्युपयोगित्वमात्रेण तु मंत्राणां स्पष्टमेवेति। गुरुमतानु
सारिणस्तु प्रथमसूत्रे प्रतिज्ञातधर्मप्रमाणसामान्यस्य द्वितीयसूत्रे चोदनायामुपसंहारेणैव स्वातंत्र्येण मंत्रार्थ
वादादिप्रामाण्यं प्रतिज्ञातं अत एव न तादर्थ्यं कस्यचिदधिकरणस्य किमर्थं तर्हि मंत्राद्यधिकरणमिति चेत्के
नापि प्रकारेण चोदनानामप्रामाण्यशंकानिरासाय। तथा हि मंत्राधिकरणे निविवेत्कर्म्मकास्त्रमंत्रयोरन्योन्य
व्याहतार्थत्वात्तादृशात्तदुभयैकवाक्यतापस्याप्रयोगचोदनानामप्रामाण्यमाशंक्य ण।द्वाति तं प्रसक्तितोऽर्थपरता
यां मंत्रेष्वविशेषात्तदर्थशास्त्रस्य स्वानुवादत्वेन विरुद्धाकारत्वत्रयनसंभवान्नैव तयोर्व्याहतार्थत्वं। ननु ऋगादिकल्पन
या विलंवितप्रवृत्तिकं लिंगमेव शीघ्रप्रवृत्तं तदर्थशास्त्रानुरोधे नानुवादो भवेत् कथमन्यथाश्रुतवचनानुरोधे
नैंद्री। लिंगस्य वा धर्द्रति चेत्परिहृतमेतन्नयविवेके। तदर्थशास्त्राच्छेषबोधिमात्रार्थत्वं। किंचित्करत्वात्तु मंत्रशक्तिनिरू राम॰ ८१

णत्वात्तन्निरूपणे च किंचित्कार्यत्वाशेषत्वमपि लब्धमेवेति विनियोगबुद्धौ जातायां तदर्थशास्त्रमनुवादः ऐन्द्र्या
वचनादेव लब्धं किंचित्कारत्वाभिधानमिति। यास्यामातमेतद्वदराजेन शेषः शेषी किंचित्कारस्येति त्रयमुक्तानं विनि
योगे सामग्री तत्र तदर्थशास्त्रे शेषशेषिभावार्थं तां न तु शेषत्वमात्रम्॥ किंचित्कारत्वम् उपकारविशेषोपि। स च मं पो २
त्रशक्तिनिरूपणादभिधानान्मायासः अतो लिंगापेक्षं तदर्थशास्त्रं न तु लिंगस्य क्वचिदप्यंशे तदर्थशास्त्रापे
क्षेति तदर्थशास्त्रस्य लिंगप्राप्तानुवादत्वमुचितं। ऐन्द्रीवचने तु न लिंगापेक्षा उपपूर्वस्य तिष्ठतेरभिधानार्थत्वेन
वचनादेव किंचित्कारत्वाभादिति। न च सर्वतदर्थशास्त्राणामनुवादतायां वैयर्थ्यं न विशंक्यं क्वचिदर्थवादार्थता
याः संभवात्। अतो न प्रयोगचोदनानामप्रामाण्यमिति एवमर्थवादाद्यधिकरणेष्वपि चोदनाप्रामाण्यमेव
साध्यते। तेन मंत्रादीनां पृथक्प्रामाण्यचिंतायाः फलमित्याहुः सर्वास्वपि मतानि मनसि निधायाह सर्वथा
पीति। नामधेयानामिति। अत्र नामधेयग्रहणं न जातिगुणादिकमात्रपरं श्येनादिपदानां विधेयार्थपरिच्छेदार्थत्वा

भाट्टी॰ ८२

भावानामपि कर्मविशेष्यकप्रतीतिजनकसुबन्तपदं। सर्वपृष्ठातिरात्रादिपदानां तज्जनकानामपि उक्तपरि

च्छेदार्थत्वासंभवात् किंतु योगे न रूढ्याबाधात्वर्थपरिच्छेदतात्पर्यकत्वं तत्वांनतु परिच्छेदो नाम सामान्यात्मना बु

द्धिस्थस्य विशेषात्मना प्रसायनं एकाहापञ्चाइवाहत्वेन उद्भिदादस्य यजिसामानाधिकरण्यात्कर्मनामत्वं

वदद्भिर्यद्यागसामान्यवाचित्वमुच्येत तत्तोनेव विशेषप्रसाधकत्वमिति कथं परिच्छेदकत्वं। अथ शब्दांतरा

दिमानकयागत्वावांतरवैजात्यवाचित्वमस्योच्येत तदा कथं तत्र यजिसामानाधिकरण्यमानत्वं न हि य

जिर्वैजात्यवाची नैनैव वैजात्यप्रसाधनेयानेव परिच्छेदो नाम फलं अन्यलभ्यत्वात्। अत आह अनेनेति। नेव

पिकः को किल इत्यत्र को किलपदसामानाधिकरण्यात् कोकिलपदवाच्योपि कपदस्येव यजिसामानाधिकरण्या

द्यजिवाच्येन सामान्ये उद्भिदादस्य शक्तिग्रहं ब्रूमः। किंतु शब्दान्तरायत्तान्यतरसहितविधिनाप्राज्ञानात्पर्यविषयत्वे राम॰

नास्मिन्नेयागीपविशेषरूपे। यथात्र कमाह्ला गानयनकथनोपक्रमकेवाकेदेवदत्तं ब्राह्मणमानयेत्यत्र देवदत्त ८२

ब्राह्मणपदयोः सामानाधिकरण्याद्यो नाम देवदत्तपदस्य ब्राह्मणवाचितां गृह्णाति नासौ ब्राह्मणसामान्यवाचि
तां गृह्णाति। किं तु ब्राह्मणत्वाश्रयीभूतविशेषवाचितां न चैनावता सामानाधिकरण्यस्य किंचित्करत्वं। एवं
कारकान्वयित्वरूपं हि सामानाधिकरण्यं धातुनाम्नाप्ययोरभेदमापादयत निर्वाहाय धातुज्ञाप्ये नाम्नः शक्तिग्राह
पदसति बाधके सामान्यविशिष्टे विशेषरूपे ग्राहयेत स्नुषा पुत्रभार्येति सामानाधिकरण्यमिव स्नुषापदस्य पुत्रवि
शिष्टभार्यायां। विशेषणांशे बाधकोपनिपाते तु संभवति स्वविशेष्ये एव शक्तिग्राहकत्वं यथोदाहृतसामानाधिकरण्य
योर्दत्तब्राह्मणपदयोर्यथाक्रमं विशेषसामान्ययोर्बाधकोपनिपातात्सामान्यविशेषगोचरशक्तिग्राहकत्वं नन्वेवं
पाजिनेव यागविशेषज्ञापनेनाम्नः परिच्छेदफलत्वं नस्यादिति शंकां निराकर्तुमाहतत्रेति। अयमर्थः न वयं नाम्नो
ज्ञात विशेषरूपज्ञापनेन परिच्छेदकत्वं ब्रूमः। किंतु ज्ञात एवाविशेषरूपे जिज्ञासानिवर्त्तनेन यथा ब्राह्मणस्यादि विशि
ष्टदेवदत्तस्वरूपे शब्दाज्ज्ञाते पि पुत्रस्य सज्ञानेच्छया भवति प्रश्नः। कोसाविति प्रत्यक्षज्ञानेन तन्निवृत्तौ च भवति परिच्छेद

मा॰ द्वा॰ ८३

83

व्यवहारः। तथा यज्ञिज्ञानेऽपि विशेषरूपे संज्ञाजन्यज्ञानेच्छयोर्दाहृतत्वश्रुः। संज्ञाजन्यज्ञानोत्पत्तौ तन्निवृत्तौ संभ
वति परिच्छेदव्यवहारः। न चोद्भिस्यदजन्यज्ञानस्यानधिकविषयत्वे कथं तत्सत्तासत्त्वयोः परिच्छेदसत्त्वासत्त्वा
व्यवस्था प्रत्यक्षज्ञानस्यानुशासनाद्भवत्येव क्वचिदप्यशेषाधिकविषयत्वमिति चेन्न प्रत्यक्षज्ञानवेलायामाधिक्यानु
द्भूतस्यापि परिच्छेदव्यवहारेणाविलक्षणज्ञानेच्छानिवृत्तेर्देवनदालंबनत्वनिर्णयात्। हर्षं च विभिन्नहेतुना
मपि लक्षणाविषयाणामपि ज्ञानानां हेतुविशेषजस्येव कार्यविशेषे नियामकत्वं तार्किकमते परन्यज्ञानस्येव
शाब्दज्ञाने औपनिषदमतेऽसोपंदेवदत्त इति वाक्यजस्याखंडार्थज्ञानस्येवाभेदभ्रमनिवृत्तौ। अतोऽधातुजज्ञानादन
धिकविषयेणापि नामजज्ञानेनैव परिच्छेद इति न दुर्घटं। अमुनेवाभिप्रायेणाह भवदेवः। तेनैवं भूतो पाठविशेषः प्र
तीयते ननु विशेषणविशिष्ट इति। अनन्यलभ्यय विशेषणं विशेषणाद्यर्थः। मूले उद्भिद्रूप इत्युद्भिदभिन्न इति
नि नु संभवत्यधिकार्थत्वे किमिति नाम्न उक्तविधपरिच्छेदार्थत्वं वर्णने कथं संभव इति चेन्न उद्भिस्यहादुद्भित्सं राम॰ ८३

ज्ञकेन लक्ष्येयं संज्ञाविशिष्टयागप्रतीत्यङ्गीकरणात्। नन्वेवमुद्भिदादीनां शब्दस्वरूपाभिधायित्वं स्यात्संप्राप्तं॥ जातिवि
शिष्टप्रतीतिजनकानां गवादीनां जातिवाचित्वस्य बाधकत्वाद्येन संज्ञाविशिष्टमाद्वाडित्यादीनां शब्दमेव निमित्ती
कृत्य प्रवृत्तिमाहुरालंकारिकाः॥ अथ गवादिशब्दाभिहितैर्गोत्वादिभिस्तत्रात्मादिमा संबंधविशेष्यलक्षणासं
भवाद् वृत्तविशेष्यानभिधानात् संज्ञाशब्देऽन्य शब्दमात्राभिधाने लक्षणयापि न संज्ञिप्रतीतिसंभवः शब्दसंज्ञि
नोः संबंधाभावे लक्षणानुपपत्तेः॥ अथ संज्ञिन्यपि शक्तिरस्त्विति चेत् न। अतिगौरवादिति चेत्। भवतु तर्हि संज्ञा
शे लक्षणामंगीकृत्योद्भित्संज्ञकेनेति प्रतीतिनिर्वाहः। न च नामत्ववादिनोऽपि लक्षणाप्रसंगस्तुल्यकोपदशोमत्व
र्थलक्षणायायदस्यामयेन गुणविधित्वप्रसङ्गइति वाच्यं विशिष्टविधिगौरवापादकत्वेन तस्या हेयत्वात्। यथाह
वरदराजः। लक्षणयासोपस्थितं नाम विशेषणं न चेवं लक्षणायां तुल्यायां नमत्वं र्थलक्षणास्यागइति वाच्यं। वा
क्यस्याभावार्थैकविधिपरत्वनियमादिति। यद्वाश्मोव्रजांशोहोपस्थितिमपेक्ष्योद्भित्संज्ञकेनेति प्रतीत्युपपत्तिः। इत्थमे

मा०व्या० ८४

84

वोपपादयितुमुक्तं मद्वचरणोः सर्वत्रत्यगृहीतविशेषणाविशिष्टबुद्धिर्नदृष्टा न त्वनभिहितविशेषणेति। अत उ
द्दिष्टसंज्ञकत्वप्रकारकप्रतीतिजननेनैवोद्दिष्टह्रस्वपरिच्छेदकत्वम्। स्विस्यत आह। उद्दिष्टेति। नतावदनेनेतिर्गज्ञसं
ज्ञात्वेनादृशप्रतीतिजननसंभवः। तदवगमोपि नोद्दिष्टायजेतेतिवाक्यात्साकं रूपानापि मानांतरेण संभवति। अतस्तद
मेव वाक्यं उद्दिष्टायजेतेनेतिनान्वोपजिसामानाधिकरण्येनान्वयबोधयतसंज्ञात्वमाक्षिप्य प्रतीतिषाक्यांतनतस्य सं
ज्ञात्वविशिष्टेप्रथमजोयोन्वयबोधः वपषांगीकार्यः। तेनैवावाधितेनवाक्यपर्यवसानाद्वोद्दिष्टसंज्ञकेनेतिबोधः सं
भवति। कथं चैतद्धाकाधीनविशिष्टेकस्यैतत्संज्ञकत्वस्यासिन्नेवधाक्ये सिद्धवन्निर्दिष्टाइत्साशयः। ननु यद्विसा
मानाधिकरण्यात्संज्ञात्वमुद्दिष्टह्रस्वतदासामानाधिकरण्यनिर्वाहार्थमेव पदपद्विकारार्थत्वं स्वीकार्यम्। भिन्न
प्रवृत्तिनिमित्तयोरेकार्थवृत्तित्वस्य तल्लक्षणत्वात् न च तत्धर्मिणा तदसंभवः। उद्दिष्टसदृशयोगिकत्वेन फलोद्देद
नकारित्वप्रकारकबोधजनकत्वात् प्रयोगत्वावान्तरजातिप्रकारकबोधजनकत्वात्। न च फलोद्देदनकारि

एम० ८४

त्वयोगस्य ज्योतिष्टोमादिसाध्याऽपाप्तो उद्भिदस्य नियतप्रवृत्तिहेतुत्वं संभवतीति वाच्यं। हरिहरपदेयस्तु त्वस्ये
वोद्भिदस्य हेयागत्वावान्तरजातिविशेषस्य प्रयोगोपाधित्वांगीकारात्। यो हि स्वयमशक्त्वाचोऽतिप्रसज्यमानां शब्द
प्रवृत्तिं निवार्य विषयविशेषे व्यवस्थापयति। स एव प्रयोगोपाधिरित्युच्यते। ननु यदुद्भिद्विधिज्ञाप्यं फलोद्देदनका
रित्वं तदुद्भिदस्य प्रवृत्तिनिमित्तं उतान्यत्। नाद्यः एतद्विधिज्ञाप्यस्यैतन्निमित्तेन विधेयत्वसिद्धवन्निर्देशायोगात्। न द्वि
तीयः निष्प्रमाणस्यालीकत्वेन निमित्तत्वायोगात्। अतउद्भिदस्य यागत्वावान्तरत्वे जात्येकृष्टेरेव स्वीकार्या प्रयोगो
पाध्यास्तत्त्वगवादाविव साधुत्वाधुत्वार्थः। सांगत्वोपबर्हणावेसाम्यात्तथैसेदृशाधिकेशवादिनाम्नारूढानामपि तत्तत्र
त्रयोगोपाध्यांगप्रपद्भिः केनापि योगेन प्रवृत्तिसंभवस्तत्त्वेवतस्य साधुत्वमित्यालोचयद्भिः सांप्रदायिकैरु
द्भिदादौ रूढे पियोगोपाधाः कृत इति किमाश्चर्यं। न च रूढ्या विना संज्ञात्वं संभवति। डित्थादीनां वाचकादीनां च प्रवि
शेष्यकप्रतीतिहेतुत्वेऽप्यपि डित्थादीनामेव संज्ञात्वव्यवहारात्। अत एव दर्शपूर्णमाससमभिव्याहारेन शब्दानामाकरे का

लसंबंधदेवतासंबंधहेतुकलक्षणाप्रसंगो ऽपा च पङ्कजस्य पादनेपि रूढत्वमेव तत्तत्वा मऽत्पा अथ तृतीयां लक्षणा।
भाट्टा· रूपस्यास्त्र प्रसिद्ध्यर्थस्यागेन नामधेयत्वस्याकास्मिकत्वनिरासार्थं। अन्यत्र प्रसिद्धस्य हि सहसैवार्थान्तरस्याचि
८५ त्वं दुर्ग्रहं पूर्वं प्रसिद्धस्यैव कथंचित्संभवत्रवृत्तिकस्यानुसुर्यं रूढत्वादित्स्यानुभवसिद्धमेतन्न सहृदयानां। अतो न यो
85 गिकत्वेनोद्भिदादिरसामानाधिकरण्योपपत्तिरिति चेन्न दुपसर्गाद्यवयवानां ऋतुशक्तिभिरेवसंभवत्यत्र हन्ति
कत्रोद्भिच्छब्दस्य प्रकरणीशब्दस्यार्थे न रूढिकल्पनायोगात् संभवतिविषयेऽदिकं कर्मीतस्य लसाधनमिति व्याप्ति
बलादवगतं सामान्यतः फलोद्भेदनकारित्वं निमित्तीकृत्य सोद्भिदादयः प्रवृत्तिः विधेयफलविशेषयश्रूद्भेदकत्वप्र
त्यज्ञानज्ञापकत्वं पुरुकं च गोदध्यादिष्वादेषु लोकमोरूढत्वपापप्रसिद्धेषुप्रयोगं शास्त्रस्याविवक्षात्वीकरणं ननूद्भिच्छब्द
स्यरूढिप्रसिद्धिः कृत्रि।येन तत्क्रोचरयोगोयस्यास्वस्यसाधुत्वसिध्यर्थत्वं कल्प्येत न च संज्ञात्वे रूढत्वं नियामकं। ङित्से राम·
यमिति ङित्स्येदम् शब्दयो रूढत्वेतुल्येऽपि परिच्छेदफलकेङित्यशब्दएवसंज्ञात्वव्यवहारेणतत्स्कलतायाएवसंज्ञात्व ८५

नियामकत्वावधारणात्। न च दर्शादिपदे लक्षणास्वीकरणमुचितं तथा सति पिंडपितृयज्ञवाक्ये अमावास्यापदस्य फ
लकस्य नामधेयेन कर्मपरत्वापत्त्या पिंडपितृयज्ञस्य दर्शांगत्वप्रसंगात्। तत्र साधोनिकत्वेनैवोद्दिष्टस्य मानाधिक
रण्यपदस्याधिकार्थत्वं च वाच्यम् अन्यथा हि तत्स्य चेति। तच्छब्देन प्रकृतविधिवाक्यस्थ उद्दिष्टः सांगयागादिकपापरामृश्यते
एतद्वाक्योक्तस्य प्रकृतवाक्यांतरेहि श्रूयमाणा उद्दिष्टहोमयोगे न यजिसामानाधिकरण्यपगच्छेदपि नत्विह श्रूयमाणः। नत्व
स्याद्वाक्यात्पूर्वं सामान्यतोपि फलसाधनत्वावगमे संभवति वेदविहितत्वात्मकवैदिकत्वस्येतः प्रागसिद्धेः। अन्यथा द
र्शस्यापि प्रयोजकत्वात्। न च सोमवाक्यात्साकं सोमयागयोः संबंधानवगमेपि सोमवतायागेनेति वाक्यार्थोपपत्तिर्व
उद्दिष्टवाक्यात्साक्षात्फलसाधनत्वानवगमेपि फलोद्देशेन कादिनायागेनेति वाक्यार्थः किं न स्यादिति शंक्यं वक्ष्यतः पूर्वप्र
वृत्तेनानुमानिकविधेयत्वाविधिमात्रसिद्धेः सोमसंबंधमात्रविधिविषयत्वोपपत्तेः। न चैवमुद्दिष्टविधेः प्रापकफलसामान्यसंबं
धप्रापकः कोपि विधिः प्रवृत्तोस्तीत्यन्विहाप्युत्पत्तिविधिरेतमेयः। उक्तं हि नावश्यमिकोपादाधिकरणोविनियोगविधिना

भा॰द्वा॰
८६

ष्युस्याग्निविध्यनुमानमिति चेन्नायंतोऽप्युक्तं सोमस्यातिद्रूयागांगत्वसिद्धौ विशेषस्य विध्यानुमानानंनत्युक्तत्वा
त्सोमयागविशेषफलविशेषयोः संबंधेऽगमितेऽपुनर्यागस्वरूपावगमः फलसामान्यसंबंधावगमो वा स्पष्टापेक्ष
ते यत्सिद्धौ विध्यनुमानस्यात्तावत्ततः सोमवाक्यादपि न कस्मिंश्चिद्वाक्यजबोधमपेक्ष्य स्वार्थबोधकत्वं लप्स्य
स्येतदधीनप्रतीतिकत्वेनेतरेतराश्रयापत्तेः। किं तु स्वजन्यमेव प्रथमं बोधमपेक्ष्य। उपपादितं चैतदधस्तात्। तान्
च सोमेन यजेतेति वाक्यात् सोमेन यागं कुर्यादिति प्रथमबोधात् सोमयागसंबंधश्चोद्भिदादिनिमित्तत्वेनाभिमतः फ
लसामान्यसंबंधोऽप्युद्भिदादिवाक्यजप्रथमबोधाल्लभ्यत इति साम्प्रतम्। उद्भिदा पशुकामो यजेतेत्यनपेक्ष्य यजेतेति पदस्या
प्रमाणत्वात्। अनवगतप्रवृत्तिनिमित्तस्योद्भिदस्य फलविशेषगमकस्य च पशुकामपदस्य फलसामान्यसंबंधा
ऽपेक्षायोगात्। अत एवोद्भिदस्य यागेन यजिसामानाधिकरण्यमिति हृदयेऽवधेयं तज्ज्ञाच्यं। साधुत्वनिर्वाहाय तु स्वी ए॰म॰
क्रियमाणो योगः कामं वा कांतरेणानुरूपां प्रतीतिमादध्यात्। गवाश्वादिवत्साधुत्वार्थं स्वीक्रियमाणो योगः कथं प्र ८५

तीतिजनकत्वमिति चेन्न। किंमोपगवादिपदगतोपयोगस्तोन्तो प्रतीतिजनयन्न साधुत्वार्थः। किमिति न हि गोपदगतयो
गस्यालीकत्वमिति चेन्न ममृणु पोगोनामानेकाषपवशक्तीनां समुदायः। तास्च कार्यैकगम्याः। तत्र गमेडौ इत्यनुशा
सनेन सत्यपि नडोपस्यपस्य कत्रीद्भिमाक्तिः। तदनुसारि प्रतीतेः पदांतरं गोपदेवादर्शनात्। एवं महीनद्यादिपद
गतस्यापि योगस्यालीकत्वं वोध्यं। उद्भिदादिपदगतानां पवशक्तीनां तु उत्से पणं विभिन्नं शास्त्र विदिहि तु प्रयोगे पुप्रत्येकं
तज्ज्ञानकानां मुद्भित्पदजन्यप्रतीतिविशेष्ये च संभवदर्थकाणों नगपादावध्यकर्णादाविवरूढेप्युद्भित्पदेशको
पलापः। एवं पद्मत्वप्रकारकप्रतीतिजनकतया रूढेऽपि पंकजपदे न योगापलापसंभवः। न त्विदं योगरूढोप्युद्भिच्छब्दः
प्रकृतवाक्ये रूढ्या यागीयविशेषरूपं प्रतिपादयन्न लेतीतिनत्तस्य पञ्चाधिकार्थत्वेन सामानाधिकरण्यसंभव इत्याशयः
। नन्वेवमपि व्याप्यव्यापकजातिवाचिनोरुद्भिच्छब्दयजिधात्वोर्लक्षणयैकव्यक्तिपरत्वात्कथं न नीलोत्पलसामानाधि
करण्यमुत्पलत्वमत आह। यज्ञपवग नेति। यद्यपि यजिधातोर्न यागीयविशेषरूपं वाच्यं तथाप्यवगतं तावतैव न। ततोन

वगतेतास्मिन्नुद्दिश्यदस्य शक्तिग्रहायोगात्ततश्च स्वस्यापि वाच्यभेदेन नीलोत्पलवत्सत्वस्य गुणिवाचार्थत्वेन सामानाधि
करण्यमित्यर्थः । येऽप्युद्देवीति । यद्यपि तद्धितस्य शक्तिजन्यप्रतीतिः स्वोत्पत्तौ आक्षिप्तापदमपेक्षते । यजिधानुजन्यप्र
तीतिस्तु स्वपर्यवसानाय नामेत्यस्तिवैषम्यं । तथापि स्वानधिकार्थसमर्पकमपि पदं देशेन स्वसमानाधिकरणतयाऽपे
क्ष्यत इत्येतावतासामर्थ्येनैव दृष्टान्तः । न तु यथैवोद्भिदादिविधिविधेयस्य फलोद्देशेन कार्यत्वस्यतथैवमांद्विलदेनास्ति उद्भि
र्दृशास्तथैवैतद्विधिविधेयस्य विशेषरूपस्य कथमंशेत्वे तेन सिद्धवन्निर्देश इत्यत आह समर्पकत्वेनेति ॥ विध्यपेक्षितरूपे
णार्यत्वं समर्पणाफलोद्देशेन कार्यत्वस्य हिंसाधनतात्मकस्य यागेनेति यागं प्रतिविशेष्यतयावतीयमानस्य क्रियान्वय
योग्यत्वात् विहितावस्थत्वं हठात्करणादिभावेऽर्थवोद्दिश्यदेनयागोपसर्जनतयावतीयमानस्य च सिद्धावस्थत्वमिति संभव
दवस्थाद्वयस्य विधिनाऽसिद्धावस्थस्यैव विषयीकरणाद्धकानन्तैव सिद्धवन्निर्देशा उपपत्तिः । विशेषरूपस्य तु येऽजातसान्यनो
भाद्गुनानामधेयेन वा यागविशेषणत्वमन्तरेणाप्रतिपत्तिसिद्धत्वाद्द संभवदवस्थाद्वयस्य यागविशेषणतयैव विधिनाविष

णीकरणान्नासिद्धवान्निर्दिष्टानुपपत्तिः। ततो यथा कारकान्वययोग्यस्य द्रव्यादेर्विनियोगं कर्तुं विधिः कारकविभक्त्यं-
तपदेनैव तदर्पणमपेक्षते कारकान्वयायोग्यस्यानुक्रमस्य हिंसादेः पदार्थान्तरविशेषणत्वेनैव तदर्पणमपेक्ष-
त इति तस्य तस्य तदर्थे वार्पणं समुचितं तथा यागादेरुत्पत्तिकर्तृयागविशेषणत्वेनैव वैजात्यार्पणमपेक्ष्यत इ-
ति वैजात्यस्य तदर्थे वार्पणं समुचितं कुर्वतोनाम्नः संभवति सामानाधिकरण्यमित्याशयः। विप्रकृष्टार्थे विध्यापत्तेर्हे-
तुरूपस्य विधानादिति। पारार्थ्यं चोत्तरस्यपसाधुत्वार्थत्वं तदापत्तावानर्थक्यापत्तिर्हेतुः। आनर्थक्यं चाभिधेयता-
चरतात्पर्यशून्यत्वं चोभिन्नक्रमः पारार्थ्यापत्तेश्चेति। स्वार्थतात्पर्यवत्तो द्विधानुपपत्त्यो विनिगमनाविरहादुभावपि प-
रस्य साधुत्वसंपादको भवतः। न त्वन्यतरस्यैकान्तिकं परसाधुत्वार्थमवधारयितुं शक्यं स्वार्थतात्पर्यशून्यत्वेन तुपस्तयो-
र्निर्णीयते स एकान्तेन परसाधुत्वार्थो भवतीति न चैतन्न्याय्यमित्याशयः। यद्यपि स्वत्वस्यापि यागस्याश्रयत्वेन तत्स्वत्वकारणल-
भ्यत्वान्नधातोराश्रयतया स्वार्थसमर्पणपरत्वमिति परिहारः संभवति तथापि वाक्यभेदापादकं समभिव्याहृतधातो

भा॰ द्वा॰
८८

राश्रयसमर्थकत्वमहृदयेनैव शंकितमुचितः। अहृदय्या वांचपरिहारस्तादृश्या अभिरेवकर्तुमुचितः।। यथा सोमिके
ष्टिषु देवतापरिग्रहार्थमन्वाधानं कार्यमिति शंकायाः परिहारार्थमुक्तमाकरे दीक्षणीयायेवं देवतापरिग्रहार्थत्वाभि
ष्टेर्न तत्कार्यमिति पक्षे तत्रोन्वाधानेदीक्षणीयायां च देवतापरिग्रहार्थत्वस्य स्तुतिमात्रत्वादित्यभिप्रेत्याहानेनेत्यत्र स्य
मिति भावनान्वयपरित्यज्य गुणाकारणानावच्छेदकरूपनिरूपकत्वेनान्वयः वाक्यस्य इत्यर्थः। वाक्य गम्येदृशान्वयकल्प
नास्यदृष्टेतिगम्यभावनान्वयनिर्वाहकस्य कारणात्वस्यैव कल्पनमुचितमित्याशयेनाह आश्रयत्वेत्यादिना निष्कृष्ट
शक्तितो पश्या स स्व श्रो तभावनान्वयनिर्वाहकत्वोपपत्त्यर्थः। तथापि यागांतरं कल्पनानिमित्तं गोरेवमस्येवतत्त्वावगो
रवस्यको विशेषइत्यत आह॰ किं चेति॰ तृतीयांत इति तृतीया शब्दो तृतीयांतपरो॰ तृतीयांतत्वार्थगुणवचनेति सूत्रस्य
शाद्वचन॰ तृतीयांतशब्दादरुणा चेत्यादेरुपस्थितदर्थविशेष्यकाम–कलेनतियाः यत॰ तृतीयांतस्यैकदापन्येत्यादिः प्रतीतिस
संगादित्यर्थः। अरुणायेति॰ तृतीयाभिहितस्य कारकस्य क्रियान्यान्वयनियमायुक्तः स्कस्या सामानाधिकरण्य बाधः। यदितुत

राम॰
८८

स्वक्रियान्वयेनाप्यन्वयो घटते तदाकांक्षायोजिनामेन सामानाधिकरण्यानुग्रहार्थं एकहायन्येवान्वयः स्यादिति भावः । अत एव च
साक्षात्क्रियान्वयमकारकस्य समर्पकत्वादेव ननु पदिकानुपारार्थ्यादिदोषान्तरे गुणविधित्वनिरासः कथं तर्हि मत्वर्थलक्ष
णाप्रसंजकविच्छित्तिविध्याख्यगुणविधिप्रकारं परेण स्वीकारयति · अतश्चेति · तत्र हेतुं पूर्वोक्तदोषानाक्रान्तत्वमाह · न
याचतीति · इत्थं गुणविधिप्रकारेभ्यो ऽप्यामानव्येव प्रकारेण न हद्रव्य मद्रितिवक्तुं · तस्य मत्वर्थलक्षणाप्रसंजकनामाह · अतश्चे
ति · नागस्येति · नन्वेकस्या अपि देवताया अनेकद्र— निरूपानेकसंबंधानुपपत्त्यानेकयागकल्पनेयोचिता ततः कथं यागस्यै
कवचनेमिति चेत् · तत्र केचित् · एकवचनीतेवीसाश्रूयेन तद्दिक्त्वनेनद्ध्यादीनां बहूनां परामर्शामिंत्रवा नपुंसकलिंगेन च ·
तेन शास्त्राग्निं मरुतादिति अभिगते तथा स्यादितिशब्देन बहस्याइव यथानामं दुल्लनिर्दिष्टायोगाद्द्ध्यादिविशिष्टसंस्कृष्टमेव परामृ
श्यचदेवतासंबंधयाउद्भिद्धृक्षस्य नामत्वमितिवतितेस्तासां कादूष्टितगुणाधिमकारभित्रमत्वर्थलक्षणा एवेतिष्वक्तमेततत् ।
उपयादितं च यागैकत्वमाश्रित्येकेमधूरकाधिकरणोपवार्तिकत्वकृद्भिरिसाहुः । अन्ये त्वाहुः । षष्ठ्यन्तनिर्दिष्टां विनावष्यादीनांपरविशेष

भा०द्वा० णत्वायोगाद्विशेषणमंतरेणानिरूपितरूपस्य संसृष्टस्य देवतान्वयानर्हत्वाद्देवतेत्यसमभिव्याहारसंसर्गात्रवादत्वेन चैतं
८९ सृष्टपदस्य संभवात्सर्वनाम्नश्च निर्दिष्टप्रतिनिर्देशस्वभावत्वात्सर्वनाम्नात दिसयनेनरुष्ट्यादीन्येव परामृश्यंते। न चैकवचनानुप
89 पत्तिः। वीप्सांगीकरणात्। कथमनुत्पन्नं गीकार इति चेत्। शृणु वीप्सयाप्रत्येकरूपेणानेकार्थपरामर्शेनास्यैव निर्णयः कार्यः स
स्वेह सर्वनाम्नो निर्दिष्टप्रतिनिर्देशस्वभावेनैव सिद्धः। स्वीक्रीयते नेत्यसौ प्रभुगणोऽग्निगुरुत्वमात्रारिक्षाद्धविनेत्रवीप्सायास्संबंधिकार्था
भिधानस्याभावात्। न चाप्रवृत्तिनिर्देशान्तं तुल्यानामेव परामर्थकापातात्। बलवत्समाश्रयाबाधस्य चानर्थक्यस्य तर्क
वर्शः स्यात् क्लीबत्वाद्धायानां तं तुल्ययामैव परामर्शः स्यादिति शंक्यं। निर्दिष्टानां मध्ये कस्यचित्सर्वनाम्नापरामर्शाभावे तन्नि
र्देशस्यानर्थकतायाश्चनाश्चर्यत्वात्। लिंगस्य च शब्दसाधुत्वार्थत्वसंभवात्। अस्तु वाचीस्यगीकारः पाशान्यायेन प्रधान रा०म०
तयानुरूप्यतयाच बलवत्त्वात्तियदिक्कानुरोधेन लिंगसंख्ययोरुभयोर्विवक्षायाः सुवचत्वात्। यदित्वविवक्षायां न तुष्यसि ८९
। तदाभवत्वोपचारिकत्वेन नयोर्नयानांयथोक्तहाद्दशाद्युष्टीकायां। अथैकदेवतत्वाल्लक्षणयालक्षितलक्षणया

वोपपन्नमेकवचनं लिंगं चेति आख्यातं चेतन्मिश्रैः। तच्छब्दो यदि संनिधानात् स्वगुणवचनस्तत्तल्लक्षितसंनिहितद्रव्या
दि लक्षितं तदेव नाभिप्रायं लक्षितलिङ्गायैकवचनं। अथ संनिहितद्रव्यवचनस्ततो लक्षणया लिंगं त्वेकदेशगतं समस्ते
भूचर्पप्रयुक्तमिति। अन्ये स्तु तच्छब्दस्यान्यतिवचनत्वे प्रथमः कल्पो विशिष्टवचनत्वे द्वितीय इति व्याख्यातां व्याख्यां दूषये
य्यघकल्पोक्तिः। अस्तु पैरस्य वादः। तस्यापि तच्छब्दस्य संनिहितत्वप्रकाशकवोधजनकत्वे संनिधावदृष्टप्रयोगस्य तस्य स्तु
षापदस्य पुत्रवाचित्ववसंनिधिवाचित्वकल्पनानुपपत्तेः। घटस्तु ज्ञाकाशाशब्दजनितोपस्थितीरपेक्ष्य प्रवृत्तेन तच्छब्दे
न कचिज्जात्यभिधानं कचिद्गुणाभिधानं कचिद्द्रव्याभिधानमित्यनेकाविधत्वाक्तिग्रहात्सर्वत्रैयेन रूपेणायदुपस्थितं तेन
सर्वथैवं देवतो न वाच्यैः संप्रदाने कस्मात्सा आधारेणैव स्वात्मना केवलं यजिविषयं संप्रदानं भवति। न ह्येतस्याः
क्रियासाधनतास्तत्समकारकासंभवाच्चैवं कल्प्यत इति न च गौणसंप्रदानत्वं देवताया अभिप्रेत्यैवं ग्रन्थ इति शक्यं
। यच्चान्यस्मै प्रतिश्रुतमित्यत्र प्रतिगृहीतुरिव देवताया अपि गौणसंप्रदानत्वमाहुरित्यर्थ इत्ययोक्तयं ग्रंथस्तु के-
वलशब्दस्य न्यायपद्धतिकृता व्याख्यानात् अन्यथा दाननिरूपितसंप्रदानत्वं प्रतिगृहीतत्वघटितं यजिनिरूपितं तु
न तद्घटितमिति द्विविधं संप्रदानं संप्रदाने चतुर्थीति सूत्राच्चतुर्थीवाच्यमिति चतुर्थ्या अपि तद्धितवद्देवतावाचित्वात्क-
थं दौर्बल्यं। अत एवासज्यमानाद्युद्देश्यत्वेऽपि प्रतिगृहीतत्वमेव संप्रदानत्वं तदभिधानं तु ददातिसमभिव्याहृ

मा द्वा· नचतुर्थ्यामेव नस्त्रीकुर्मः। प्रतिग्रहफलोपहितत्यागाभिधायितयाऽवश्यमुपेयस्य ददातेः समभिव्याहाराद्दे
११२ वोद्देश्यत्वमात्राभिधायिन्या अपि चतुर्थ्या उक्तविधसंप्रदानप्रतीतिपर्यवसानसंभवेन त्यज्यमानद्रव्यांशस्येव
प्रतिगृहीतृत्वांशस्याप्यभिधानांगीकारवैयर्थ्यात्। यथैव च यजिसमभिव्याहारे त्यज्यमानतयावगतं द्रव्यं जु
112 होतिसमभिव्याहारे प्रक्षेप्यतयाप्यवगम्यते तत्कस्य हेतोः। जुहोतेरेव तदभिधायित्वात्। न तु द्रव्यविनियोज
कशब्दशक्तिवैचित्र्यात्। तथैव यजिसमभिव्याहारे त्यज्यमानद्रव्योद्देश्यतयावगतस्य चतुर्थ्यन्तार्थस्य ददाति
समभिव्याहारे यत्प्रतिगृहीतृत्वमपि प्रतीयते तद्ददातेरेवाभिधायित्वात् न तु चतुर्थ्यास्तत्त्वात् एवं च चतुर्थ्या उ
द्देश्यत्वमात्राभिधायित्वे सर्वेभ्यः कामेभ्य इत्यादिना दर्श्यचतुर्थ्याः शब्दान्तरकल्पनागौरवमपि परिहृतं भवति।
अस्ति च देवतायागं प्रत्युद्देश्यत्वमिति कथं चतुर्थ्या देवतासमर्पणे लक्षणाप्रसक्तिरितिमेव चतुर्थ्यास्तद्दृश्य ए म·
दपि देवोद्देश्यं प्रत्युत तद्धितचतुर्थ्योर्देवताभिधायित्वे तुल्ये चतुर्थ्याः क्रियान्वयिदेवतात्वाभिधानात्तद्धितेन तु मिमां ११२

स्तकेर्द्रव्यविशेषणतया देवतात्वाभिधानांगीकारात्क्रियान्वयिका। काभिधायिहविर्नीयावचनात्तदनन्वयिकारका
भिधायिनः शेषित्वाभ्युपगमस्यादिनिष्ठप्रत्ययस्य न विनियोजकत्वमित्याकरे निरूपणात्तद्धितस्येव चतुर्थ्यपेक्षया
दौर्बल्यं किं च विधिशब्दस्य मंत्रत्वेऽत्राधिकरणोक्तन्यायेन सर्वस्य देवताविधेश्चतुर्थ्यन्तशब्दोच्चारणाविषयत्वात्तद्धि
तस्थले च नादृशशब्दस्य कल्प्यता चतुर्थीस्थले तु नादृशशब्दस्य क्लृप्तत्वात्तद्धितस्यैव दौर्बल्यं॥ इति तद्धितचतु
र्थ्योर्बलाबलाक्षेपः चतुर्थीमंत्रयोरपि न बलाबलसंभवति। ननु तद्धिचतुर्थ्यो कथं चिद्देवतात्वाभिधानान्मंत्रेणाभि
धानमात्रप्रकाशकेन सर्वथा तदनभिधानादिति सांप्रदायिका वर्णयंति। अयुक्तं चैतत्। अग्नये स्वाहेत्यादिमंत्रेष
पि केषुचिद्देवतात्वाभिधानसत्वात्। यत्रापि अग्निर्ज्योतिर्ज्योतिरग्निरित्यादिमंत्रेषु न चतुर्थीश्रवणात्तत्रापि पाठाद्वच-
ह्ना मंत्रांते वषट्पठनीयस्वाहादिशब्दोपस्थाप्यप्रदानक्रियायाः तत्पदार्थान्वितरूपेण प्रकाशनसिध्यर्थमवश्यमप्या
दिपदोत्तरविभक्त्या लक्षणया देवतात्वमुपस्थाप्यते। तथाविधप्रकाशनस्यैकवाक्यतापादकत्वात्प्रधानविध्यपे

भा.टी.
११२

113

स्थितत्वाच्च। ततश्च निष्कृष्टदेवतालोपास्थितस्य चतुर्थ्या मंत्रे च लक्षणाश्रयणस्य तुल्यत्वात् कथं मंत्रस्य दौर्बल्यं
विधिसमभिव्याहाराद् ब्राह्मणगता चतुर्थी बलवतीति चेत्। तस्माद्देवहेतोर्ब्राह्मणगता द्वितीयापि बलवत्त
याकथं न व्यवह्रियते। वस्तुतस्तु यद्देवविधिना यागो होमो वा विहितस्तद्देवतात्रिणीतं चतुर्थ्यंतं कंचिद्देवता
शमुद्दिश्यार्यहविस्त्याज्यमिति। कोसौ शब्द इति शब्दविशेषमात्रमन्यतः प्रार्थ्यते न तु तस्य चतुर्थ्यंतत्वं विधिविष
यत्वं वा। प्रागेव सिद्धत्वात्। यथैव सच मंत्रकपदार्थस्थले मंत्राणां प्रयोगकाले स्मारकतया तदंगता। मंत्र
क्रमेणैव क्रमश्राश्रीयते न ब्राह्मणक्रमेण। उक्तं हि पंचमे ब्राह्मणक्रमान्मंत्रक्रमस्य बलीयस्त्वादाग्नेयं हुत्वैवा
ग्नीषोमीयः कर्त्तव्य इति। तथैव यागाद्यनुष्ठानकालीनदेवताप्रकाशनार्थमंत्रस्य ब्राह्मणादंतरंगत्वादुक्तशब्द
विशेषाकांक्षायां मंत्रगतः शब्दविशेष एव यागादिविधिना स्वीकर्त्तुमुचितो न ब्राह्मणगतः। संगच्छते चैवं स राम.
ति पार्वणौ जुहोतीति विहितयोरपि होमयोरमावास्या सुभगा। ऋषभं वाजिनं वयं पूर्णमासमिस्ममावास्यापू ११३

र्शमासप्रदेयेन मंत्रकपोऽमावास्याया इदं पूर्णमासापेदमिति सांगानुष्ठानं एकं फलयाज्ञिकानां। अतस्तद्विनाद्
विना दुर्बलो मंत्रोन तत्र चतुर्थ्या इति। एवं सफलमपि देवता निरूपणं मिमांसकानामभिमतं संगच्छत इति। अत्रोच्यते
। प्रधानलोपप्रयोजकव्यतिरेकस्तु तियोग्युद्देश्यविशेषविषयत्वं देवतात्वं। निरूपितं त्वेतन्न संभवे। अग्नये इत्येवंरूपो
द्देशाभावे सत्याग्नेययागालोप इति। संप्रदानत्वाभिमतत्वाग्नेर्णस्य च चेत्तापेसैवं रूपोद्देश्यविशेषव्यतिरेकेपि न
दानलोप इति। अंगांतरव्यतिरेक इव तस्मिन्नसति प्रकृत्यत्वापादानविशिष्टस्य त्यागात्मकदानस्य सिद्धिसंभवात्
। यद्यपि चंद्राभ्युदयविशिष्टदर्शप्रयोगनिरूपदेवतोद्देश्यव्यतिरेकेपि न प्रधानलोपः। तथापि प्रयोगांतरेण व्यतिरे
कप्रयुक्तस्य प्रधानलोपस्य स्वीकारात्तन्न क्षतिः। अथास्तु मूलकृत्वेन विशेषणीयो व्यतिरेकः। वन्हय इत्युद्देश्यव्यति
रेकस्य चाग्नेयलोपप्रयोजकत्वाभावात्तादृशोद्देश्यविषयैति पूर्वपक्षिणः। यद्यपि नैन्द्राग्न्यादि द्युद्देशः सोमयागत्वेन विहि
तः। तथाप्युभयाकांक्षयागयोः साध्यसाधनभावनियमस्यावश्याभ्युपगमत्वादस्येन्द्राग्न्यादिदेवतोद्देश्यव्यतिरेकस्य

भा॰ द्वा॰ ११४

114

स्वप्रवृत्तिप्रयोगित्वाद्ध्यप्रधानलोपप्रयोजकत्वमिति तेन तात्वप्रसंगोऽपि। यद्वा यादृशोद्देश्यो यज्जातीयक्रियासाधनत्वेन
वेदबोधितः। यदा यत्तादृशोद्देश्यविषयत्वमात्रेण तज्जातीयक्रियाकारकत्वं तदा तज्जातीयक्रियायाः देवतेति यादृ
शोस्क — यज्जातीयेस्तु ज्ञया चाग्नेययागे पावकादेरुद्देश्यविषयस्य देवतात्वनिरासः। न हि तादृशोद्देश्यविषयविधि
विधेयतावच्छेदकीभूतवैजात्यविशिष्टकर्मणि कारकं भवति। विषयत्वान्यथापारनिरासार्थं नमात्रं चाचतंप्रदा
मनिरासः। इंद्रवाय्वाद्युद्देश्यसांगत्वेन चेद्वेदबोधितत्वाभावेऽपि साधनत्वेन तद्बोधितत्वमस्त्येवेति तेन तात्वप्रसंगोऽपि। य
दायदिस्कन्नानामभ्युदयेष्टिप्रयोगान्तर्गतदर्शयागव्यक्तित्वनिसाग्न्यादीनां देवतात्वप्रसंगः। अभ्युदयेष्टिप्रयोग
कालेनांशानिस्वप्रयोगकृष्णोद्देश्यविषयत्वेन तत्तद्विधिविधेयतावच्छेदकीभूतवैजात्यविशिष्टतत्तद्यागकारकत्वा
भावात्। यद्वा दानत्वाभ्याप्यस्यागवृत्तिविधेयतावच्छेदकीभूतजात्यवच्छिन्नफलोपहितोद्देश्यविषयस्तज्जातीक्रिये राम॰
याद्देवतेति दानवृत्तिवैजात्यावच्छिन्नफलोपहितोद्देश्यविषये स्वप्रदानेतिप्रसंगवारणाय दानत्वाव्याप्येति इदं होत्रेइद ११४

मद्घर्यवदिति विभागक्रियोद्देशविषयेति प्रसंगवारणाय स्यागवत्तीति विधेयताविशेषणं न तु जातिः। तथा स
ति क्रियात्वमादाय दोषतादवस्थ्यात्॥ दर्शस्य निस्यप्रयोगे वक्तृप इत्युद्देश्यसाम्भुदयनिमित्तकप्रयोगे अग्नय
इत्युद्देशस्य तादृशजातस्य वाछित्रफलोपधानाभावान्न तद्विषये प्रजिप्रसंगः उद्देशाश्च तुर्थ्यन्तपदजन्याया एव प्रार्थ्य नि
रूपकत्वप्रतीतिः। तथैव याज्ञिकनिबंधव्यवहारात्॥ न च धूम्रसादिहोमे तदसंभवः। अछंदोगपरिशिष्टवचने गोभि
लसूत्रतद्भाष्यानवचोनुसारेण न्यायमूलकत्वमंगीकृत्य मंत्रगतं चतुर्थ्या निषेधकत्वस्य वक्तुमोचितत्वात्। अ
नुक्तवासागकालीन च चतुर्थ्या निषेधकत्वं। तथापि तादृशोद्देशस्य भावार्थत्वे सन्निपत्यादिविभक्त्यंतरोपस्थापि
त चतुर्थ्यन्तजन्यमंतं इति मादाय शाकताएव धूम्रादिहोमे प्रकृतिविधोद्देशो निरूपितुं स्वाच संप्रदाने प्रमात्मेक
दिवनायानुश्च आहायविपात्मिके तिभेदः अत एव वेदबोधित तत्साधननाकारोपात्मकोद्देश्यविषयत्व द्विवतेरपि लक्षण
सिद्धिः। वेदबोधितेरुक्तपानिस दर्शप्रयोगेव कृप इत्युद्देशविषयेनानि प्रसंगः। तच्छद्देव्यक्तिग्रहणान्नाभ्युदये हि प्र

योगेग्नय इत्युद्देश्यरूपे विषये निप्रसंगः। साधनताग्रहणान्नेंद्रवाय्वादिष्वप्रसंगः। आरोपग्रहणात्तु प्रदाने विभागक्रियोद्दे-
श्ये च नातिप्रसंगः। उद्देश्यग्रहणाद्दर्शादिकर्मानेसयागसाधनीभूतारोपविषये द्रव्यपात्रादौ नातिप्रसंगः। शब्दस्य वि-

धेयत्वे सत्येवार्थाश्रितत्वमेवोक्तलक्षणादेवतात्वनिर्वाहाग्नेदेवतात्वमर्थविधिमपेक्षते। भवति च तदाश्रितं। नदेवतेत्य-
धिकरणोयापि मिश्रोक्तिः। पापदर्थे विहितत्वात्तस्य देवतेति। यत्साधनत्वेन विहितोद्देश्य विषयीभूतायां सैवं सापिमात्वे-

या। संगतश्चैवं सति विधिशब्दस्य मंत्रत्वइत्यधिकरणोमिश्रोक्तिः। अर्थस्यप्राग्वेपिशब्दएवास्मिन्वाके हविस्तांगंगतया वि-
धीयते। तद्विधाने चार्थस्य देवतात्वंशाममनूद्यत इत्यादिकाया। पार्दृश्येवाविधेयत्वाग्रयणाच्चाग्नये पावकायेत्यादौ विनिग-
मनाविरहेणोभयोरपि शब्दयोरेकविधिविधेयतयासाहित्यविवक्षायां न विकल्पापत्तिः। अस्तस्यापूर्वस्याविधेयत्वे तदन्वि-
तदेवतात्वस्यैव विधिसमभिव्याहृतान्तद्धिताभिधेयत्वादर्थान्वितदेवतात्वाभिधायिचतुर्थ्या विधिविधेयत्वादर्थगतदेवता-
त्वमेव विधेययागशरीरपर्यवसानादपेक्षत एव विधिरर्थगतं विशेषं। अतः संभवत्येव तत्प्रतिपादकानां मंत्रार्थवा-

दानां त्वार्थे प्रामाण्यं नावमिकत्माय तत्र विध्यनपेक्षिते देवतायाः फलदातृत्वादौ तत्प्रामाण्यं निराकार्थनयानेयः। अ
त एव विध्यनपेक्षितेऽग्न्यादिदेवतानां तत्तत्कर्माधिकारेण तत्रैव विध्यपेक्षोपात्तप्रामाण्यसंभवान्। तदनुरोधेन
शब्ददेवतात्वसिद्धिः। शब्ददेवतात्वानाश्रयणाच्च न तत्रोत्तरपूर्वोक्तान्यतमदोषप्रसक्तिः। इति देवतात्वलक्षणानन्तरा
क्षेपाक्षेपपरिहारः॥ यत एवार्थस्य देवतात्वविधिनासौ विधेयः। अत एव तत्तद्देवतात्वं च तत्तद्धितस्य न विनियोजकत्वे
न प्रामाण्यं। विधिभिन्नस्य हि विनियोजकत्वं विधिसहकारित्वेनैव वाच्यं तृतीयादिवत्। अयं च न विधेर्विषयः कथं तत्र वि
धिसहकारितयाप्यस्य प्रामाण्यं स्यात्॥ कथं तर्हि तस्य प्रामाण्यमिति चेत्। विधेययागशरीरपर्यवसानाय विध्यपेक्षितं अ
नधिगतं अबाधितमर्थविशेषान्वितं देवतात्वं पदं तत्र मनपेक्ष्य स्वशक्त्यावबोधयतः कथं प्रामाण्ये विवादः। न हि विधाय
कत्वविनियोजकत्वविनियोगाभिधायित्वानामन्यतरेणोपकारेणास्य प्रामाण्यमिति राजाज्ञास्ति। प्रकारत्रयमप्र
न्यस्यापि यद्दुःखेन संभिन्नमित्यादेः स्वर्गस्वरूपे प्रामाण्यस्वीकारात्। तादृशस्वर्गोद्देशेन यागविनियोगपद्धतीति प्रयोज

भा० हा०
११६

116

कत्वादस्तिपरंपरया तस्यापि विनियोजकत्वमिति चेत्। भवतु न हि चतुर्थ्यंतस्य विशेषविनियोगप्रतीतिप्रयोजकत्वात्त
द्धितस्यापि तादृशं विनियोजकत्वं। सर्वथाप्यर्थविनियोगेनास्य प्रामाण्यमित्यविवादं। अत एव चतुर्थ्या उपसर्जनकारका
भिधायित्वेप्यस्य न क्षतिः। तृतीयादिवद्विधिसहकारित्वेन प्रकृतस्यार्थविनियोजकत्वे हि क्रियान्वयिकारकाभिधानम
पेक्षणीयं स्यात्। न च नाम्न एवकारकाभिधायित्वं प्रकृतस्यार्थान्वितद्रव्यमात्राभिधायित्वादिति शंक्यं। संबंधसामान्यवि
हिततद्धिताद्देवतातद्धितस्य विलक्षणप्रतीत्यजनकत्वे पृथगेतदुशासनवैयर्थ्यापत्तेः। देवतात्वस्य प्रकारतया तत्त
द्धितजन्यप्रतीतावनुभवसिद्धत्वाच्च। अन्यथोपगव इत्यादितद्धितस्यापत्याद्यर्थवाचित्वमपि न सिध्येत्। शक्यते हि प्रकृ
तिप्रत्ययार्थयोः पुरुषयोः संसर्गतयापत्यत्वं भासत इति वक्तुं। न च तद्धितस्य विध्यनपेक्षस्य देवतायां प्रामाण्ये चरुमु
पदधातीति विधिसमावे पठिताह्वा [redacted] ईस्तसोमभवतीति तद्धिताद्बृहस्पतेर्देवतात्वं सिध्येदिति शंक्यं। स्वार्थविधि
नियोगासिध्येर्विध्यनपेक्षस्यापि तद्धितस्य स्वार्थगोचरतासर्यसिध्येविधिवाक्यांतर्भावस्यापेक्षत्वात्। बार्हस्पत्यतद्धितस्य चार्थ

राम०
११६

वाहं जगत्त्वात् । तस्मिंश्च देवतायां न द्विजस्य प्रामाण्यं । चतुर्थ्यास्तु यद्यपि संप्रदाने विहितात्संप्रदानशब्दस्य कर्मणाय
मभिप्रैति स संप्रदानमिति लक्षणानुसारेण दानान्वयिकारकमेवाभिधत्ते कथं हि कर्मत्वाभिमतेन द्रव्येणानुरूपो
भिप्रेतः स्याद्यदि न तत्स्वत्वापादनं कर्मत्वापादकत्वं कर्मत्वाभिमते द्रव्ये चिकीर्षेत । ततश्च यागान्वयिकारकं लक्षणा
येवाभिधत्ते । तथापि मन्त्रस्य वचनद्विजवन्न प्रमाणं । वैदिकलौकिकानेकप्रयोगेषु देवतायां चतुर्थ्यादिप्रयोगत्वाल्लक्षणा
प्येषा शक्तिकोटिनिक्षिप्तैवा न चैतावद्दशलक्षणाया केचन शब्दा देवतायां दृष्टप्रवृत्तिकाः । येन चतुर्थ्येव पञ्चमो निवेश्यार्हाः स्युः
अत एवाग्नये पवमानायेत्यादौ पजित्समभिव्याहारमनपेक्ष्य पृथगन्वितकारकप्रतिपादनोपपत्तिः । निरूढलक्षणायाश्च
उपपत्तिप्रतिसंधानानपेक्षत्वात् । अधिकारिणः प्रतिसंप्रदानतायोग्यार्थकप्रकृतिसमभिव्याहारस्य तत्रानास्यैव निया
मकत्वस्य सत्त्वात् । अतोऽनुक्तचतुर्थ्यन्तस्यापि प्रामाण्यं मन्त्रस्य यद्यपि न मन्त्रविधया देवतायां प्रामाण्यं तथाप्यध्यापदस्तु
मानन्यतरमानेऽप्यापत्तेः न मन्त्रवत्स्येवतन न च पूर्वक्तस्य देवतात्वानुपजीवनेन देवतायामानताभिमता उपांशुयाजादि

भा॰दी॰ ११८ मंत्रात्मकपदार्थे देवतात्वे कल्प्यमिति तत्र विनिगमकाभावः। यत्तु क्तेसौ मंत्रत्वस्य कांजगतानेकमंत्रकल्पत्वस्य वि

ष्णुरूपा श्रुयष्टव्य इत्यादिलिंगस्य विनिगमकत्वमेतत्तान्न। धाकाते च देवविष्णुरात्मपोऽनेकविधत्वात्येसत्यपि विष्णुरा

त्मत्वात्सत्त्वयोगे योगरूढिभ्यामर्थविशेषप्रतिपादकेत्वनियमादेवशब्दस्य तु युगपदेकरूपेणानेकार्थप्रतिपाद

117 कत्वपाप्युत्सादिवत्तुणाविशेषवाचकत्वाद्धेतुं पंकजमित्यादौ पंकजपदार्थस्येव धर्मित्ववद्विष्णुपदार्थस्यैव धर्मित्व

मित्येव विनिगमकं वक्तुं शक्यत्वाद्देवतात्वोपजीवनेन देवतापामानत्वमपि नोक्तमप्रयाजयाज्यानुवाक्ययोरसंभवि व्यात्मप्र

त्यक्तं तितीर्दृहविरजुष्टेति च हविःसंबंधित्वेन प्रकाशनतापादेवतात्वमंतरेणानुपपत्तेः। अग्नित्वस्य च संबुध्यंतत्वेनावा

ह्ननिगदांतर्गतसंबुध्यंताग्निशब्दवद्देवताभूताग्निप्रतिपादकत्वात्।। नवपातीवर्जतश्चहेः मे क्षिवेहाप्यमेर्हविःसंबं

धः प्रतीयते। नापित्रिंशतानिवाजभागादिदेवतानाममग्निहारकत्वंसंबंधः। येनाग्नेर्देवतात्वं स्यात् नन्वस्य ख्तासान चैवं ए॰म॰

पूर्वोपन्यस्तमंत्रवर्णायास्तोत्विमयां विरोधः।। प्रयाजदेवतासमर्पकसंदिग्धार्थकसमिदादिशब्दार्थकथनपरत्वान्नयोः ११८

॥ युक्तं चैवैदिकशब्दार्थनिर्वचनं । यच्चरजतमस्या स्कन्दपोक्तेरैंद्रं पर्यं । ननु देवताविधिपरत्वात् अतएव भक्तिमात्रमितपदि
तिवा कान्ते किमर्थं पुनरिदमुच्यते किं विचारे प्रयोजनमिति पांक्तोक्तत्वेनावगन्तारितं यस्ये देवताये हविर्गृहीतं स्यात्तां
मनसा ध्यायेद्वषट्करिष्यन्निति निरुक्तं होतुर्वषट्कारपूर्वकाले ध्यानविशेषसिद्धिर्विचारप्रयोजनं कथयत्संगच्छ
ते । एवमेव चेद्ध्यानकाले यजमानस्याऽपि प्रक्षेपकाल इति ब्राह्मणोक्तं प्रयोजनं नान्तरो क्रियते समिदादिशब्दानां दे
वतासमर्पकत्वमनंगीकुर्वतां साग्निशब्दस्य देवतासमर्पकत्वमितिन्याय्याभिप्राये तु सर्वमेतदसंगतं स्यात् । अ
न्यदनुक्तैः पूर्वं प्रयोजनस्यसत्वात् । किंच छंदःप्रभृतीनां समिदादीनामपि देवतात्वं यास्कोक्तं देवतात्वाक
र्षांतरत्वेन यद्यमं स्यात न त्वयि यादृशी इति तुष्यिति तिरिस्यतः प्राग्भक्तित्वाभिमतकल्पान्तरैः सह समिदादिदेवत्वमप्यवस्य
म् । अतोपि शास्त्रे समिदादिशब्दार्थनिर्णयायैवमेनेरुक्तः प्रयाजदेवताविचार इति । येन च न्यायेन चतुर्थाद्ये सुसमि
दादीनां देवतात्वं तेनैव न्यायेनोत्तमप्रयाजे आज्यभागादिदेवतानां देवतात्वमिति सिद्धं तथा प्रामंत्रस्यान्त्यमात्रम् ।

यत्त्विदं हा। विरुद्धत्वेनात्र व्यधिकरणसमासः अग्रयणेन गुणेन आज्यादिसंबंधित्वेन देवताप्रकाशनं न तु प्रकृतासंबंधित्वे
त्वेनेत्युक्तं तत्र। समासे चातुर्थिकपितृयज्ञाधिकरणन्यायेन व्यधिकरणान्वयात्समानाधिकरणान्वयस्य
न्याय्यत्वेन समानाधिकरणसमासस्यैवोचितत्वात्। तदुपक्रमाद्गुणेनोपसंहारे क्रियापदगतभूतनिर्देशाविव
क्षायां श्रेयोऽङ्गीकार्यत्वात्। यद्देनेन हविषा शास्त्र इति सूक्तवाकशेषे इदंशब्दहविःशब्दयोः समस्तत्वदर्शनेन ज्ञाग
विक्कृतयोस्तयोस्तथालोचितत्वाच्च। तदुपमात्ता देवा आज्यपा आज्यमित्येतत्सारूप्यादस्य सारूप्यस्य घटितत्वपस्थि
तेः। अस्तु वेदं हविरित्यत्र गुणेन आज्यादीनामेवाज्यादिसंबंधप्रकाशनं तथापि यद्देनेन हविषा शास्त्र इत्यत्र प्रकृतस्य ह
विषः प्रकाशनमसंदिग्धं। न च तद्धोमसाधनस्य संभवति। न च होमो देवतां विना। न चाज्यादिभ्योऽन्या प्रकृता देव
ता। कृतश्चित्प्रमाणात्सिद्धेति मंत्रप्रकाशितानामग्न्यादीनामेव देवतात्वं कल्प्यं। अतः सिद्धं सूक्तवाकस्यापि शामा रामः
रुपाद्धिनीयायाः ऽनाममाणप्राप्तेप्रकृष्ट एव न चैवं विक्षुपजनीस्यादेवोचितादेवतातासिद्धिः। समभिव्याहारकल्प्य ११८

कस्मान्नासिद्धिः। इति देवतात्वप्रमाणस्य परिहारः। संभवति च तद्धितचतुर्थ्योर्बलाबलं तयोर्द्रव्याभिधानमूल
केभ्यो गुणाधिकरणोक्तसमस्तहेतुभ्यः। न च तद्धिते द्रव्याभिधानमसिद्धं द्रव्यप्रतीतेरनुभवसिद्धत्वात्। कर्मणा दृश
हन्त्याये नत स्याद्रुतसाधिकरणाविषयत्वात्। क्रियया कर्तृविकारकात्मकदेवतया यागक्रियाया एवसास्वादाक्षे
पे द्रव्यप्रतीतेरनन्यथासिद्धत्वेन कर्त्रधिकरणताया विषयत्वाच्चानवयागस्यैपद्वारेण द्रव्याक्षेपः। न तद्धितो दे
वता विशिष्टयागविशिष्टद्रव्यप्रतीत्यापत्तेः। यजतिस्तु कर्मफलभोक्तृसंयोगादिस्यादावुक्ता याप्तद्धितोक्तद्रव्यदे
वतासंबंधेन यागकल्पनाया असंभवापत्तेश्च। अस्ति च देवताताभिधानेनापि तद्धितस्य बलम्। न च देवतायाः संप्रदा
नविशेषात्मकत्वात्संप्रदाने विहितचतुर्थ्यादिवतापि वाच्यैवेति वाच्यम् एवमपि संप्रदानसामान्यविहितायास्तस्यास्त
द्धितस्य विशेषाभिधायितया प्राबल्यसिद्धेः वस्तुतः कर्मणा यमभिप्रैति स संप्रदानमिति लक्षणसूत्रे वास्तवाभिप्रे
तत्वस्य लक्षणत्वेनाभिप्रेतत्वात् तस्य च देवताया असंभवात्संप्रदानपदप्रवृत्तिनिमित्तस्य च दद्रासर्थघटितयोगस्य

भाद्रा॰ ११९ तस्याऽभावान्न देवतायाः संप्रदानत्वं नन्वेवं चतुर्थीप्राप्यत्वान्न च तद्धितचतुर्थ्यौ हृत्करी सोद्देश्यत्वमात्राभिधायि
त्वे तु स्येस्तस्येव विचित्रस्य समभिव्याहारेण विचित्रप्रतीतिपर्यवसायित्वान्न शाह्शाज्ञिवैचित्र्यकृतं वलावलं संभव
तीस्यपिशंकसास्य देवने स्यानुशासनवशेन तद्धितस्य समारोपितयागार्थ्यनिरूपकत्वात्मकोद्देश्यत्ववाचित्वात्
119 संप्रदाने चतुर्थीत्यनुशासनवशेन चतुर्थ्या अपि समारोपितयागार्थ्यनिरूपकत्वात्मकोद्देश्यत्ववाचित्वात् अन्यथानुशा
सनवैचित्र्यस्य निष्फलत्वापत्तेः। देवतात्वाभिमतेष्विन्द्रादिषु संप्रदानत्वाभिमतेषु च ब्राह्मणादिषु हविःस्वीकारस्ति
कारणमनुक्तविधोद्देश्यत्ववैचित्र्यस्य प्रामाणिकत्वात्॥ एवं च प्रेषार्थकविध्यर्थकप्रत्यययोः प्रवर्तनाभिधायित्वे तुल्येऽपि
विधिप्रतिपादने प्रेषार्थकानां दौर्बल्यप्रयोजकन्यायेन तद्धितचतुर्थ्योरुद्देश्यत्वाभिधायित्वे तुल्येऽपि देवतात्वप्रतीतिप
र्यवसाय्युद्देश्यत्वप्रतिपादने सिद्धे चतुर्थ्या दौर्बल्यं। तद्धितचतुर्थ्योरुभयोरपि विनियोजकत्वानंगीकाराच्च न क्रिया राम॰
न्वयप्रनन्वयिकारकाभिधायित्वेन विपरीतवलावलापत्तिः। पश्चद्देवतात्वेन निर्णीतोऽर्थः तद्वाचकः शब्दो विधिना चतुर्थ्यंत ११९

त्वेनविधेयत्वात्प्रथमंदेवतात्वेननिर्णयेनभवितव्यं।देवतात्वनिर्णयश्चोक्तरीत्यातद्धितादेवझटितिसंभवतीतिचतु
र्थ्यास्थलेचतुर्थ्यंतशब्दस्यक्लृप्तत्वेनापिनविपरीतवत्तापत्तिः।प्राथमिकलाघवानुरोधेनजघन्यगौरवस्यफलमुखत्वान्याये
नस्वीकर्तव्यत्वात्।नहितच्चतुर्थ्यावैलाबल्यात्स्वेपपरिहारः।यथाचयागादिविधिसमभिव्याहारेतदपेक्षावशेनणीततास्य
र्यपाचतुर्थ्यादेवतात्वावगमोनतथामंत्राच्चतुर्थ्यंतात्मादिपदयुक्तादपि।नतरांतादृशपदरहितानां॥सर्वेषामपिमंत्रा
णांजपेविनियोगसंभवात्।यागादौतद्धिनियोगानुपपत्तिप्रसूतार्थापत्त्यामंत्रप्रकाश्यार्थविशेषगतयोग्यत्वापालो
चनसहकृतयापरंप्रतीयमानंदेवतात्वमत्रप्रमाणकेनवह्नीये॥यावताचकालेनमंत्रविनियोजकाह्लिंगाद्वाक्याद्वा
मंत्रविनियोगःप्रतीयते।श्रोततद्धिनियोगस्थलेचमंत्रार्थत्वालोच्यते।तावताकालेनयागादिविधिसमभिव्याहृतया
चतुर्थ्यादेवतात्वमेवावगम्यतइतिभवतिचतुर्थ्याःप्राबल्यं।याचाग्निर्ज्योतिरित्यादावश्यादिपदेनतत्रविमर्शाद्देवतात्व
लक्षणप्रामंत्रस्यदेवताप्रकाशनार्थत्वनिर्वाहायकल्प्यमानाकथमिवतस्यदेवतात्वेप्रामाण्योपपादकत्वेनशक्ता

वक्तुं। न च सा चतुर्थी गतलक्षणा तु सा। अनुपस्थितोपस्थित्यपेक्षया विशिष्टात्मनोपस्थितस्य निष्कृष्टात्मनोपस्थितो
लाघवात्। यद्यपि द्वितीयायामपि लक्षणयानुपस्थितदेवतात्वोपस्थापनं तुल्यं तथापि देवताया उद्देश्यात्मकत्वात्सिद्धस्यै
वोद्देश्यत्वात्तद्विपरीतसाध्यत्वात्मककर्मत्वं बोधयन्ती द्वितीया न मंत्रसाम्यं लभते। न तरां बलवत्वं। आनर्थक्यप्रतिहतत्वे
न तु प्राबल्यं यदि द्वा चिरायते न तत्रिक्रमः। यत्तु पांचमिकन्यायेन चतुर्थ्यपेक्षया मंत्रस्य बलीयस्त्वोपपादनं तत्र क्रमः पा
गद्धिना चतुर्थ्यन्तं कश्चिदुद्दिश्य त्यागं इह विस्मजे द्विविज्ञाते कोसावित्याकांक्षायां यदर्थस्य देवतात्वं निर्णीतं स एवाद्दो। वि
धेयतया निर्णीयत इति प्रथममर्थविशेषस्य देवतात्वनिर्णयेन भवितव्यं। तत्र चोक्तरीत्या चतुर्थ्येव बलवतीति न
तद्विरोधे मंत्रादर्थगतदेवतात्वनिर्णयः। तद्वितेन चतुर्थ्या वा देवतात्वनिर्णयोत्तरं च दाशमिकन्यायेन तद्विधिमुपेक्ष्य प्रा
हृ विधिवेलायां यदि पांचमिकन्यायेन मंत्रगतः प्राप्त एव विधीयते न तावता चतुर्थीमंत्रयोर्देवतात्वनिर्णये विपरीतव
लाबलपत्तिः। न हि प्राबल्यदेवतानचोद्यार्थत्वं देवतात्वं येन तन्निर्णये मंत्रस्य बलीयस्त्वेन देवतात्वनिर्णये बलीयस्त्वमवही

येनाच चतुर्थीमंत्रयोर्बलाबलाक्षेपपरिहारः देवताविषयाणां षोषदोषणा विशेषाणि णी अनंतदेववागेषासनां तोषाय
जायतां ॥ ॥ देवतावादः समाप्तः ॥ पृथगिति यजति ददातीति निर्दिष्टभक्तिभ्यां धात्वर्थभेदभिन्नभावनोक्तिवदग्नये
प्रजापतय इति सुस्थितभक्तिभ्यां प्रातिपदिकार्थभेदभिन्नदेवताप्रतिपादनमुचितमित्याशयः। ननु न प्रत्येकं चतुर्थीतः प्र
त्येकं देवतात्वं चतुर्थीतोहितत्कल्प्यं गुणापरे चैकवाक्येऽनेकाश्रितमेकमेव कल्पयितुमुचितं। आह चेत्थं नयविवेके
भवनाथः। नन्वेवं पदद्वये चेति वाक्यं न तस्य व्यवस्थात्वस्यात्। अग्निहोत्रवाक्ये विधित्सितायाः केवलाग्निदेवताया अग्नि
प्रजापतसस्या। प्रीतेकदेवताकाएकगायके नैतेन प्रस्थापनासंभवादिति चेत्परिहृतमेतत्त्रेधा वरदराजेनां चतुर्थी
भेदचकाराभ्यां जातं विमर्शद्रूपं प्राथमिकावगमं देवताद्वयं विधेयमित्येवंरूपमादाय तन्त्रस्यत्वमुच्यते न स्थापितत्वे
न। यद्वा यद्द्वमेये चेति अनुपसर्जनविध्यपेक्षया उपसर्जनविधित्वेन विलंबितप्रवृत्तिरग्निहोत्रमिति विधिर्बलवद्गतोपे
तदेवतांतरं विधातुमशक्तः सन्नप्यग्निं विदध्यात् स च विहितदेवताप्रातेनैव विदध्यात्तथा दृष्टेन च पदद्वये चेति वाक्यादेव

भा द्री॰ सप्रायम इति तस्य व्याख्यानं यद्वा ऽग्निहूपाधिष्ठानविशिष्टकाङ्क्षविधानार्थं प्रहृत्तेन विधिना ऽर्थादधिष्ठानविधिरास्ते सत्यः
१२१ यम्प्रये चेति वाक्यादधिष्ठानत्वेनाग्निप्राप्तो न तदाक्षेपः कर्हि मुचितः इत्यधिष्ठानापेक्षया तस्य व्याख्येति द्विविधं परिहारम
भ्युपेत्याह चाकारार्थस्य चेति। स एव कुतोऽनन्वाहतस्येति। अत एवेति अग्ने पूर्वाहुतिः प्रजापतेरुत्तराहुतिरिति श्रुतिविरो
121 धान्मनोऽज्ञातमंत्रयेनाग्निर्ज्योतिरित्यादिमंत्रेषु अग्न्यादिशब्दानां देवताधिष्ठानैकदेशाभिधानद्वारेणालाक्षणिकत्वेन ता
प्रकाशनार्थत्वं प्रसंगादित्यनुक्तं हेत्वन्तरं समुच्चयार्थश्चः। तत्समुच्चितो। अत्रैवं वदराजः पूर्वं प्रवृत्ताग्निविधिमपेक्ष्य प्रजा
पतिर्विधीयमानः उत्पत्तिशिष्टगुणावरुद्धे उत्पन्नशिष्टइव न निवेशं लभेत। अग्निसमुच्चितं प्रजापतिविधिस्त्वाग्नेः प्रजा
पतिं प्रति शेषत्वप्रसक्तेः सोमविशिष्टयागविधेरिव यागप्रति सोमस्येत्याहास्य तत्र द्वितीयदोषपरिहारार्थमन्यतः प्राप्ता
ग्निपरमग्निश्च वृः। अन्यतः प्राप्तहोमाभिषवसमानकर्तृकत्वविशिष्टमप्रमाणविधिनाऽन्यथा होमाभिषवयोर्न मप्रमाणा राम॰
गत्वं तथा येनैव प्रजापतेः संगत्वमित्याक्षेपः। स्याद्यपरिहृतं यथा चेति। अग्निबाधकत्वमिति मावपसंयोग्युह्वीहेतस्यरूपास्य १२१

नवाधकत्वमित्यतः परस्परमितिशेषः। चतुर्थीविहितत्वेन प्रजापतेरिवपूर्वप्रवृत्तत्वेनाग्नेर्वाधकत्वमपि समुच्चयवि
धिनैवायोग्यत इत्याशयः। अग्निसमुच्चितेत्यस्यसायमित्यादिः। मंत्रवर्णप्राप्तत्वेत्यत्र मिश्रलिंगेत्यादिः। वृत्तिप्रसवार्थ
विधानेपीति कालद्वयगतदेवताप्रकाशकतयाद्वयोरपि मिश्रलिंगकमंत्रयोःकालद्वयेप्यव्यवस्थयाप्राप्तयोर्व्यवस्था
र्थत्वेन वार्त्तिकादिविधिवन्मिश्रलिंगकमंत्रविधिरप्युपपत्तेर्नतद्वशेनकेवलाग्न्यादिलिंगकमंत्रयोःपर्यदासप्रसक्तिरि
त्याशयेनैवोक्तिः। नच मिश्रलिंगकमंत्रयोर्मुख्याग्निसूर्यपदसामानाधिकरण्यानुरोधेनतद्घटकसूर्याग्निपदयोर्गौ
ण्याऽग्निसूर्यपरत्वाद्व्यवस्थितदेवताप्रकाशनार्थत्वेनाव्यवस्थयैवप्राप्तिरितिशंक्यं। न्यायस्तूपोदाहृताउभाभ्यां सायं
हूयते। उभाभ्यां प्रातर्न देवताभ्यः समदं दधातीत्येवंरूपात्तद्विधिवाक्यशेषेणतत्तत्कालाग्निसूर्यपादयोःसामानाधिकरण्य
बोधात्। सूक्तवाकन्यायेनमिश्रलिंगकमंत्रयोःस्वाहाकारस्यपदत्वांगीकारेणाग्निर्ज्योतिरित्यस्यसायंसूर्योज्यो
तिरित्यस्यप्रातरितिप्रसक्तविभज्यविनियोगनिरासार्थत्वेनोपपन्नाभ्यांतद्विधिभ्यांनेतरयोःपर्युदासप्रसक्तिरित्याश

भा द्वा. १२२ येनापि रीतिकश्चिन्नयद्दिकश्चिद्दृष्टास्मादित्त्वादीनामपि योजकत्वाच्च कार्यगृहीततमास्यार्थकेणाश्चादिप्रदेनेनैसमुच्चित
स्वार्थाभिधाने सत्येकपदाभिहितत्वे कार्यविधानेन वाक्यभेदपरिहारः इति । ननु मधुपेसाहागोरवापत्तेश्चेति । नन्वेकत्वेन
व्यक्तिसाम्येन वा कत्त एव रूपेण व्यक्तं यत्तरं तोऽनुमतश्चाह । अन्येनोपमानेनेति । अन्येन सामान्येनोपमानेनेत्यर्थः । नत्वेतत्त्वेनान्येन वि
षसादृश्यं लक्षणिकत्वेन प्रतीयत इत्याशयः । ननु रामरावणयोर्युद्धं रामरावणयोरिवेत्यादिवदभेदेऽपि संभवत्येवोपमा
ऽत आह । न च अन्येनेति । तत्राप्यगत्यादिनोपाधिकं भेदमादायैवोपमेत्याशयः । न च पत्न्यतेगत्यभावः । यागेगोणत्वावृत्त्या
रूपेण पदेष्वाकृत्यैसेगोणी निमित्तानामायत्तिव्यात्मनिमित्तकथने समानमित्यन्येनेत्यादि विधि मूलरूपत्वाद्विशे
षकत्वेन केवलस्तु स्वपेक्ष्यप्रयोजनलाभादित्याशयेनाह । प्रदात्विति केचिन्नाय मुख्यार्थकृतः ॥ मिश्रा यथा । अन्ये
त्विति । अनुपद गुणसंबन्धाभिप्रायश्चासो गुणसंबन्धश्चेत्यर्थः । यस्य गुणस्य संबन्ध इति वा । आधेयत्वाविधित्वेन शाक्य एम. १२२
मानशब्दात्प्रतीयमानस्य गुणाभिहृपितस्य संबन्धविशेषस्यैव शास्त्रीतत्वात् । निपन्नोऽत्र सप्तमीस्यात् । नतन्वयेऽप्यद

वपद्धोषस्यदेवतात्वरूपसंबंधविशेषस्यार्थवादादवप्रतिपत्तेः कथं तत्त्वस्यतोः द्वितीयेस्त्वित्यस्य तद्गुणानिरूपित
इत्यर्थः ॥ तथा च तद्गुणानिरूपितस्य किंचित्संबंधस्यानतः प्रतिपत्तो तत्त्वस्येति वाच्यं तथा सति तावन्निवाइति
वाक्यशेषात्स्त्राग्यस्यदीयादिज्योतिः समुदायस्य विधेयत्वात्प्रतीतिर्ज्योतिष्टोमशब्दाद्भवति तन्निरूपितोनकोपि संबं
धस्तस्माद्वाक्यशेषात्प्रतिपन्न इति कथं तत्त्वस्येति नात्रयोच्येत वाक्यीयविधानादिदोषनिरसनगुणविधित्वोपपत्तेः शब्दः क
र्मणोनामत्वेन प्रवर्तमानः प्रवृत्तिनिमित्ततामभिमतं गुणसंबंधं शास्त्रात्प्रतिपन्नं निमित्तीकृत्य प्रवर्तते तत्र त
त्त्वस्येति । तत्र तथा सति चित्राऽप्रयुक्तेन शब्दानामपि तत्त्वस्येति ये वनामतापत्तेः । उत्पत्तिविधिनोर्थवादतो वा
ज्योतिनं तत्त्वसंबंधं निमित्तीकृत्ये च तेषां प्रवृत्तेरिति चेत् । न । प्रतीयत्वसंबंधोर्थः शब्देन बोध्यते तद्धरवशादभ्युपगतिनिमि
त्तं । अग्निहोत्रज्योतिष्टोमवैश्वदेवादिशब्दानां योगिकतया त्वात्प्रतिपन्नगुणसंबंधार्थबोधकानां संभवति तादृश
गुणसंबंधनिमित्तत्वं चित्रादीनां तु रूढतया तादृशगुणसंबंधकर्मबोधकानां कथं तादृशगुणसंबंधनिमित्तत्वस्या

भा० द्वा०
१२३
123

त्। नचैवमप्योगिकावर्णसमिदादिपदानां तत्त्वव्याख्यानाया विषयत्वापत्तिः। तेषामपि लाक्षणिकतया तादृशगण
संबंधकर्मबोधकत्वात्। न च लाक्षणिकानां गंगादिपदानां लक्षणावच्छेदकीभूततीरत्वादिप्रकारकबोधजनकत्व
नियमान्न दर्भादिपदानां तथा बोधकत्वं संभवतीति वाच्यं गंगापदगतसाप्रतिकलक्षणाप्रयोजनभूतस्य तीर
गतशैत्यपावनत्वस्य निर्वाहाय गंगापदेपि गंगासंबंधित्वेनैव तीरबोधकताया वश्यमुचितत्वात्। अन्यथाऽवर्त्त
मानेवर्त्तमानोक्तिः स्तस्यार्थनिहेत्वधिकरणयाकरोक्ते निरुक्तार्थकत्वापत्तेः। यदि हि भूतभविष्यदर्थकलकारे
णैव वर्त्तमानार्थकलकारेणापि भूतत्वाद्याकारेण भूतादिकालो बोध्यते। तदा को विशेषो वर्त्तमानोक्तौ यदियस्तु
स्यार्थो भवति नेतरोक्तिरिति। न चैवमालंकारिकमतानुसारेण गंगात्ववर्त्तमानत्वादिप्रकारकस्य च बोधो लक्षणा
यास्वीक्रियतामिति वाच्यं। तस्य बाधितत्वात्। आहार्यबोधस्य च पदादस्वीकरणात्। अतो लाक्षणिकपदस्य शक्यसंबं
धित्वेनार्थांतरबोधकत्वमभ्युपेयं उक्तं च न्यायसुधाकृताऽभिधेयाविनाभूतइति श्लोकभाष्यावसरे मात्रलक्षणाहेतुत्वे राम०
१२३

नाविनाभावोपादानं। तस्मात् संबंधमात्रे राशब्दतात्पर्यवशादुपपत्तेः किं तु अभिधेयसंबंधित्वरूपादरश्च दर्शनार्थमि
ति। न चैवं चित्राशब्दस्य दर्शितुलक्ष्माऽयनापत्तिः। लाक्षणिके पि तस्मिन् चित्रत्वविशिष्टत्वेन संबंधस्य वृत्तिनि
मित्तत्वात्। तस्य च शास्त्रे तद्रूपप्रतिपत्तेः। न च मुख्येन शब्दस्य तदापत्तिः। तस्मिन् गौणतयाऽभिधेयसंबंधित्वरूपा
दराभावात्। उक्तं श्लोकश्लोकव्याख्यावसरे लक्षणागौणयोरेषा विवेकसिध्ये तदादराभावोऽन्यायसुधाकृता सूक्ष्म
लिंगसमवायोदाहरणायोग्यतदादरत्वेन प्रसिद्धमपि गौणत्वं न स्वीकृतम्। अतः सर्वमनवद्यं यद्भाष्येन प्रोद्
नयत्रये गुणो विधिरित्यतः। विध्यंतरप्राप्तिं नेतनिमित्तीकृत्य तत्र प्रवृत्तेमानः स प्रवृत्तस्तत्र प्रासाय गौणो भवति। वैश्वदे
याद्ध्यामिक्षायागीयदेवताविधिरेव तत्र प्रस्थशास्त्रे। यथैव प्राप्तहोमेऽ प्राप्तस्याप्यग्नेः सायंहोमे प्राप्ति मात्रे रागाग्निहोत्र प्रा
प्तेः सायंप्रातः अनुष्ठीयमानकर्मणो नामधेयं तथाऽत्रयागसमुदायेमध्ये समस्तवशात्तानामविविध्यैवैषां देवानामां आमिक्षाया
गे प्राप्तिमात्रे ण स्वष्टयागसमुदायनाम त्वविशकातन्त्र वैश्वदेवशब्दस्य वक्तुं आज्ञोति प्रोमशब्दे पि तानि वा इति प्रासङ्गदोषात्

भा॰ दी॰ त्रिद्धरादिः सोमस्तृहाय एव विधित्सितो गुणः। अहं वा इहीत्वा चमसं वोमीय स्तोत्रमुपकरोतीति शाद्वं च तत्र ख्यश्या
१२४ त्वा। चतुर्थी स्येनन्निमित्तं प्राप्ति माहाय ज्योतिष्टोम शब्दस्य नामत्वोपपादनात्॥ अर्थवादमप्यादाय प्राक्तन एव
न त्र ख्यन्यायो योजयितुमिस्यतिशाया परमुभयार्थवादो हाहत्यो मूले। चित्राशब्दे च चित्रत्वविशिष्टस्त्रीत्वस्य वि
184 धित्सितगुणस्य विध्यंतराद्प्राप्तेर्न तत्र ख्यन्याय इति न काचिदनुपपत्तिरिति। नन्वभ्युदये ष्टोमध्यमादिद्रव्योद्देश
न विहितदेवतानां द्रव्यानंगत्ववद्देवतोद्देशेन विहितस्यापि द्रव्यस्य न देवतांगत्वापत्तिर्यागगर्भत्वितसंबंधस्यैव विधि
त्सत्वाद्विषयत्वादत आह किंवेति। अथैकप्रस्तरमांगं प्रजिकस्यनागो एवं चप्रहत्तुं वैश्वदेवीपदेन विश्वांदेवानुद्दि
श्यामिक्षापदेन द्रव्यपरिविधिक्रमः। चतुरवत्तं जुहोतीत्यत्र वार्तिककृन्मते जुहोतेस्तत्र द्रव्यगुणा जुहोति एतस्वेनावि
केसादिति न्यायेन प्रक्षेपाधिकयागवाचित्वेपि विधेयतायाविशेषणीभूतप्रक्षेपमात्रपर्यवसायित्ववद्वैश्वदेवीपदस्य रा॰ म॰
देवताविशिष्टद्रव्यवाचित्वेपि तदुद्देश्यतायाः संभवस्य वदेवतामात्रपर्यवसायित्वमत आह। एवं चेति। ननु वर्षास्वृथका १२४

रस्य त्रयोगाश्रयणाद्गौरवमयाच्छंसनादिवाक्यभाय पाठबाधवधागकल्पनागौरवमयादिहापि तद्बाधो न्तुजन्त्राह किं चे
ति। स्यादेतत्। देवतानां कर्मण्यनधिकारादत्र्लीकस्य विश्वेदेवकर्तृकत्वकल्पनमत्र्जिनिमित्तत्वं संभवतीति दैश्व
देवेशवदस्य कर्मविशेषकत्वाति पात्वज्ञापनमात्रपरोपमर्थवादो देवताविधिप्रतिषेधात्तितत्राह किं चेति। न
चोत्पन्नस्य न शिष्टवलाभावे पि गुणाधिकारो क्रवलाबलान्तरस्य द्वावाक्यं विकल्प इति शंका। इतरबलाबलानु
रोधेन कर्मान्तरकल्पनाया आकरदृष्टत्वेनागत्या विकल्पस्याभ्युपेयत्वात्। वैश्वदेवीशब्देन विश्वान्देवानुद्दिश्यामि
क्षापदेन द्रव्यविधौ च न बलाबलान्तरस्यापि संभवतीत्यपि द्रष्टुधीभिरूह्यं॥ ॥अनर्थेति॥ हिंसादिनिषेधेऽनर्थो नरकादि
दुःखं। तद्धेतुर्हिंसादीति व्याख्येयं। नातिरात्रे षोडशीनं गृह्णातीत्यादौ अर्थः प्रकृतक्रतुफलमात्रे अतद्धेतु कर्म षोडशि
ग्रहणं॥ तस्य न क्रतानिशयहेतुत्वात्। दीक्षितो न जुहोतीत्यादौ अर्थः क्रतुफलमेव। तद्धेतुत्वं न द्धेतुविपरीतरूपत्व
त्वं तत्त्वतिवंधकत्वमितियावत्। नानादृष्टं कर्माणि होत्रादि। एवं च नात्र सकलनिषेधाव्याप्तिलदोषः॥ भाट्टैकदेशीनामम

भा द्वा· तमाशंकतव्यैनन्वितित्वस्य व्यवधाने ।ननु यद्यपि धात्वर्थाद्व्यवहितं फलं जातं तथापि समासं विना न तदन्वययोग्यतेति
१२५ दुराशयः ॥ नच प्राग्भावात्मनो वर्जनस्य कथं कर्तव्यतेत्यपि शंक्यं । योगक्षेमसाधारण्यात् कर्तव्यतायास्तत्रापि संभवात् । स्व
त्व । अवश्यं च रागप्राप्तप्राप्तस्य मासमनिषेधेषु नत्वियमुपेयादीत्यत्र नञ् हो जीस्यादित्युक्तं त्वंगत्वाभिमतेषु इत्यमेव स्वी
125 कार्यं न चाविहितमंगं भवतीति प्रसिद्धेः । कर्तव्यतयाऽवोधितस्य च विहितत्वासंभवात् । पञ्चम कर्तव्यतयावोधितं ना
ऽपेक्षणं तस्येति कर्तव्यताकांक्षा हानस्य प्रकरणेन ग्रहणानुपपत्तेश्चेत्याशयेनाह एवमिति । धात्वर्थानन्वये दृष्टान्तमविध्यर्थ
फलं जायते न्वयमुपपादयति । नापीति । राजपुरुषमित्यादिस्थले राज्ञोऽन्वितस्य सतः पुरुषस्य कारकोपसर्जनत्वमित्युप
पादयितुमिनपदस्येति । ननु नञः सुबंतसंबंधे नित्यसमास इति दुराशयेन तन्निराकरणस्याकर एव स्फुटत्वात् । वस्तु मा
राप्रयुक्ताश्यतिद्याश्रवणांभ्युपेयत्वाच्च । प्रवर्तनोपसर्जनत्वेनेति । उपपादितमेतदधस्तात् । लिंक्त्वाद्येनेति तदर्थमेतस्यार्थः रम·
। नञ्श्चेति । ननु यस्य शाब्दस्य प्रत्ययशक्तिलाघवकल्पमेव तस्य सुस्थभावः नच नञः स्वसंबंधिप्रतिपक्षे शक्तिरस्ति । अनंतरमे १२५

वर्त्तनस्य न हि विरुद्धयोर्नञर्थः सत्त्वस्य वक्ष्यमाणत्वात्। अतः कथमेतत्। कथं च नास्तीत्यत्र नञः प्रतिपक्षबोधकत्वे दृ
ष्टान्तत्वात्। घटो नास्तीत्यादिस्थले ऽभावस्यैव प्रतीतेः। न हि प्रवर्त्तनाया निवर्त्तनेव सत्त्वस्य प्रतिपक्षभूतमसत्त्वं नाम भा
वान्तरमस्ति। कथं च निषेधान्तर्गतानां भक्षयेदित्यादिविधिप्रत्ययानां प्रवर्त्तनाभिधायित्वमुपपद्यते। यतो यश्चैतं न भक्ष
येदिति रागप्राप्तानुवादेन नेति नञा तन्निषेधो बोध्यत इति तव मतं। न च शब्दव्यापाररूपायाः प्रवर्त्तनाया रागतः प्राप्तिः सं
भवति। येनानुवादो वक्तुं शक्येत। कथं च विधिना नञा च प्रतिपादितयोः प्रवर्त्तनानिवर्त्तनयोः परस्परविरुद्धयोर्वि
रुद्धस्य विधेयभावेन मिश्रो नयो निरूपयितुं शक्यः। अत्र भवेदेतत्। नात्र विधिः किं तु लिङादिप्रत्ययेन तु विधिफलभूतो रागतः प्रा
प्तः कुर्यामिति संकल्पो लक्ष्यते विरोधिवचनस्य नञा तद्विरोधिनं न कुर्यामिति प्रत्ययमादधानो निषेधको भवतीति। ननु च
प्रवर्त्तनावाचिना प्रत्ययेन कुर्यामिति संकल्पस्याभाववाचिना नञा तद्विरोधिसंकल्पान्तरस्य च लक्षणामपेक्ष्य पर्युदासे
समाश्रयणं सा निरूपणा लक्षणा पाश्रयत्वेना काम्यस्य पर्युदासा निषेधस्य पर्यवसायव्यवहारस्यासंभवापत्तेः। विध्यभावे

भा॰ द्वा॰ चनकुर्यामितिसंकल्पस्यैककर्त्तृत्वाप्रतीत्यसंभावान्नकुर्यामितिशब्दवत्त्वभक्ष्यपोदितस्यापिनिवर्त्तकत्वासंभवापत्तेः
१२६ किंचाचारणिकरणोनब्राह्मणंहन्यादित्यत्रब्राह्मणागतपुंस्त्वाविवक्षावद्दर्शनार्थस्यापोब्राह्मणाइत्युक्तेहननप्रतिषे
126 धतःब्राह्मणेप्रतिषेधेवालिंगंनातद्द्वीयतेइतिश्लोकस्यविवक्षणार्थःप्रतिषेधविधिपरोहिविधायकइत्यादिग्रंथोद्देधा
न्यायसुधायांव्याख्यातः।नञर्थगोचरप्रवर्त्तनाबोधकोविधिरित्यभिप्रायोनञ्समहितोविधिःनिवर्त्तनाबोधकइतिचेत्तिन
ञ्यद्यपिकेवलनञोनिवर्त्तनाभिधायित्वप्रदर्शनार्थस्तत्रत्यवार्त्तिकस्यव्याख्यानावसरेन्यायसुधाकृतोक्तेकधाभिप्राय
गोचरोऽस्यश्लोकस्यदर्शितः।तथैवनिरुक्तंतस्मात्तदभिप्रायश्लोचरोमूलेपि।तथापिनञस्सद्वितीयस्याख्यामप्युपेक्ष्यकथं
केवलनञोनिवर्त्तनाभिधायित्वमुपन्यस्यतोभावनाप्रवर्त्तनावाचित्वेनविधेरभावयाचित्वेननञ्कस्यविशेषणकस्यनिव
र्त्तनावाचित्वंकल्प्यमितिसाकांक्षायोविनिगमनाविरहेणोभयोरेवतद्वाचित्वंकल्पयितुमुचितं।पंकजपदस्यश्रवणानंतरं ए म॰
जायमानपद्मत्वप्रकारकप्रतीतिबलेनकल्प्यमानशक्तेःपंकपदजनिधात्वोःस्वीकारवत्।यद्वाविधिरेवनिवर्त्तनावाचको १२६

वक्तुमुचितः। नञो निपातत्वेन द्योतकत्वात् तथाहुर्णकृत्साधिकरणो। चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः। क्रियते
संशयोऽस्मिन्नेनोपसर्गनिपातयोः। तयोरर्थाभिधाने हि व्यापारो नैव विद्यते। यदर्थद्योतको तौ तु वाचकः स विचार्यत इति
अत्र अपि च निपातानां द्योतकत्वेन नञ एव द्योतकत्वमभ्युपेयं तथा सत्येव ब्राह्मणादिसादेन नञ्द्योतितशक्तिरेकब्रा
ह्मणपदेन ब्राह्मणाभिन्नबोधे सति उत्तरपदार्थप्राधान्येन तत्पुरुषत्वं निर्नच्चैवं वार्त्तिककारैः केवलनञो निवृत्तनामिधा
यित्वे यत् ब्राह्मणं हन्यात्तेनोति वचनव्यक्तिर्यो पन्यस्ता यथा वा नञ विश्यो उभयोर्निवृत्तनामिधायित्वे हन्तव्यस्यापि ए
गतः प्राप्ते वृत्तिहननमपेक्ष्य यद्ब्राह्मणाहननं तन्न कुर्यादिति वचनव्यक्तिर्दर्शिता एकस्मिन् पदे धात्वंशेऽन्तु वादः प्रसज्यप्रति
षिद्धिरिति वेद्यं ब्राह्मणं भवानत्र हननमपेक्ष्य यो ब्राह्मणस्तं न हन्यादित्यादिति वचनव्यक्तिर्दर्शिता तथा केवलविधेर्निवृ
त्तिनामिधायित्वे तदभिप्रेतेऽन्यापि वचनव्यक्तिः प्रदर्श्य तत्र दर्शनीया वा भवजेति चेन्न। उभयोरभिधायित्वे या वचनव्यक्तिः
केवलविध्यभिधायित्वे पि तस्या एव स्वीकारात्। द्योतकस्यापि नञो वक्ष्यमाणार्थत्वात्। किं च विरोधिमात्रे लक्षणा नञो वन

भा॰ दी॰ त्वेनिवर्त्तनाप्रतीतिरूपाते निवर्त्तनात्वेन प्रतीतस्यैशात्तयं जरंवास्त्वीक्रीयते नायोनिवर्त्तनात्वेन प्रतीतस्याभावेऽयंमानिवर्त्तेय
१२८ वहाराऽसंभवापत्तेः। यद्येवहि तदन्यवाचिनापि नञाऽतदन्यत्वप्रकारकएव वोधोजन्यते एवंतर्हि रोधिवाचिनापितर्हि रो
धित्वप्रकारकएव वजनंपितुमुचितः। एतेन विधिसमभिव्याहृतस्यनञः क्रतुसशात्तेव निवर्त्तनाभिधायित्वमितिमव
127 देवीहितीयोपिप्रकारोनिरस्तः। वाचकयोनकत्वापत्त्याप्रसिद्धयोर्विधिनञोर्वैपरीत्यकल्पनाया अन्याय्यत्वात्स्वयस्वप
हाचकत्वमविवक्षितस्वार्थकपदस्समभिव्याहारलभ्यं तत्समभिव्याहारस्यजत्र योतकत्वात् न द्वितीयः। यतः प्रवर्त्त
नायञ्निवर्त्तनायाश्चापि धात्वर्थानुरक्तभावनाविषयत्वमवश्यमभ्युपेयं। एकविषयत्वेनैव विरोधनिर्वाहात्। विधिवन्नि
षेधस्यापि वाक्यार्थरूपाभावनाविषयएवेति न्यायसुधोक्तेश्च। ततश्चावश्यकल्प्येशक्यंतरे विषयविषयित्वोः स
मानाभिधानस्त्रुसान्वयलाभाय विधावेव तत्स्वीकार्यं नतु वाक्यीयतदन्वयापादकोनञि शक्यंतरस्वीकारउचितः। अ राम॰
तोनञ्श्चेस्यार्थिगमयतीसंजोयथोः युक्तइतिचेतामैवं। यद्यपि विरोधित्वे वोधकत्वं नञो न स्वाभाविकं तत्साहृश्यसमभा १२८

वेष्वतद्व्यत्वं तदत्यन्ताभावाश्रयत्वं विरोधश्चानयोर्यथाः घटप्रकीर्त्तिताः इति चेद्वाक्ये निर्दिष्टस्यादृश्याद्यर्थान्तरस्य हि रोधस्या
प्याभावप्रतियोगित्वेन लाघवाद्भावगोचरत्वात् स्वप्रकाशत्वप्रतीतिनिर्वाहि शक्त्यं तदानाक्षेपात् । अभिमतं च विरोधाच्च । तथापि
घटत्वनिषेधगतनञो निवर्त्तनाभिधायित्वाभिप्रायेणासम्पद्यः एव ग्रन्थः । यथा हि पंकजपदानन्तजायमानपद्मप्रत्यय
का एकप्रतीतेः पंकशब्दादिगतकृत्स्नशक्त्यालक्षणायावाः निर्वाहान्ते निर्वाहार्थशक्तिः कल्प्यते एवं निषेधवाक्यश्रव
णानन्तरं जायमानाया निवर्त्तनात्वमभावप्रतियोगित्वेन तद्देव प्रतीतिनिर्वाहः शक्तेन तन्निवृत्ते । विजातीयपदात्म
कत्वात् । तच्च शक्यं तत्र लिङादिनिष्ठं तत्र हि नञि लिङर्थे च शक्यतावच्छेदकं विधिवाक्यगतलिङादिनिवर्त्तनाप्रतीत्यापत्तेः
द्योतकत्वे नञस्तत्राभावान्वये इति चेत्तर्हि नञ्विशिष्टलिङः त्वं शक्यतावच्छेदकं ब्रूहि । कुतो रहस्यमिव क्रीडयाः । न हि शक्यं
तद्गतशक्यतावच्छेदकत्वादस्य द्योतकत्वं शक्यानिर्वचनेन तथात्वेऽपि चेत् । मा कुर्वित्यादौ तथा प्रतीत्यनापत्तिः । अथाभाव
वाच्यस्य विशिष्टप्रवर्त्तनाविरहस्य त्वेन निवर्त्तनावाचित्वं अभावः प्रवर्त्तनेति शब्दाभ्यां निवर्त्तनाप्रतीतिनिवारणाय

भाट्टा०
१२८

व्यपेतित्वस्यपेतिच ग्रहणामिति चेन्न । नाम्नेय प्राचीनस्तत्रद्धपरीनामभिधायीति विरुद्धयोः प्रवर्त्तनावाचित्वनिवर्त्तनावाचि
त्वयोः सामानाधिकरण्येनावच्छेद्यावच्छेदकभावासंभवात् ॥ आरादित्याद्यनुरोधेन विरोधानभ्युपगमेपि वा सामान्य
तो विरोधि श्रुती तिभ्रनव्रतेन नञ्कृतन्न एव विरोधि विशेषनिवर्त्तनायां शक्तिकल्पनोचिता । तस्य येन सामान्यसंबं
धः कृतस्तस्यैवतेन विशेषसंबंधः स्वीकार्य इति न्यायस्याप्यत्राभिधानुपपत्तेरुत्तरावाचः प्रवदितो निर्वपेदिति वेदवा
क्यानिर्णीयापोऽकस्य लौकिकपदार्थसंबंधावधारणेपि तुल्यत्वात् । ननत्रोयोजकत्वे च न पृथक्पदत्वव्यवहारः स्यात् । नहि
विहरतीत्यादेः पृथक्पदत्वव्यवहारोऽस्ति । न च तत्संगच्छतेपि अवाचकस्य पाकं पदमिति लोकप्रसिद्धविषयत्वात् ।
अर्थशून्यस्यप्रातिपदिकत्वाद्यसंभवेन सतः सुवाद्यनुत्पत्तौ सुप्तिङन्तं पदमिति शास्त्रपरिभाषाप्रसक्त्यविषयत्वात् । नान
ञो निवर्त्तनावाचित्वेनुत्तिष्ठादेर्द्योतकत्वेपि न पृथक्पदत्वप्रसिद्धिविरोधः । स्याप्यभिधायित्वेनैव तन्निर्वाहात् । किंच न
ञ्चैतिप्रष्ठलिङोनियन्तृनामभिधायित्वमंगीकृत्य नञो योजकत्वं वदतो यत्तस्यार्थायाउ लिंदयाऽन्नेतिवाक्यप्रयोगः कदापि न

रामः
१२८

न स्यात्स्यान्निर्वर्त्तनानुवादस्य केवलमनर्थविधानस्य चासंभवात्। न च लिङ्गादेर्योनकत्वेपि दोषसाम्यं भावनानुवा
दप्रतीत्यैनान्तरीयकतयाऽनुवादभागो व्यापिनस्यापि द्योतकत्वोपपत्तेः। दृश्यते हि दध्यन्येपि प्रवर्त्तनाप्रतीत्यै विधि
भागनिर्देशस्यापि लिङोऽनुवादभागे मान्तरीयकतया व्यापारणां मीमांसकानां। यज्जुहोतीत्यद्ध्वेति। अतो यद्यपि चा
दीनां प्रकृतिप्रत्ययवदुद्देवं चत्वादिरर्चेतिनियतपौर्वापर्यं व्यापारणादर्शनादुद्देश्यतया विधेयतया वा स्वातन्त्र्येणार्थास
मर्कतानुद्योतकत्वेन पृथक्पदत्वाभावः त्वीक्रीयेत तथापि नञोनैवं क्तुप्तमः। अत्राहुरणाइत्यत्र तानयगामिस्यत्रा
नयेत्यस्येव निकोशांविहित्वा त्रनिरिपस्यैव विशिष्टप्रतीतिजननवेलायां मन्त्रात्वेनालोचनानोत्तरपदार्थघाधान्यबाध
प्रसंगः। उपपादयिष्यते चैतन्त्वकारान्तरेण प्यवसरे अतो नञ एवमिथवर्त्तनावाचित्वं एवं च स्वगुणोपजातीत्यादिवाक्यगतमा
तीति पदाभिप्रायो दृष्टान्तयोविसंगच्छते। नत्यत्र स्वगुणभावोत्पद्यतइति शाक्यं वक्तुं। असमस्तति पोपिकाभावानमुग
गमात्। किंतु अलीकापरपर्ययिमसदेवज्ञापयतीत्यत्र वादजन्यप्रतीतिविषयत्वस्याव्याप्त्यपेयत्वात्। न च निषेधेप्रव

भा०द्वा०
१२९
129

र्त्तनायालिङ्ग्यर्थत्वोक्तिः कथमित्यपि साम्प्रतं । स्वगतहेतुत्वस्यैव हननाद्यनुकूलस्य प्रवर्त्तनात्वेनानुवादसंभवात् येमां द्वे
षजननेनानिष्टकारित्वादिप्रत्ययो हननेप्रवर्त्तयन्निति मामेष निवर्त्तयतीति प्रतीतेः । न च प्रवर्त्तनायां परगामित्वमपि लि
ङादिवाच्यकोटिनिक्षिप्तं येन स्वगतहेत्वादेः प्रवर्त्तनात्वेन ततः प्रतीतिर्न्निष्प्रत्यूहेत प्रवर्त्तनाश्रयप्रतीतेर्म्मानान्तरलभ्य
त्वस्य त्वयाप्युपपादनात् । अनुवादस्य तु तन्त्रान्तरदर्शनलाभात् । उक्तं च वार्त्तिके प्रत्ययसंबन्धानुगृहीतशक्तिरभावमात्रा
भिधानादप्युपधिफलत्वव्यापारेण न्यविध्यर्थमपि हेत्वाद्यर्थस्य संप्रति विध्यचरितार्थ इति । अत एवाहत्याधिकारो नियो
गानां द्योतकत्वोक्तिः संभवद्योतकत्वनियामतान्तरविषयत्वेन नेयाः यद्वा नात्र निवर्त्तनाप्रतीतिवेलायामनुवाद्यत्वेन प्रतीत्ये
प्रवर्त्तनायालिङ्ग्यर्थत्वोपन्यासः किंतु परे यथा भूतले घटो न भूतले घटो नेत्यादौ भेदसंसर्गाभावप्रतीत्योर्भावस्याद्ये यादृश
समभिव्याहारोपयोगात् दात्त्वात्संसर्गावबोधयति नञ्सहितस्तादृशात्तदन्यतरधर्म्मप्रतियोगिकं भेदसंसर्गाभावत्वं च यथा क्र १म०
मं बोधयतीति श्रुत्यान्तिमंगीकुर्वतः किं तन्नञ्भावांगीकारेणावद्देति । भूतलं घट इति समभिव्याहारस्तादृशबोधक इति । न

यापादृष्टासमभिव्याहारः प्रवर्त्तनां मन्त्रोच्चरितां बोधयति तत्स्वाहितसाधनताज्ञानोच्चरितां निवर्त्तनां बोधयतीति जिज्ञासुस्तन्निमंगीकृ
त्य तर्कितनञ्भावाभ्युपगमेनैव प्रवर्त्तनायाः लिङर्थत्वोपन्या [redacted]
स इति वोध्यं। प्रकारान्तरेण विधिनिषेधेषु प्रवर्त्तनानुवादत्वं भवं वक्ष्यामः न च लिङर्थनिवर्त्तनायाः अतिप्रसमानाभिधानक्ष
त्या विषयलाभः। ब्राह्मणकर्मकहननावच्छिन्नायाः एवमावन्नायाः विषयतानङ्गनयानस्याप्रतीतेः। न च नञर्थनिवर्त्तना
या विषयालाभोऽपि सर्वथावाकीयः। यस्य पदान्तरीयेणापि येनार्थेनावच्छिन्नार्थबोधवत्वनियमः — नञ्ज्ञन्यस्तदवच्छिन्नार्थ
बोधः श्योनयेवेति स्वर्विधिकरणायाकाङ्क्षं यप्रतिरूत्वात्। अतश्येति। न कलञ्जं भक्षयेन्न दीक्षितो जुहोतीत्यादौ एतद्धे षोडशि
नं गृह्णातीत्यत्रयपि कचिन्निषेध्यस्य प्रसवाय हेतुत्वं पर्त्वे क्रतुफलप्रतिबन्धकत्वमन्यत्र तदङ्गेरेले वाभावस्य क्रतुफल
जनकत्वमिति वैषम्यमस्ति तथापि तस्यमानां तारसहस्तन्निवर्त्तनयैवाक्षेपलभ्यतान्नाम्नाकमिष्टसाधनतावैधिकादि
नामिव कचिद्युक्तसन्निवेशेऽपि कल्पनागौरवमिति साशयः। न तु भवतु निषेधेषु निवर्त्तनायाः वाक्यार्थत्वं। तन्निवाहकत्वं न तो

मा दी. लिङ्‌त्वाभाववत्प्रवर्त्तनागोचरप्रसिद्धशक्तिमात्रमेव संभवति तथाहि यजेतेत्यादौ भावनाया आजजन्याहृत्पर्यायभा
१३० वनात्मकप्रवृत्तिप्रतीतिमपेक्ष्यानुकूलव्यापारमात्रशक्तेन लिङादिना प्रवर्त्तनाप्रतीतिः क्रियत इति प्रागुक्तं आख्याताभि
हिता च कृतिर्धात्वर्थावच्छिन्ना प्रवृत्तिरित्युच्यते धात्वर्थप्रतियोगिकानञभिहिताभावावच्छिन्ना च निवृत्तिरिति तत्र विने
130 व शक्त्यंतरं निवर्त्तनाप्रतीतिः संभवतीत्यत आह एवं चेति च एवार्थे निवर्त्तनागोचरशक्त्यंतरेसत्वे वेत्यर्थः। कर्त्तव्यता वि
ध्यन्वयिकृतिविषयतानस्यावा कार्यत्ववाक्यतास्यर्यविषयत्वमिति यावत्तामवनुकर्त्तव्यताप्रतिपादकत्वेन कार्यत्वं कृ
त्यवच्छेदकभेदादेव तयोर्भेदो भवेदित्यत आह तत्रेति। प्रतिषेधादेव कर्त्तव्यार्थप्रतीत्युपपत्तौ नेत्यस्य प्रतिषेधकृतस्येव
वतस्यवृत्तमित्यनेनैकवाक्यत्वोपपत्तेश्चानुर्थिकं प्रतिषेधत्वपरित्यागेन संकल्पलक्षणाश्रयणं नोपपद्येत उपप
द्येत वार्थवादस्यन्येष्वनकलंजंभक्षयेदित्यादावुपायाख्यन्यायनिरस्तमपि विश्वजिन्न्यायेन काम्यत्वं प्रत्युपसर्जनत्वेनोपस्थि एम.
तस्य प्रकृत्यर्थस्य नञर्थोपसर्जनत्वकल्पने निर्हेतुको गुरुस्त्रिविरोधश्चापद्येतेत्याशयः। तादृक्। औपाधिकं। फलेति १३०

यद्यपि बुध्यादिभेदः परस्यापि कथंचित्सुवचनः तथापि प्राप्त्यापत्तिरूपमिष्टानिष्टप्राप्तिपरिहारफलत्वेन विधिनिषे
धयोर्भिन्नफलत्वं विधिनिषेधयोर्नास्त्यं तत्भेदं विनात्वं भवतीत्याशयेनेदं निषेधस्थलीयनञो विध्यन्वयेन तद्विपरी
तार्थबोधकत्वं परास्तं कद्दपतिपन्नमतमितिं चेष्टसाधनत्वाभावबोधका एवं नञ्जन्यमते कुतो न स्यादिति चेत् । यस्य सति
तु सफलजनकस्य ताद्दृगते ष्टसाधनत्वस्याभावबोधनासंभवात् नापीष्टांशा एव प्रतिपक्षबोधनत्वं कुतो नो पन्यस्त
मितिशंकातत्स्यापदार्थत्वेनापरपदार्थान्वयानर्हत्वात् अनन्तुकलंजभक्षणाभावतिस्त्रेष्टसाधनत्वमेव लिंगोपात्तं तु
ष्टं च निसर्विधाविवक्षस्यायपरिहारः तत्साधनत्वं च तदभावप्रयोजकाभावप्रतियोगित्वात्मकं सुवचमभावेप्यतश्चा
हसर्वेषा विधिशिषाधान्यात् धात्वर्थप्रतियोगित्वस्य पार्थभावनाया एव प्राधान्यनियमात् । अयमाशयः कृतिसाध्येष्टसाध
नत्वे विध्यर्थ इति मतेतावत्सरेयागादिधात्वर्थविशेष्यकमत्प्रकारकबोधस्य विधावभ्युपगमान्निषेधस्थलेभावावि
शेष्यकत्वप्रकारकोबोधो वाच्यः न च सत्ता को कुंसभावेयागादिवत्कृतिसाध्यत्वाभावात् । इष्टसाधनत्वमात्रं विध्यर्थ

भा॰दी॰
१३१

इति पक्षेऽनुयागग्रहणमिष्टसाधनमित्येव विशेषो बोधः स्वीकार्यः। धात्वर्थगतप्रकारत्वानिरूपितविशेष्यतासंबंधेनप्र
तीतो भावनात्वावच्छिन्नाऽप्युत्तरजन्योपस्थितिः कारणमिति प्रत्ययेनैव लिङादिषु क्लृप्ततया लिङादिष्वपि सत्ति संभवेऽ
नुसरणीयत्वात्। तस्यैतदुष्यादेव नन्वर्थभक्षणाद्यन्वयः। ननु कथं भक्षणाभावेष्टसाधनमिति बोधः स्यात्। यदि
वस्यात्तदा कांशेषभक्षणनिषेधानां विश्वजिन्न्यायेन काम्यत्वं स्यादिति। धात्वर्थेनेति। उपलक्षणमेतत्। विधिमिन्नेनके
नापीति द्रष्टव्यं नैवेति। नन्वयुक्तमेतत्। यतोऽस्ति तृतीयमपि पर्युदासनिमित्तमाकारवतिङ्। तथाहि नदीक्षितस्यान्नम
श्नीयादिति न स्याद्दीक्षितस्याविज्ञातस्य क्रीतराजकस्यान्नमभोज्यं भवतीति च यथाक्रमं त्रय्यामथर्ववेदे चाम्नातस्य
वाक्यद्वयस्य दीक्षितान्नभोजननिषेधार्थत्वप्रतीतेः तेषु स्यापामपि क्रीतराजको भोज्यान्नः संस्थिते ग्नीषोमीये दीक्षितस्य
नमश्नीयादिति शास्त्रीयावधिद्वयस्य केवलनिषेधान्वयासंभवाद्राजक्रयाद्यवधिर्निषेधः एके न शास्त्रेणार्चवैदिकेनबो
ध्यते। अपरेण च तत्पीगतेनाग्नीषोमीयसंस्थाविधिभोजनसंकल्पविधिः पर्युदासाश्रयणेनेति विरोधाधिकरणवा

राम॰
१३१

131

त्तित उक्तत्वाद्विधिद्वयसंकीर्तनानुपपत्तिरेव पर्युदासनिमित्तत्वेन प्रतीयते। अतः पर्युदासनिमित्ते द्वैविध्यनियमो
न संगच्छते। न चापदर्शनाय द्विविधत्वेनाभिधानं कादृष्टकल्प्यत्वस्यापत्तेः। नित्यकल्पत्वान्नैयं व्यवस्था वा नित्यकल्पत्वं मन्तेति वक्तुं श
क्यं। पूर्वोपन्यस्ताया एतस्याः श्रौत्याः परिसंख्याकल्पनाया बाधापादकत्वात्। नित्यकल्पनाभिप्रेतत्वे समन्वायस्य बाधानुप
न्यासात्। न चैवमेवं सति स्वोपक्रमादेव पर्युदास इति नियमः। चातुर्मास्यव्रतानुष्ठानादिस्वोपक्रमस्य षष्ठिजेषु नमध
श्रीपात्रमांसमश्रीयादित्यादिविधिनिषिद्धस्य गमनस्यावश्यकत्वात्। न चोपक्रमविरोधादेव पर्युदास इत्यपि नियन्तुं श
क्यं एकादश्यां न भुञ्जीतेत्यनयोरुभयोरपि। वनस्थयतिधर्मीयमित्यत्रोपसंहारगतधर्मपदानुरोधेन पूर्वोदाहृतमादृ
र्णा पर्युदासाश्रयणान्यथाध्यासः। ग्राहकगृहीतो निषेधो धर्मो भवेदपि न पुनः स्वतन्त्रो निषेधस्तथा भवतीति। श्रेयः
साधनत्वरूपस्य धर्मत्वस्य क्लृप्तत्वेऽर्थनिषेधेषु संभवेऽपि स्वतन्त्रनिषेधेष्वसंभव इति धर्मपदानुरोधेन पर्युदास एवाश्रय
णीय इति तदाशयः। अतः कथमुपक्रमविरोधस्यैव पर्युदासनिमित्तत्वमित्यत्रोपक्रमग्रहणमुपलक्षणार्थं। पर्युदास

भा द्वा·
१३२
132

मंतरेणानुपपद्यमानं पदांतरेणैकवाक्यतामात्रं निमित्तत्वेन विवक्षितमिति चेन्न । न ह्येकवाक्यतैव पर्युदास
निमित्तत्वेन वक्तुमुचितानन्वितविकल्पप्रसक्तेः । पृथङ्निमित्ततोपन्यासः संगच्छते तथाहि यजतिषु येयजामहं करोति
नानूयाजेष्वित्यत्र यदि नञ् नस्यात्तदा यजतिष्वनूयाजेष्विति विरुद्धविभक्तिरहितानां नाम्नां तावदभेदान्वयबो
धः स्यात् नीलो घट इतिवत् पश्चाद्भेदबोधकः समभिव्याहारस्तत्र श्रूयमाणो नञ् भेदमेव बोधयति यथा न नीलो
घट इति । एवं च नानूयाजेष्विति नञो व्युत्पत्तिसिद्धभेदबोधकत्वाश्रयणेनैकवाक्यत्वे संभवति न पदद्वयानुषंगकल्प
ना पूर्वकं नानूयाजेषु येयजामहं करोतीति पृथग्वाक्यकल्पनमुचितमिति सैकवाक्यतानुरोधेँ दधि ब्राह्मणेभ्यो दात
व्यं कौण्डिन्याय न दातव्यमिति न्यायेन विशेषशास्त्रेण सामान्यशास्त्रस्य बाधोपपत्तेः । न चेहापि कौण्डिन्यभेदबोधकत्वं
नञः शक्यं कौण्डिन्यपदस्य विरुद्धैकवचनावरुद्धत्वात् । न हि न महान्तो राज्ञः इत्यत्र राजनि महद्भेदप्रतीतिवन्महत्ता
राज्ञ इत्यत्रापि तास्मिन्महद्भेदप्रतीतिर्जायते न चैकोनद्वावितिवद्विरुद्धविभक्तिकपदसमभिव्याहारेपि नञो भेदबो ।। राम·
+ नैवेहापि पर्युदाससिद्धिः । नेचहाविकल्पप्रसक्तिः ॥ ४
१३२

घकमास्त्विनिर्णायकं। तथासतिद्वितीयस्यदानस्याप्रसिद्ध्यैवैयर्थ्यापत्तेः। यदिचेदृशासामान्यविशेषविषयेपिविकल्पापत्ति
स्तदाग्नेयोष्टाउंत्रकुर्वीरेजनदीक्षितोजुहोति अयज्ञियावैमाषाइतिनिषेधेभ्योपिकथंनविकल्पापत्तिः। नचैतेषुपर्युदासो
भ्युपगम्यतेनचसंभवति। अग्नीतरकालेष्वाहुकर्तव्यताज्ञानेपिग्नित्रिश्राद्धदोषाभावापत्तेः। दीक्षितान्यस्यहोमकर्तव्य
ताज्ञानेदीक्षितेनकृतेपिहोमेकर्तोर्वैगुण्याभावापत्तेः। माषभिन्नस्ययज्ञियत्वाघकतावगमेपिमाषाणांप्रतिनिधित्वेवै
गुण्याभावापत्तेः तस्मादनुयाजेषुनविकल्पप्रसक्तिर्येयजामहस्य। सामान्यशास्त्रस्यानुयाजेतरविषयत्वेनप्रसक्त्यभा
वान्निषेधानुपपत्तिरितिचेत्। तस्माद्विद्वंनवसरंप्राप्तंयातंमीमांसकवचः। यतोनुयाजेतरविषयस्यापिसामान्यशास्त्रस्या
नुयाजसाधारण्येनतात्पर्यभ्रमादनुयाजेषुप्रसक्तस्ययेयजामहस्यसंभवत्येवनिषेधः॥ नहिनिषेधोवास्तवप्राप्तिमे
वापेक्षतेइदंवहि निषेधस्यापिनाहशास्त्राप्रातिसापेक्षत्वापत्तेः। नचशास्त्रीयनिषेधोभ्रांतिप्राप्तस्यनसंभवतीतिराजा
ज्ञाप्ति। स्वीकृतंचकुंडगोलकयोःश्राद्धभोजननिषेधस्यभ्रांतिप्राप्तविषयत्वंकेश्चित्स्मृतिव्याख्यातृभिः। नचसर्वत्रभ्यः

भा॰ द्वि॰ १३३

133

सवर्णासुजायंतेहिसजातयइतियाज्ञवल्क्याद्ब्राह्मणाद्ब्राह्मण्यांव्यभिचारोत्पन्नयोरपितयोर्ब्राह्मण्यापाद्यात्वतएवश्राद्धभो
जनप्रसंगोस्तीतिवाच्यं।विन्नास्वेषविधिःस्मृत इतिवाक्यशेषादूढायामेवसवर्णायांसवर्णोत्पन्नजातिप्रतीतेः।स्वीकृतश्च
श्चांतिशातपपर्युदासोपिप्रवराध्यायविद्भिः।यथैकएवकश्यपोवत्सत्रैवृषेष्वनुवर्त्तते।तावत्समानगोत्रत्वमन्यत्रमृग्यं
गिरसांगणादिति।अत्रत्यविवाहप्रयोजकसमानगोत्रत्वलक्षणंभृग्वंगिरोगणपर्युदासविधिरेवबोध्यतेसंनिधेर्हि
विधाभृग्वंगिरोगणाः।सप्तर्षिप्रसूताजमदग्न्यादयःकेवलाश्चहरितादयः।तत्रसमानानांसप्तर्षीणामगस्त्याष्टमानां
यदपत्यंतद्गोत्रमित्याचक्षत इतिगोत्रलक्षणाक्रांतेष्वाद्यगणेषुसमसामपिसमानगोत्रत्वप्रसक्तौनपर्युदासस्यपृथक्हि
षयत्वंतत्प्रयोजनभूतायाअविवाहसिद्धेर्जामदग्न्यानांसर्वेषामविवाहइत्यादिनात्र्यार्षेयाप्रतिबंधात्।पर्युदासवै
यर्थ्यापत्तेः।द्वितीयगणेषुतुपर्युदासप्रयोजनंसंभवति।भृग्वंगिरोगणेषुपंचप्रवरिणांप्रवरत्रयसाम्येनत्रिप्रव
रिणांप्रवरद्वयसाम्येनैवसमानप्रवरत्वमितिनियमेनैकर्ष्येतुवृत्तेसमानप्रवरत्वात्प्राप्तासत्वात्तेरणवाविवाहाप्र राम॰ १३३

तिवं भात्। तथापि तुल्ये पुत्रसमानगोत्रत्वप्रसक्तिः। सामर्थ्येन प्राप्ते पुत्रे भृगोत्रलक्षणाभावात्। अतो ऽन्यान्तिप्रसक्तस्य च ते
षु पर्युदासो वाच्यः। अप्रक्रान्तथा ऽन्योन्तिप्रसक्तेः। [redacted] येयजामक निषेधत्वं नान्यायाजे षिस
स्य॥ ततो नात्र विकल्पप्रसक्तिः। तस्यामपि तस्यां नतोपशो करोतीति वन्न पर्युदासाश्रयणमुचितं अन्यथा विकल्पप्र
सक्तेः। हन्तो कल्पत्वे किमिति तत्रापि पर्युदासो नाश्रीयते। दर्शपूर्णमासप्रकरणपठितस्य नतोपशो करोतीत्यस्यापि स्मृकातिदेशेन क
वाक्यतान संभवतीति न पर्युदासत्वमिति चेत्। हन्त पद्यतिरेकेण पर्युदासव्यतिरेकः सैकवाक्यत्वे वपर्युदासनिमित्त
त्वेन वक्तुमुचितानव्यभिचारिणी विकल्पप्रसक्तिः। यदि च तद्वाञ्जयन्यवृत्तिरपि पर्युदासआश्रीयते तर्हि व्रीहियव
योरपि विकल्पभयाद्यववाक्ये पुरपदगोणपारसाद्वीहिषेवयवसादृश्यविधिपरं किमिति नाश्रीयते। वैपरीत्यस्यापि
संभवेन किं विनिगमकमपि चेत्। व्रीहीणां मेधस्तुमनस्यमानरतिमन्त्रस्यानित्यवत्साठसत्वात्कथं च त्वीक्रतेपि पर्युदा
से विकल्पपरिहारः। नहि निषेध एव प्राप्तिमपेक्षते। न पर्युदासइतिशक्यं वक्तुं तथा सति समोऽध्वरइत्यस्य पर्युदासत्वा

भा॰दी॰ पत्तेः। अतो नेदं पर्युदासत्वमिति चेद्विध्यसंभवतीत्याशंकां क्रमेण निराकर्तुमाह। नञाभाव इत्यादिना एवंकारिते न दी
१३४ क्षितस्यान्नमश्नीयादित्यत्र पर्युदासेपि नातिरिक्तं कारणमिति सूचितं। स्वीकृता हि विरोधाधिकरण एव तन्निमित्तत्वेन
विकल्पप्रसक्तिः उपपादिता च न्यायसुधायां। अयोत्तरमर्थप्राप्तदीक्षितान्नभोजननिषेधे पूर्वे प्रतिषेधगतस्याक्री
तराजस्येति विशेषणस्यानर्थक्यापत्तेः शास्त्रानुज्ञातप्रतिषेधस्याभ्युपगमनीयत्वाद्विकल्पप्रसक्तिरिति। ननु स्वीकृ
तेपि पर्युदासे विकल्पः स्यादेवं। अशितस्यैव पायांकृतायामित्येतरेपि आह्वनगतावधिशास्त्रस्याग्नीषोमीयसंस्था
वधिशास्त्रवत्पर्युदासान्वयादिति चेत् किं ततः परिहृतत्वाद्राजक्रयनिरूपितो विकल्पः पर्युदासेन। न च कश्चिद्दोषः
परिहर्तुमशक्योस्तीति परिहर्तुं शक्योपि न परिहार्यः कः प्रतिषेधपर्युदासयोर्भेद इत्याशंकाह। पर्युदास इति। अत्रो
त्तरत्वेनाव्यवहितो नञ् शेषादिति त्वा न दीक्षितस्यान्नमश्नीयादित्यत्र नञोऽव्यवहितधातूनामन्वयस्यापि पर्युदासत्वात्। अ राम॰
नोऽव्यवहिताव्यवहितसाधारणो नञो स्यादितमक्रियार्थकपरमुक्तप्रदर्शाद्देन विवक्षितं। तेन निषेधे पर्युदासलक्ष १३४

णाच्चसंघाः। नेक्षेतनाग्न्यांजेधिस्यात्युदाहरणानिगतोत्सर्गोदर्शनमनुष्ठानस्य चेदं। वक्तृतत्वमावार्थकपदस्याक्रियार्थ
कपदान्वयः पर्युदासः इति बोध्यं। तेनास्यतन्मते एवं गिरेर्णांगणा दिस्यादेः सिद्धस्य पर्युदासत्वनासंग्रहः। नापि दीक्षितो
न जुहोतीत्यादेः सूत्रकाराद्यभिमतस्याप्यपर्युदासस्य। इत्यादौ विस्तादिना। नमर्थस्य श्रीपादेकादभ्यां न भुंजीतेत्यादिसं
ग्रहः। अत एव तस्य अनमितीति कारणः प्रकारार्थः। उपक्रमादितिचोपलक्षणं। अनुष्ठेयार्थकपदस्समभिव्याहारा
दित्यर्थः। उपसंहारान्ताहि पर्युदासानिमित्तभूपत्वेन प्राप्तान्तसंवादेन वानुग्रहीतमेवोपक्रमेलक्षणयापर्युदासप
समापादयितुमलं। क्वाचित्कं चउपक्रमगतं श्रुवेदाधिकरणन्यायेन निरपेक्षमेव तत्रालं श्रोत्सर्गिकचेत्यभिप्रायेण
परमसहस्रपक्रमोपन्यासः। यथा चैवं तस्यापि विकल्पस्य पृथकपर्युदासनिमित्तत्वं तथा स्पष्टं वक्ष्यामः। नञ्योऽर्थ इति
व्याकरणमहाभाष्ये दीक्षितो वमतशद्‌ समस्तकल्प एवं वोच्यः। तथा तसेव केशाप्निवर्त्तपीतस्य प्रमाणावपयीनाधः
शायीतेत्यायनिषेधवाक्येषु कल्पसूत्रेस्मृतियाख्यानेषु णासंकल्पलक्षणोक्तिर्निर्वाहान्। आभिधानादितिका

मादित्यर्थः। साकांक्षत्वेनापरिपूर्णत्वेन। न तु तस्य व्रतमित्यस्येवानुष्ठेयविशेषः कल्प्योऽत आह किं चेति। नाम
धातुयोगिनो लक्षस्य स्थापत्यादिनामयोगिनो नत्रस्तावद्बोध्यमर्थमहवदतीति। अब्राह्मण। अधर्मा। वित्तिन क्रमेणाम्य
मात्रं वितोधिमात्रं च वदतीति योजना॥ नन्वब्राह्मण इति पदाद्ब्राह्मणान्य इति प्रतीत्याश्रयतो पूर्वपदार्थप्राधान्यं
नञ्समासे समाश्रितं स्यात्। न च तत्पुरुषं केवलनञ्‌इवनञ्समासस्यापि लिंगसंख्यान्वयप्रसंगात् अनेकमित्येक
वचनानुपपत्तेश्च। अतिसर्वइत्यादावपि गुणाभूतस्य सर्वादेः सर्वनामसंज्ञाऽभावेन तत्पूर्वस्य स्मैस्मादित्याद्यपिका
र्यस्यासंभवापत्तेश्च। अत्रोन नञ्आरोपितार्थत्वमाश्रितोऽत एव दार्थप्राधान्याश्रयणेनारोपितो ब्राह्मणइत्यर्थो वक्तुमु
चित इति चेत्। न त्वथाऽरोपितमिह। जनं वस्तुनस्तज्जनमेतदिति प्रयोगानुपपत्तेः। न ह्यारोपितेनैव वास्तवेन वस्तुन
स्तारोपितज्जनमेतदिति प्रयोगः संभवति। किंचारोपितत्वाभिमतब्राह्मणत्वे प्रत्यक्षेणारोपितब्राह्मणत्वे च ब्राह्मणत्वाभिमंने
भ्रसंभिहिते प्रत्यक्षब्राह्मणत्वानानपेक्षत्वे क्षेपे प्रब्राह्मणत्वारोपश्चासौ तेषामेवानयनं। निषेधेनान्येषां ग्रहसंबंधेनतेषां वा

रोपस्य स्फटिकस्य पद्मरागस्य लक्षणात्वप्रतीतेः किंचाग्रा लक्षणाद्दृश्यन्नञोक्तमारोपितत्वं प्रतिकाचिद्वा लक्षणाद्व्यक्तिप्रतीयते उत्तस
र्वाः। अथवा ब्राह्मणत्वल्लाभातिः। नाद्यः यतस्तथा सति न व्यक्तिप्रतियोगिक एव भेदः प्रतीयेत नान्यव्यक्तिप्रतियोगि
कः। न द्वितीयः। अब्राह्मणशब्दस्यानित्यबहुत्ववचनान्तत्वापत्तेः। न तृतीयः। निष्कृष्टब्राह्मणविशेष्यकप्रतीतावेव प
र्यवसितस्याब्राह्मणशब्दस्य स्त्रियादिपदसामानाधिकरण्यासंभवापत्तेः। आरोपितत्वविशिष्टजातिप्रकारकोपामा
रोपाधिष्ठानभूतस्त्रियादिविशेष्यकायां प्रतीतावेव पर्यवस्यतीति चेत्तन्न अभाववाचिना नञाऽऽरोपितत्वलक्षणाया
लक्षणापदेनानिष्कृष्टजातेर्लक्षणात्तद्विशेष्यतया स्त्रियस्य च लक्षणेति लक्षणात्रयापत्तेः अनेकमित्येकवचनानुपपत्ति
तावदद्वयस्याश्चाएकत्वारोपाधिष्ठानत्वं द्वित्वयोर्बहूनां वास्यान्नचैतन्नैकवचनोपपत्तिः। अतः पूर्वपदार्थप्राधान्याश्रयणेन
ब्राह्मणान्यइत्येवार्थो वक्तुमुचितः। न च तथा सति नञ्समासे लिंगसंख्यान्वयानुपपत्तिः। केवलस्य नञोऽसत्वभूतार्थाभिधायि
त्वेपि समासान्तर्गतस्य सत्वभूतार्थाभिधायित्वं भविष्यतीति महाभाष्यकैप्यटाभ्यामेव तस्य रिहाना। अनेकमित्यत्र त्वनिर्द्धा

भा०दी०
१३६
131

रित्वविशेष्यकत्वेनैकवचनमित्यनिष्टत्वापि भवताम्युपेयं। उक्तन्यायात्। किंप्रधानोयं समासः उत्तरपदार्थप्रधान इ
ति भाष्यस्य पारिभाषिकोत्तरपदार्थप्राधान्यविधित्वाश्रयणेन च परिहृतत्वसमत्वानुपपत्तिपरिहारः यथा हि विशेष्या
र्थकस्याप्यव्ययादेः प्रथमानिर्दिष्टं समास उपसर्जनमिति पारिभाषिकोपसर्जनत्ववशेनोपसर्जनं पूर्वमिति पूर्व
निपातो भवति तथा विशेषणार्थकस्यापि नञ्समासोत्तरपदस्य पारिभाषिकप्राधान्यवशेन संभवत्येवातास्मिन्नि
त्यादि। न च प्राधान्यं पारिभाषिकं कल्पनमेव दोष इति शंक्यं। निर्विभागपदनञ्वादिभिः परैरपि पूर्वोत्तरपदार्थप्राधान्यो
क्तेः पारिभाषिकत्वस्यैवावश्यकत्वात्। यद्वा यथा केवलं तिष्ठतेर्गतिनिवृत्त्यर्थकत्वेपि प्रतिष्ठिते इत्यत्र प्रशब्दयोगे तिष्ठतिके
नैनैव गतिर्बोध्यते तथैव नञ्योगेन कत्वाश्रयणो ब्राह्मणपदेनैव ब्राह्मणान्य इति प्रतीतेः संभवति निर्वाह इति भाष्याशय मे
तत्सतीति निर्वाहाय पूर्वपदार्थप्राधान्यमवश्यापादयणीयं दर्शितं चास्य पक्षस्याभाष्याभिप्रेतत्वं कैयटेनोंयपास्मिन्नञ्ब्राह्मणे ऽब्राह्म रम०
णशब्दोऽन्यमात्रं वदति अधर्मशब्दो विरोधिमात्रं वदतीति श्लोकोपोऽप्यइत्यलं प्रसंगचिंतया। अस्मिन्न नञ्मिति तत्रदन्येत्यादिशंका १३६

वादिदर्शितं रुद्रस्य रत्यामिस्पर्धः। अविधेयत्वादिति विध्ययोग्यत्वादित्यर्थः। नात्रयजेषु इति। यथा भाष्यकरोत्येतत्र वाक्योदाहरणो
नैनत्तत्त्वचिंतनेवात्रानुषंगप्रसक्तिर्नापि परैकवाक्यत्वसंभव इति तथा हि। भाष्ये एषस्तस्तदशोयज्ञे अन्वायत्तत्र इति वाक्यं पेययजामह
ह विधायकत्वेनोदाहृतसमानानूयाजेषु येयजामहं करोतीति वाक्यं निषेधकत्वेनोदाहृतं। न्यायप्रभा हत्वम्नातिमिश्रपिदाशया
मिकाधिकरणोदाहरणं दर्शयद्भिरित्थमेव वाक्यद्वयमुदाहृतं। एवं चोन्नरवाक्य एव श्रुतस्य करोतीत्यस्य कुतः पानुषंगः। क
थं चान्वायत्तः करोतीति भिन्नक्रियापर्यवसितयोः परैकवाक्यत्वं। अस्ति च तस्मिन्कथं श्रुतत्वेनपर्युदासलाभः। सति
वैकवाक्यत्वतन्मूलकपर्युदासयोरनुयाजेषु समदशो न्वायत्तत्र इति शास्त्रेण सामर्थ्ये सिद्धे प्यनुयाजेषु निषेधसापत्तिः। यज
तिषु येयजामहं करोतीति वाक्येनैव समर्थ्यैकवाक्यत्वमुपपन्नस्तन्नानन्तपर्युदासः संभवतीति चेत्। कस्तार्हि रवायामनुप
लब्धमीदृशं वाक्यमायुष्मता मीमांसकमुखाच्छ्रुतमिति चेत्। किं न शीयाकर्णहेतुंतमाश्रोषीः। यथैव हि यो दीक्षितो यदग्नीषोमी
यं पशुमालभेतेति वाक्यं विषयत्वेनोदाहृत्याग्नीषोमीयेन पशुनायजेतेति वाक्यं न्यायसिद्धमादाय विचारो दृश्यते। तथैव सत

भा द्वा.
१२८
137

दशाइत्याद्युक्तप्रकारकमेव वाक्यद्वयमुदाहृत्य येयजामहमात्रगोचरनिषेधपर्युदासविचारस्तथैव येयजामहमात्रज्ञाप
कत्वेन कल्पितंन्यायलभ्यवाक्योरस्यंतवाक्यमादाय विचारो दृश्यते। न चेदृशवाक्यमादाय नास्तिकवाक्यानुसारिन्यायोप
न्यासो विदुषामुचितः। भवतु वा साधीयानेष वाक्यपाठः। कथं [illegible]श्रुसन्निलम्भः पर्युदासः। न हि सुंदोष्टहेयंतिष्ठतीत्येव
वोधो भवतीति केनाप्यलीकं तुशक्यं। वनवासिन्यपीदृशप्रयोगान्। अश्रुतत्वात्पर्युदासस्य श्रुसन्निलम्भत्वं तथाप्यनुयाज
भेदविशिष्टान्यागानुद्दिश्य येयजामहविधानुद्देश्यविशेषणस्यानुयाजभेदस्यैकत्वविवक्षा। न चानुयाजभेदस्यैवोद्देश्यता
वच्छेदकत्वमिति शक्यं वक्तुं। नारिष्टहोमादिष्वपि येयजामहापत्तेः। एतेन मीमांसकैकदेशिनोऽपि पर्युदासहेतुत्वेनैकवाक्यतामे
वयेमन्यंते तेनेयदपि द्वैकवाक्यता तथा मन्येरन्त दानिरस्ताः। किंच उपात्तत्वपत्नीसंयाजानां यदेन चातुर्मास्यान्युद्दिश्य विहि
तो न त्वेव दिनं वैश्वदेवे उत्तरवेदिमुपवपंति न शुनासीरीय इत्येनाम्नामाद्योत्तमपर्वभ्यां पर्युदस्यत इति सामासिकाधिकर — राम.
णाभावेनाधिकं नोक्तंत्तत्र पदैकवाक्यतायामुद्देश्यविशेषणत्वाद्यविवक्षा निमित्तवाक्यभेदद्वयमापद्यते। वहवश्च ग्रंथा — १२८

त्तन्मतेनुपपन्नं नाम भवेयुः तथा हि नानूयाजेष्विति पर्युदासविषयाधिकरणस्य विषयांतरेण होतारं वृणीत इत्यत्रातिदे
शिकहोतृवरणापर्युदासत्वेनाभिमतेति देशेनैव सह पदैकवाक्यं वाक्यानं चासंभवति आम्नानयोः समीपाम्नानमंतरे
णपदैकवाक्यतासंभवात् अन्यथा दूरस्थापित्तावकत्वेनैकवाक्यतापत्तेः आपद्यतामिति चेत् न जायमानो वै ब्राह्मणस्त्रि
भिरृणवा वाक्यशेषवशेन सोमे ब्राह्मणमात्राधिकारापत्तेः एवं न्यायसुधाकृन्मतेन प्रथमपक्षे ग्रहं स्यादित्यस्मिन्मते वृंज
नीति अनारभ्यवादपर्युदासेप्यनारभ्यवादेन सह पदैकवाक्यतानुपपत्तिर्दर्शयितव्या न चैवमेव पार्थसारथिप्रभृतीना
मिह पर्युदासानंगीकारे बीजमिति वाच्यं तत्र बीजांतरस्यानुपदं वक्ष्यमाणत्वात् किं च संक्रान्त्यामुपवासं च कृष्णैकादशि
वासरे चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही इत्यादिषु नारदादिवाक्येषु शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्। सैवोपो
ष्या गृहस्थेन नान्या कृष्णा कदाचनेति भविष्योत्तरवचनेन चाश्रमस्थगृहिणां कृष्णैकादश्युपवासस्य पुत्रवद्भिन्नविषयत्वेन प
र्युदासो बोध्यत इति हेमाद्रिणोक्तं। तत्र कथं तेषां तस्य च पदैकवाक्यतोपपत्तिः भिन्नग्रंथगतत्वात् भिन्नविभक्त्यंतगृहिगृहस्थ

मा. दा.
१३८
138

परोपेतत्वाच्च॥ न तूपपन्नो वा तु स्नानाद्यन्तरायात्वीकार्यस्य चंद्रसूर्योपरागनिमित्तोपवासे पितृपुत्रवत्पर्युदासस्य शास्त्रवृत्ते
न तत्त्वापक्षैरेव वाक्यैः सहैकवाक्यतापत्तेः॥ संति हि अयने विषुवे चैव चंद्रसूर्यग्रहे तथा। अहोरात्रोषितः स्नात्वा सर्वपापैः
प्रमुच्यत इत्यादीनि विस्पष्टाद्विवचनानि तानि दृश्यानि हेमाद्रिणोदाहृतानि। नतु सूर्यग्रस्तास्तेऽर्थो उपवासप्रापयप्या सूर्य
ग्रहे तु नाश्नीयादाद्येयामचतुष्टयमिति। अविमुक्तास्तंगतयोर्दृष्ट्वा स्नात्वा परेऽहनीति च वृद्धगौतमस्मार्तस्य वचोभ्यां। मास्तु
त्वास्नामेव वा कृतेति चेत्। न तथा सति ताभ्यां प्रापितोपवासस्य वा तस्य पुत्रिगृहीणा त्वीकारे बाधकाभावेन हेमा
णे वा पुत्रिगृहिणा उपवासनिषेधवशेन तद्वाक्यद्वयप्राप्तितोपवासानुपपत्तिशंकाया प्रदर्शिताय तत्र तत्समाधानाप
पत्त्याद्युपसंगवे श्नीयाद्धारदे संगवाद्धरित्यादिस्मार्तवचनस्य वेधसंकोचबोधकस्य पुत्रिगृहिविषयत्वमुक्तं तदुभय
मप्यनुपपन्नं स्यात्। यदि तु होमानुवादेन दध्यादिगुणविधिवदुपवासानुवादेन पर्युदासविधिमाश्रित्योपवासस्याप
केन वाक्यैकवाक्यताऽश्रीयते तदाऽनुवादरूपशब्दार्थ्या प्राप्तोपवासविषयत्वसंभवाच्छक्यते तदुभयमप्युपपादयि

ग. प.
१३८

त्। अथवा कैवाक्यतामेव पर्युदासहेतुत्वेन स्वीकुर्म इति चेत्। नायमपि हि येयजामहकरणविधिना सहनानू-
याजेष्विति स्यसंनिधिपाठोऽस्ति तथापि वाक्यैकवाक्यतायां को लाभो यदर्थं पर्युदासः कल्प्यते। न तावत्पदैकवाक्यताया-
मिवानेकतात्पर्यकल्पनागौरवपरिहारः। प्रत्येकवाक्यार्थगोचरतात्पर्यभेदकल्पनाया आवश्यकत्वात्। प्रकृ-
ते महावाक्यार्थगोचरस्यैवाकाङ्क्षया प्रमाणस्य तात्पर्यान्तरस्य कल्पने गौरवाधिक्यात्। न च येयजामहविधिः प्रकरणा-
त्तथा निश्चितः। येन प्रकरणानुग्रहायापि समाश्रीयेत। मात्रैकवाक्यतायाः पर्युदासहेतुत्वे कथं तु विकल्पप्रसक्तिः। क-
थं च तथा पर्युदासासिद्धिरित्याशंका विकल्पप्रसक्तिं तावदुपपादयति। तथा हीसादिना। शातिमिति। अत्रापि निषेध्यस्ये-
ष्टसाधनत्वप्रतीतिः। प्रकर्षश्च नञ्स्थाः प्रमात्वप्रवृत्तिफलोपहितत्वेन च प्रतीयमानत्वोपपत्तिर्बेधस्यैसन्नैतरं वैदिकस्येति
दोषः। यद्विषये इष्टसाधनत्वप्रमायास्तु प्रवृत्तिफलोपहितता वगता भवति तन्निषेध एव तद्बाधिका रिको वैदिकः संभ-
वतीत्यर्थः। प्रमात्वापेक्षामुपपादयति अत एवेति। वेदपुराणेतिहासेषु लोकानां तत्स्थानामिन्द्रादीनामुपज्ञानुष्ठानमप्रवणा

भा॰टी॰ १३९ 139

दंतरिक्षद्युलोकाधिकरणकचयनं तेयाश्रयः साधनमिति येत्राम्यं जितहृष्टेन चनादृष्टावपनस्यं द्वारिप्रवृत्तिविष
यभावसंभाव्यं जितद्रूमायनयनेन संभवत्यतिषेधत्वस्यापिनांतरिस्त इत्यादेर्थः प्रतिषेधत्वानंगीकारस्य प्रमारूपा
प्तिं विनानिषेधानुपपत्तेरेव अन्यथानस्यनिसानुवादत्वं नस्यादित्यर्थः। प्रवृत्तिफलोपहितत्वापेक्षानुपपादयति। स्वज
एवेति। ऽस्वरूपस्यनेतरं हननेष्टसाधनताप्रमाधानपीतिशेषः। प्रामाण्येति अनिर्णीतस्यानिष्टानुबंधित्वस्यनिर्णी
यजननेनेत्याशयः। उक्तेति प्रवृत्तेः प्रमातृगतो निवर्त्तपितव्यः यथाहि सिद्धविघटेनेव तदिष्टप्रतिसंभवत्प्रामाण्याः
अनुविधयोन चतुर्थप्रतिप्रवर्त्तितविधायस्येपापात्तगौरवभयात्तथा ऽनिष्टानुबंधित्वसंशयेनाप्रवर्त्तमानं प्रतितन्नि
श्चयजननेन संभवत्प्रामाण्यानां निषेधानां नानिष्टानुबंधित्वनिश्चयेन प्रवृत्तात्प्रतिपद्यत्ते हृ चितानां निश्चयपवा
धेसंभावात्तस्यानिष्टानुबंधित्वस्यप्रापणे च गौरवातिशयादित्याशयः। बोधकत्वमित्यनंतरमपिफलकमिति शेषः। अप्र
प्रवृत्तंप्रत्येवतत्र चरितेन नियमपरत्वस्यादित्याशयः। भवत्वेवं रूपप्रामाणिसापेक्षत्वं निषेधानां तथापि हनननिषेधइवयेयजा

राम॰ १३९

महनिषेधेविनविकल्पप्रसक्तिरतआह समाचेति। भ्रांतिरनिष्टानुबंधित्वभ्रांतिः। शास्त्रेएतस्येष्टसाधनत्वप्रापकस्येत्या
दिः। तस्यास्वंतत्वाधेहिंसत्वनुमाजरूपेष्टसाधनत्वशामेभ्रांतित्वं वाच्यं तथासति पूर्वोक्तप्राप्त्यभावे निषेध एव दुःस्थितः
स्यादित्याशयः। कौंडिन्यदृष्टांतेन पूर्वपक्षं किंतु सामान्यविशेषबाधं निरस्यति अप्य चेति। निषेधशास्त्रस्य वैदिकनिषेधस्येत्यर्थः
। इति शब्दः प्रकारवाची। विधेरिष्टसाधनत्वप्रमितेरित्यर्थः। अयमाशयः बोधवाक्यानां सर्वदा सर्वपुरुषान्प्रत्येकरूप्येणोवप्रा
माणं वक्तव्यं। ग्रहणधारणाध्ययनविधिप्राप्तत्वेवापेक्षणात्। एवं वा नाहिंसायां रिष्टत्वं यत्र तु हिंसायां इत्येतत्प्रोच्य ऽप्राप्त
न्यायात्र निषेधनिरूपणावसरोक्तन्यायाद्वा न तु नञ्भावे ऽनूयाजेषु यजाम इति करोतीति वचन उपसंहारार्थं स्यात् तत्र चा
नुयाजोद्देशेन येयजामहस्याप्रयोद्देशेन चतुष्टीकरणस्यैव विधेयत्वात्सति न जितस्यैव निषेध्यत्वमुचितमिति चेत् समा
नशास्त्रावाप्ताउपसंहारविधावनारभ्याविषयस्याप्युद्देश्यविधेयभावस्य शास्त्रांतरेणास्यार्थप्रतीत्या यावन्मात्रं तत्प्रयोजनस्यास्यात्
नञ्भावेन किंतस्य वास्तवोद्देश्यविधेयभावस्यैव सति न विद्देश्यनिषेध्यभावनियामकत्वात् अत उक्तं विधय एव वाक्यार्थो वा

मा॰ द्वा॰ १४० 140

ध्यः। यदनुयाजेषु येयजामहं कुर्यादिति न निर्वचनव्यक्तिर्निषेधपक्षवाच्या प्रत्यक्षमानाम्नायेन च नञ्भावेऽनुवादयता यापन्नती
न पदार्थमध्ये कस्यापि सत्तिन त्रितच्छब्दोपदंधेन निषेध्यतारूपविषयताऽसंभवाद्दशवाक्यार्थबाधकस्य कुर्यादित्संज्ञा
वांतरवाक्यार्थप्रसित्ध्यधीनः। अप्रसिद्धस्यानुवादयतायोगात् न च विशिष्टानुवादे वाक्यभेदप्रसङ्गेन येयजामहमात्रस्य नि
षेध्यतान्नावांतरवाक्यार्थप्रसित्ध्यपेक्षेति शंक्यं नैमित्तिकवैदिकत्वेन निमित्ताभ्युदानेकैत्वपूर्वसाधनतात्मकविशेष
सिद्धिवद्वैदिकनिषेधवशेन निषेध्यस्य कत्वपूर्वसाधनतात्मकविशेषप्रसिद्धिदशायां यत्रयेति वाक्येपजिने साधपूर्वसा
धनत्वे वयेयजामहपदेमानूपाजापूर्वसाधनत्वोपादित्वे वयेयजामहस्याविवक्षायां तत्प्रसिध्यपेक्षापायावक्ष्यपवक्तव्य
त्वात्। न ञनिषेधप्रवृत्तेः प्राप्तमान्यथानुपपत्त्या प्रत्यक्षमोऽस्य तत्प्रसिद्धिमादाय प्रवृत्तेनापि निषेधेन पदशास्त्रेणाहवनी
यशास्त्रस्य पदहोमान्यविषयत्वमिव सामान्यशास्त्रस्यानुयाजान्यविषयत्वं प्रदर्शयते न दात्रु याजे येयजामहसंसर्गस्यत एम॰
तो प्रसिद्धेरन्यतश्च तत्प्रसिद्धेरशक्यत्वादप्रसिद्धस्य चानुवादयतायोगात्कथमुक्तविधवचनव्यक्त्याश्रयणेन निषेधप्रामा १४०

एवमवतिष्ठते । न हि शशविषाणभ्रमदशायां यच्छशविषाणेन कार्यं कुर्यात्तन्नेति संभवत्यत्र हन्तिको पि निषेधस्तद्बाधद
शायां प्रवर्तितु मुत्सहत इति सहृदयैरेवालोचनीयं । अतो निषेधेनैव स्वप्रामाण्ये कात्स्न्यर्न निर्वाहाय सामान्यशास्त्रस्या
नुपाजयेप जाम हं संसर्गे प्रामाण्यमनुमंतव्यं । न चैवं स्मृतिष्वपि भ्रांति प्राप्तस्य निषेधपर्युदासो न स्यात्तामिति शं
क्यं । एकरूपप्रामाण्ये शून्यत्वाकानां तासु बहुरूपत्वेः । यथैव व्यन्वयव्यतिरेकमूलकानियत्रानुकूल्यं दर्पसो । त्रिवर्ग
स्तत्र वर्द्धत इत्यादिवाक्यानि अन्वयाद्यालोचनाकुलाः शास्त्रतिप्रामाण्यमनुतमत्स्यपि तदालोचनकुशलाः शास्त्रतिन प्रामा
ण्यमनुभवंति । तथा यदि कानि चित्तमेव प्रतिभांति दस्प्ययां प्रामाण्यमनुभूयबाधदशायां नानुभवेयुस्तदा न स्मृतिः
न नु वेदवाक्यस्यैव विधुतानतैकरूप्येणोव प्रामाण्यमस्वकमुचितत्वात् । अन्यथैव गुणविधिरेष उत्पत्तिविधिरेष निसानु
वाद इति व्यवस्थोच्छेदापत्तेः । पुरुषभेदेन कालभेदेन प्रतिपत्तिवैचित्र्यस्यानिवार्यत्वात् । न चैवं नदीस्त्रिो जुहोतीत्यादावपि निक
ल्पापत्तिः तत्परिहाराय उपद्रवस्य मात्रा तावदिति फलितमाह एवं चेति । भवतु विकल्प इत्याशंकां तस्य दूषकत्वाविजमाह । स चे

भा॰ दी॰ तिभावाभाववाचिनो नञ्नुपाज शब्दयोः कथं संबन्ध इत्याशंक्याह नत्रभुपाजेति । नञो प्रश्लेषः करोतीत्यत्र प्रयोजनासंभवेन
१४१ पर्युदासाभावं सूचयितुं प्रकृते वाक्यार्थशोधनपूर्वकं पर्युदासप्रयोजनमाह अत्र चेति । यथायेयजामहोपन्नसामान्यानुवा
देन विहितस्य त्याद्यभागो विहितो स्यान्तो नदान्तद्विधेर्विषयसमर्पणाय प्रसुवर्जमिति पर्युदास आश्रीयते न चैवं उपदे
शा विधेर्दर्शपूर्णमासमात्रविषयत्वात् अतिदेशस्य च तत्तद्विकृतिविषयत्वात् न च नार्थपंचदशीत इति वदाऽप्यभागवर्जपरो
तद्वत्कुर्यादित्यतिदेशविषयसमर्पणायैव पर्युदासाश्रयणासंभवः । तथा सति नञो प्रश्लेषः करोतीत्यस्य प्राप्तकातिदेशप्रव
त्त्यनन्तरं वृत्त्यापत्ते अकृतव्येति चेत् । न दार्शिकाऽप्यभागविधिमात्रजन्यामसाधारण्येनाऽप्यभागोपस्थितिमपेक्ष्य प्रवृत्तेन तता
वितिपदेन युक्तस्यास्य शास्त्रस्य समन्तोपदेशप्रवृत्त्यनन्तरं भाविप्राप्तकातिदेशोत्तरप्रवृत्त्यसंभवात् न च निषेधस्यापि शास्त्रस्य पे
क्षितत्वात् प्राप्तकातिदेशोत्तरप्रवृत्तित्वं तस्यास्त्विति शंकायाः प्राप्तत्वेनोन कार्यादिति ग्रन्थगुणादेनाऽप्यभागवर्जनं गत्वेन बोध राम॰
यतोस्य शास्त्रस्य प्राप्तिरूपप्रमाणतिमात्रसापेक्षत्वात् भाविप्राप्तिसंभवेन च प्रयोजनवत्वात् पर्युदासपक्षेऽत्यतिदेशविषयसमर्प १४१

णानिर्वाहमयस्यशोभनत्वकृत्पात्रदास्यभागवर्जमित्येववचनव्यक्तिःसूचितत्वात्तस्याश्चप्राप्तिःद्वातिदेशासापेक्षत्वादित्या
शयः। पर्युदासाश्रयणेवाकथंनविकल्पइत्याशंक्याह। एवंचेति। प्राप्तइतिप्राप्नोतीत्यर्थः। नचैवंनसोमेध्वरइत्यत्रापिप
र्युदासापत्तिः। पर्युदासस्थलेवाक्यार्थबोधनिर्वाहायप्राप्तिद्वारास्यनपेक्षत्वेपिप्रयोजनवत्त्वनिर्वाहायतद्व्यतिरेकेपर्यु
दसनीयगोचरसंभावितप्राप्त्यपेक्षत्वात्। इहचतदभावात्। नन्वेवंव्रीहियववद्विकल्पपरिहारायययवशाद्वोपियवशास्त्रेव्री
हिसुयववत्स्यात्उपविधानार्थस्यात्। समाजेपतंसविशेषणीयपर्युदासस्थलीयलक्षणावदंहीयसनआहलक्षणायेति। वाक्य
स्येत्यनंतरंस्वार्थइतिपूरणीपांनात्रुपाषितिनिषेधाद्धियेयजामहनिहन्तिरनुयाजेष्विमासर्वेणाप्रतीपत्वेनचलक्षणायापर्यु
दासाश्रयणेसास्यन्तेअपाक्षिकत्वसिद्ध्यासुनसंतन्निर्वाहात्। अनन्यास्वर्थविषयतयाप्रतीयमानार्थगोचरशाभाणपत्ति
ध्यनुगुणायालक्षणायावेशेषयमाश्रपस्यर्थमितिन्यायेनवेदानुमतत्वाद्दोषत्वंयवशास्त्रेनुपवानांवित्यवत्साधननानात्स्पर्ये
णाप्रतीयमानोगोणीचाश्रीयमाणानोवोधेनैवेतिनज्ञोचरशाभाणपपत्तिध्यनगुणापालक्षणावेशानानुमतत्वादोषत्वमित्याशयः

भा॰ दी॰
१४२
142

न च शाब्दबोधवेलायामबोध्यायां फलत्वेनार्थात्सिध्यंस्तामपि निरन्नैनानूपाधित्सस्य कथं प्रामाण्योपपत्तिरिति शंकां ह
स्तादिविधेर्नियमादाविव तात्पर्यविषयत्वेन तत्सांशामाण्योपपत्तेः। न्यायसुधाकारोक्तं परिहारमाह। तन्मात्रेति। तदूषणा
यसंप्रदायमतमाह। अन्येत्विति। रूपइति संकोचानर्हत्वेपि तेऽनेनेऽस्यार्थः। विशेषं प्रतिपाद्यर्थज्ञापनात्मकस्याशयः। अ
भेद इति फलेकात्मप्रमाणांतरत्वरूपभेदाभाव इत्यर्थः। मात्रशब्दोभिन्नक्रमः। कार्त्स्न्यवाची च विधानमात्रादिति पदे संक
ल्पसामान्यतः फलसाधनत्वेन विहितः सन्निहपापक्षयार्थत्वेन विधीयेत तदा संभवेदपि तत्संकोचः। न चैवमस्ति इहैव सं
कल्पगोचरविधिचतुष्टयांगीकरणादित्याशयः। प्रत्युत विधेरुपसंहारविधित्वाभाव एव विरोधस्तमाह विध्यभाव इति।
ननु पर्युदासं न स्वयमेव विषयविशेषसमर्पणान्न विधिरपेक्ष्यतेऽतः श्रुतोप्यविवक्षितोऽत आह। न चात्रेति नास्तीत्यविव
क्षित इत्यर्थः। फलाभावादविवक्षां ब्रूमो न पक्षद्वादिवत्पर्युदासस्य तच्छक्तिविघातकत्वेनेत्यत आह। अत्र हीति। समर्थक इ
स्यनंतर इति सत्यमिति शेषः। पारार्थ्यबोधने विभक्तेरिवोपसंहारे विधिसहकारित्वेनैव विशेषोपस्थापकपदस्यमित्रवि

राम॰
१४२

हादिषु करणस्याननुष्ठानं अशक्यापारार्थ्येनेति मूलकृताऽप्युक्तं संक्षेपेणेत्याशयः। विधिविरोध इति पर्युदासो हि स्वाङ्गीयमा
णो विकल्पपरिहारेण निरवकाशवृत्तिपल्लवो वाच्यः। न चैष पर्युदासस्तथा वक्तुं शक्यते। प्रत्यक्षविधिविरोधादिति भावः। अ
त एवेति अनेनैव प्रकारेणोत्पत्त्यर्थकविरोधादिति पंचम्यन्तेनान्वेति। अत एवेति चो भिन्नक्रमः। अत्रेति यथात्र पर्युदासकल्प
नानिमित्ते सत्यपि तदनुपपत्तेर्निषेधस्तथा लक्षणस्यापि पर्युदासस्य क्वचिदनुपपत्तेर्निषेध एव यथा सहस्रसंवत्सरमनुष्ठा
णमसंभवादिति कात्यायनसूत्रे व्याख्यातं च तथा कर्कचार्यैरित्याशयः। यत्रेत्यनन्तरं क्रत्वर्थ इति शेषः। उपलक्षणं चैतत्
पुरुषार्थविकल्पापादकोऽपि यत्र निषेधस्तत्रापि न निषेध्यस्यानर्थहेतुत्वं। निषेधस्यानावश्यकत्वाज्ञापनपरत्वात्। अत एवाह
यत्रान्त्येति। प्राप्तिश्च रागतः स्वप्रयोजनदर्शनव्याजेन दीक्षितो न जुहोतीत्यादौ विकल्पापत्तिं निराकरोति। दीक्षित इति
। ननु यावज्जीवमग्निहोत्रं जुहुयादित्यादेर्दीक्षितेतरविषयत्वेन संकोचे प्राप्त्यभावान्निषेधानुपपत्तिः अथ संकोचे वा अस्त्वेव प्रा
प्त्यसंपत्तिकत्वाधायेणाद्वर्जनीया विकल्पापत्तिरिति चेन्न स्यादेतदेवं यदि दीक्षितो न जुहोतीति नञेति वचनव्यक्तिः प्राप्ती

भा॰ दी॰ १४३ 143

येतन्नत्वेवंयजुर्होतिनदीक्षितोनेतिहोममात्रप्राप्तिसापेक्षायावचनस्यकेशाश्रयणात्तथाहिनञ्भावेयदिधातुं
योग्यंमन्यसितर्हितस्मिन्नञ्जातपदोपबंधेनानुबंधकोऽपिनिषिद्धतयाशंकांदर्शयितुमितिनञ्भावेनञ्पदोपबंधेनयथाविधे
यंभवतितथासतितस्मिन्नञ्पदोपबंधेननिषेध्यतांप्रतिपद्यते। विधेयतात्मिकायाइवनिषेध्यतात्मिकायाअपिविषय
तायास्तदुपबंधादिनाऽर्थविशेषेणभवितुंशक्यत्वात्। यदिचदीक्षितोजुहोतीतिस्यात्तदायावज्जीवविधिनापिहोमंप्रतिदी
क्षाविशिष्टकर्तुर्गुणभावप्राप्तेर्होमोद्देशेनदीक्षितएवविधेयःस्यात् अतःसतिनञ्यजुर्होतीतिहोममात्रानुवादेन
नदीक्षितोनेत्येवंस्यएवनिषेध्यत्वेनवक्तुमुचितः। तथाचहोमप्राप्तिमात्रेणोपपन्नत्वात्समासमपियावज्जीवविधिनादी
क्षितकर्तृकहोमप्राप्तौनानुपपत्तिर्निषेधस्य। अस्तिवास्मिन्दीक्षितंप्रतिहोमप्राप्तिसंभवात्पर्युदासवत्प्रयोजनसंभवः
अतएवसमेतःपर्युदासत्वस्यवहायः। नचदीक्षितत्वेनरूपेणपूर्वस्यइवानुयाजत्वेनरूपेणानुयाजानामपिसंबंधाप्राप्तेर्ना
नुयाजेषिसमानानियदनुयाजेषुयेयजामहंकरोतीत्यत्रवाचानुपपत्तिरितिशंक्यंयजेषुयेयजामहंकर्तव्यइतिविधेःप्रसक्त एम॰ १४३

दृष्यसमाप्त्याऽनुयाजत्वेनानुयाजशेषिनाशात्तिसंभवात्। अग्निहोत्रं जुहुयादितिधेत्यक कर्तुर्विधेयत्वेप्यस्य विप्रतिप
त्तिसमासमभावेन दीक्षित[illegible]त्वेन दीक्षितकर्तृत्वाभावात्तेः। न च जत्वेन दीक्षितकर्तृकत्वाभावाद्वपि दी
क्षाकालीनहोमप्राप्तिमात्रेणायदीक्षितो जुहोतीत्यनुवादः किं न स्यादिति शंक्यं नजभावेप्यजीनायात्तद्व्द्वोष्येत्स्य वि
षयताया असति बाधके साग साम्याप्यसात्। दीक्षाया उपलक्षणत्वप्रसक्तेश्च। तस्माद्यावज्जीवविधेर्दीक्षितेतरविषय
त्वेन संकोचे विषयज्जुहोतीति न दीक्षितो नेति निषेधस्य नानुपपत्तिः। यद्वा नैव तत्संकोचो न च शास्त्रप्राप्तस्य बाधप्रसंगः। य
दि हि यावज्जीवविधिकृतां दीक्षाकालीनहोमप्राप्तिमाश्रित्य प्रवृत्तेनयादीक्षितो जुहोतीति त्रेति निषेधेन तस्य विधेर्दीक्षे
तरकालावच्छिन्नजीवननिमित्तत्वपरतया संकोचः क्रियेत तदा दीक्षाकालीनहोमाकरणात्प्रत्यवायः। तत्करणात् द्वा
नपाप्रसंगस्य एवेतिध्येया। अनुतेनकरणाज्ज्योतिष्टोमवैगुण्यं। उपजीव्यशास्त्रार्थमवश्यालोचनीयविधिसंकोचेनैव निषे
धस्य प्रयोजनवत्त्वलोभे प्रकरणेन क्रत्वंगत्वकल्पनानुदयात्। तथा च प्रकरणपाठबोधापत्तिः। अतो यो होमस्तं दीक्षितो न

भा द्वा॰ कुमार्यादिनिवेद्यबलोऽस्मिन्निति सिद्धहोमस्वरूपानुवादेन तद्वर्जनरूपनिषेधनैः सन्निहितसामान्यानुबन्धबोधकशास्त्रेणानदि-
१५४ ष्टोपकाराकाङ्क्षायां क्रतुविध्येकवाक्यतां प्राप्य वर्जनस्यापूर्वहेतुत्वं बोधयता प्रतियोगिना तत्सन्निवेशकत्वमापद्यते न तु विध्ये-
न संकोचः नतरां तद्बाधः न चैवमकरणे प्रत्यवायभयान्नदीक्षितैर्होमान्निवर्तितेति शंक्यं कांदिंसागोचारसांख्योक्रम्यापेन
ज्योतिष्टोमफलकामनस्य प्रत्यवायमप्युपठाप्यापि निरस्य प्रपञ्चितः॥ महाभाष्यकारैः कूपखनन न्यायेन वैधमद्यस्यापि प्र
अथवा कूपखानकवदेतद्भविष्यति। न यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवत्यप्सु संजातासु तत ए-
वतं गुणमासादयति येन च स दोषो निर्हण्यते भूयसा वाभ्युदयेन योगो भवति। एवमिहापि यद्यप्यपशब्दज्ञाने ऽधर्मः तथापि
यस्त्वसौ शब्दज्ञाने धर्मः तेन स च दोषो निर्घानिष्यते इति इदं भाष्यं अत्र भवसंतेऽस्यायः अग्रेतनोपक्रान्तेऽकृतं लक्ष्यन्यायेन वो
त्वन्न स्यापि प्रत्यवायस्य प्रधानापूर्वेणैव नाशाभ्युपगमात् अनुकूलत्वर्थहिंसाविधिना पुरुषार्थनिषेधस्यैव क्रत्वर्थनिषेधेऽप्युप-
कार्थहोमविधेरपि संकोच एव कुतो नाभ्युपगम्यत इति चेत् नयतो निषेधस्य प्राप्त्यपेक्षायां गम्यमानोपपन्नस्य खत एव शास्त्रीयदि- एम १४४

यामप्रवृत्तिं वदामो न तु विधिनाऽनर्थसंकोचं ब्रूमः॥ इहापि यदि यावज्जीवविधिः करणनिषेधबाधकः स्यात्। तेनैव स्या
येन श्राद्धीयमकरणं न विषयीकुर्यात्। करणविधिस्त्वयं कथमकारणसंकोचं गच्छेत्। अतो यथैकस्मिन्सर्वपूर्वाह्णेन क
कामस्यानेककाम्येष्टिसंनिपाते युगपदनुष्ठानासंभवात् फलैकोत्कटकामस्तेनान्यत्र न प्रवर्त्तत इत्येतावतानान्यशा
स्त्राणां विषयतः फलतो वा बाधो व्यवह्रियते तथा सोमफलार्थी यदि नाग्निहोत्रे प्रवर्त्तते नैतावता यावज्जीवविधेः क
थमपि बाधव्यवहार उचित इति कथं शास्त्रबाधनिमित्तविकल्पप्रसक्तिः। अमुमेवाशयेनोक्तं स्वार्थत्वाभावेनेति।
पो यावज्जीवविधेस्तात्पर्यविषयोऽकरणस्य प्रसक्त्याय हेतुत्वं तस्मैव प्रतिषेधस्य विषयो निषेध्यत्वेनेत्याशयः। विधेस्तु
बाधकोऽपि निषेधाभावेन पर्युदासतुल्यत्वात्सोऽत्र व्यवहारोपपत्तिः। एतेन यच्छ्राद्धं न दद्यात्तेन तु कुर्वीत इति योयज्ञतत्त्वमा
षेनैकुर्वीतेति केवलंश्राद्धं यत्तच्चानूपरातिमात्रवर्जनपरं गत्वा बोधकशास्त्राभ्यां विकल्पप्रसक्तिर्व्याख्याता सा त्रिभा
षयोर्यज्ञे गत्वप्राप्स्यनपेक्षत्वमात्रेण तुल्यन्यायत्वोपपत्तेः। नन्वेवमपि न प्रथमयज्ञे फल्गुआदिस्यत्र तातीयसिद्धान्तो न

भाद्दा॰ १४५ 145

संगृह्यते तथा हि वाक्यपादे संस्थाप्रक्रमकृतेः प्रकरणात्साद्गुण्याधिकरणेन प्रथमयज्ञेऽप्रवृत्तस्यानद्वितीये तृती-
ये वा प्रवृत्त्यादिस्फुटाहृत्य चिन्तितं किं प्रथमयज्ञशब्देन ज्योतिष्टोममनूद्य तदीयसर्वप्रयोगेषु प्रवर्ग्यो निषिध्य-
ते उत तदीयं प्रथमप्रयोगमनूद्य तत्रैव स निषिध्यत इति। तत्र य एतेनानिष्ट्वेति शास्त्रेण ज्योतिष्टोमे प्रथमयज्ञपद-
प्रवृत्तिनिमित्तावगमात् तदधिकारे शेषे चैष वाच्य प्रथमोपस्थितोपज्ञानं यज्ज्योतिष्टोम इति प्रथमयज्ञशब्दस्य ज्योतिष्टोम एव वृ-
त्तेः प्रयोगत्वाय यज्ञशब्दस्य च प्रयोगे लक्षणापत्तेः प्रथमप्रवृत्तिवाचिनः प्रथमशब्दस्य योगे च लक्षणापातात् एकशब्द-
स्यार्थं तत्रादिष्टिवद्वेदवृष्टत्वेनादोषत्वात् प्रकरणानुग्रहलाभाज्ज्योतिष्टोम एव प्रवर्ग्यनिषेधः। न च नारभ्यं यत्राव-
जन्तीति विहितं प्रवर्ग्यप्रकृत्यपठितनिषेधे कथं प्रकरणानुग्रहः। उत्तरत्राद्युपसदां प्रवर्ग्येण प्रचरन्तीति शास्त्रेण यत्रो-
पसदस्तत्रास्याविस्यवगतेस्तासां ज्योतिष्टोम एवोपदेशात्प्रकृतौ शाद्विकृत्यादिति न्यायेन ज्योतिष्टोमप्रकरणानुप्रविष्टे ए.म॰
विशेषप्रतिनिषेधस्याप्रतीतत्वात् प्रवेशात्। कोपि तत्र क्रियास्तरणेन प्रकारेण एव प्रवर्ग्योपसत्संविधेर्निषेधस्य च पाठ्याश्र १४५

त एवोपसंहृतत्वशंकापि निरस्ता। तस्माज्ज्योतिष्टोमस्य सर्वप्रयोगेषु निषेधप्राप्तिरित्याशंक्य सिद्धान्तिनः। प्रथमशास्त्रस्य प्रव-
त्तप्रवृत्तिवाचित्वात्तद्योगे नैव पाठो मध्ये तन्मुख्यतत्त्वानुरोपेन च ज्योतिष्टोमयजेतशब्देन लक्षितो ऽचिरस्था दर्शादिप्रयोगवाचित्वं हि-
नीयन्तीयशब्दस्याहचर्येण प्रथमपञ्चशब्दस्य प्रयोगवाचित्वावगत्या तत्प्रथमप्रयोग एव प्रवर्ग्यनिषेध इति। एवं सि-
द्धे तस्याग्निष्टोमे प्रवृत्तौ क्रतौ निनैतरीयाः प्राग्नातथा तस्य कालगतिरिति शंकायामाह। द्वितीयादिप्रयोगेषु सामान्यशास्त्रेणै-
व प्रवर्ग्यप्राप्तेः प्रथमप्रयोगविषयमेवैतत्तन्न तथा वदस्य निरवकाशत्वान्निषेधस्य विकृतिप्रथमप्रयोगविषयत्वात्। अ-
स्यापि अग्निष्टोमसंस्थाविकृतिष्वतिदेशप्राप्तनिषेधबाधेन सावकाशत्वसंभवात्। अथ एतेनेति शास्त्रावगतप्रथमयज-
नस्य ज्योतिष्टोमादन्यत्रासंभवात्। अथोच्येताग्निष्टोमसंस्थप्रथमप्रयोगविषयत्वेन द्विविधत्वादनियत्र संस्थप्रथमप्रयोग-
विषयो निषेधोऽस्तु। अस्ति हि तस्यापि विधिः। तस्मात् प्रथमं यजमानो नोतिप्रत्रेणाप जेतेतीति चेन्न। न निषेधस्य प्रकृतिप्रथम-
प्रयोगद्वयविषयत्वे प्रतिविधेश्च प्रकृतिविकृत्याग्निष्टोमसाधारण्ये सति। विधिप्राबल्यसाम्यपत्तो न निषेधस्यैव संकोचात्मक-

भा॰ दी॰ १४६ वाबाधाश्रयत्वेतिनियामकाभावात्तस्याग्निष्टोम [illegible] प्रयोगेनप्रथ
मयत्नइतिनिषेधादग्निष्टोमेप्रवृत्ताज्ञोऽपिप्रतिप्रसवाद्धिफलः ऽतिरात्रेऽनुनिषेधप्रवृत्तेरग्निष्टोमत्वेनचप्रतिप्रसवाभावे
निस्यमकरणं। अथयत्रवृंजंतीत्यनारभ्योक्तेनप्रवार्यस्याग्निष्टोमेऽप्रवृत्ताकीतिविनियोगोस्तुतत्प्रचनानुयाजेष्विति
न्यायेनप्रथमयज्ञत्वर्ज्ञमितिपर्युदासादकरणमेवाग्निष्टोमप्रथमप्रयोगेपीतिचेन्नकोपिनक्लिशात्वाम्नातवचसापुर
स्तादुपसदामितिवच्चेसाचोक्तन्यायेनाग्निष्टोमसंस्थज्योतिष्टोमात्प्रप्रकृत्यर्थत्वसिद्धेरुक्ततात्। एतेनसामदश्यन्याय्येनाना
रभ्यवादोपसंहारार्थत्वमग्निष्टोमवाक्यस्यप्रत्युक्तं। नचपर्युदासोपिसंभवति। तस्याग्निष्टोमवाक्यशेषत्वस्यादनारभ्यवादशे
षोवा। नाद्यः पर्युदासस्याग्निष्टोमवाक्यशेषत्वेसत्यग्निष्टोमवाक्यस्यपर्युदस्तप्रतिप्रसवत्वस्याप्यसंभवेनोक्तरीत्योपसंहा
रेविनियोगार्थत्वस्याप्यसंभवेनचसामान्यप्रवृत्तानारभ्यवादानधिकार्यस्यानर्थकापत्तेः। सपर्युदासेतत्त्वभ्यस्यद्वितीयादि
प्रयोगेष्वप्यनुष्ठानस्यसपर्युदासेनतेष्वेवोपपत्तेः। नद्वितीयः। तदासर्वपर्युदासोनारभ्यवादस्यप्रकृतावेवोपदेशात्वेनस्थि राम॰ १४६

146

नस्यानित्यत्वे दर्शमासयोस्नायेनोपकारकपदार्थस्वभावेन प्राप्तस्य लोपः स्यात्। उपदेशत्वेनैवाग्निहोत्रमासाभिवात्रसाधारणस्य वा
न्तत्वे सति नाभिरात्रमात्रविषयस्य वा नत्वेन प्रवृत्तिमात्रविषयस्य गुणस्य प्रवृत्तौ वा द्विरूपत्वादिति न्यायेन कोऽपि न किंप्र
कारणपाठेन चाप्रवृत्तिनिविष्टस्य तत्र प्रथममयनेऽस्य कथंचिदपि नैव प्रयोजनसंभवे सत्युत्कर्षकल्पनायोगात्। एते
न निषेधविधयाप्यभिरात्रमात्रविषयत्वमस्य प्रस्तुक्तं। न द्वितीयः पूर्वोक्तन्यायेन प्रवृत्तिप्रविष्टस्य यस्य त्वं जतीयस्यातिरात्र
साधारणत्वेऽपि तदास्य घृदिसंख्याः समानविधानामवेद्युः। निरुक्तं तु नाशासमाख्याविधानत्वं न तृतीये। न तृतीयः अतिरात्रावान्तरप्रक
रणपाठाभावेऽतिरात्रमात्रविषयत्वस्याशक्यवचनत्वात्। न चतुर्थः तथासत्यनारभ्यवादपर्युदासस्याग्निहोम प्रथमप्रयो
गमात्रविषयत्वादग्निहोमेऽप्यरणाभीतिप्रवृत्तिप्रसक्तौ पितृमात्रविषयः स्यात्। तत्र यदि पर्युदासवशादग्निसमकरणमुच्यते तत्र
तिप्रसक्तौ वर्ज्यः स्यात्। प्रवृत्तिसत्त्वबलेन निरूपकारणो वा पर्युदासवैयर्थ्यमिति पुनरप्यान्तरोऽधेन विकल्पापत्तेः किं पर्युदासेन।
यथाहुः। यस्माद्विकल्पाद्विभ्यद्भिः पर्युदास आश्रितः। स तस्मिन्सत्यपाये न इति वंश्यावृत्त्यलसम्पः प्रतिषेध एवाश्रित इति

भा. हा. ।अतोऽग्निष्टोमप्रथमप्रयोगे निषेधे प्रतिप्रसवाभ्यां विकल्पेऽपि अतिरात्रे ।अग्निष्टोमसंस्थानिमित्तप्रतिप्रसवानतिदेशान्नित्यम
१४७ करणमिति । एवमग्निष्टोमप्रथमप्रयोगेऽवगतवैकल्पिककरणकामनुयोऽनूचानश्रोत्रियः स्यात्तस्य प्रह्वंसादिति वचना
दनूचानश्रोत्रियविषयमन्येषां नित्यमकरणमिति वा किंकारीयः पन्थाः । अत्रास्मायमसुधाकारः । नप्रथमयज्ञ इत्यस्य प्रति
147 षेधत्वेनानूपाजेषितिस्यायेन सामान्यत्वेन तत्स्याऽपि शास्त्रकविधेर्निषेधेन समवललात्प्रतिप्रसवं विनैवाग्निष्टोमे विक
ल्पासिद्धेः प्रतिप्रसवानर्थक्यमतिरात्रेऽपि प्रतिषेधमात्रमहिम्ना विकल्पप्रसक्तिश्च । अतः पर्युदास एवायमानाम्नायाद्वा
दशोषः । न च पर्युदासेन तेन ह्रीमादिप्रयोगगतकर्तव्यतामात्रप्राप्त्याऽग्निष्टोमवाक्यात्प्रथमप्रयोगे नित्यकर्तव्य
तापत्तिः । अन्यत्र पर्युदासस्याकर्तव्यतापादकत्वेऽपि प्रतिप्रसवानर्थक्यमयमेवेहैव पर्युदासस्याकर्तव्यतापादकत्वाश्र
यणात् ॥ अत एव पर्युदासेऽपि प्रतिषेधोक्तिर्वा किंकारीया सङ्गच्छते । अतोऽग्निष्टोमप्रथमप्रयोगे पर्युदासप्रतिप्रसवसा रा. म.
मर्थ्याद्विकल्पः सोऽप्यनूचानश्रोत्रियविषयः अन्येषां तत्र सर्वेषामतिरात्रसंस्थप्रथमप्रयोगे च नित्यमकरणमित्याहान् १४७

त्रुपर्युदासस्य प्रतिषेधवदकर्तव्यतो तात्पर्यत्वे कथं तेनातिरात्रेपि विकल्पपरिहारः। प्रतिप्रसवस्यातिदेशोपि तेनाक
र्त्तव्यतायां गृहीततात्पर्यकस्य पर्युदासस्यानावसिके कषाशाद्गोचरन्यायेन विहतो विपरीततात्पर्यकत्वात्संभवा
दिति चेन्नाहं तत्किंनालोचितो न्यायस्तु धात्रंथः। नञश्च द्व्यास्य कर्तव्यतोक्तौ तात्पर्याभावेपि नञश्च द्व्यसामर्थ्यादकर्तव्यत्व
प्रतीतेः प्रतिषेधोक्तिर्भव्यकारारम्भिरात्रेतातिरा। अकर्तव्यतायास्तात्पर्याविषयत्वे कथं तत्प्रतीतिः पर्युदासादिति चेन्न।
इत्यश्वाभिधानीमादत्त इति शास्त्राद्दर्भाभिधान्यां मंत्रनिवृत्तिप्रतीतिवदिति ब्रूमः। प्रापकशास्त्रप्रतिबंधसंकोचकत्वावि
शेषस्यत्वेपि तात्पर्याविषयीभूतनिवृत्तिप्रतीतेः शास्त्रफलत्वस्योभयत्र साम्यात्। न च शास्त्रे तादर्थ्यं तात्पर्यपोऽभेदाद्दत
त्वस्य कथं तदर्थत्वापरपर्यायं तत्फलत्वमपीति शंक्यं। न्यायसुधाकृता क्रियायां तात्पर्यस्य तादर्थ्यातिरेकात्। कथम
न्यथा नत्ति भाषिकरणे हि तात्पर्याख्यवृत्तेः शाब्दत्वनियामकत्ववद्‌तातेनैवार्थिकमंत्रनिवृत्त्यर्थत्वं प्रशनादानमं
त्रविवेकः प्रीक्रीयेत। ननु पर्युदासांतेपि स्वार्थादकर्तव्यत्वप्रतीतिः संभवत्येवेपेनोऽ ननुयाजेषु येयजामहः कर्तव्य

इत्युक्ते भवत्यर्थादीदृशी बुद्धिः अनुपाजेषु न येयजमहः कर्तव्य इति। अतो कर्तव्यतायां तात्पर्याभावे कथं पर्यु-
दासात एवैतल्लक्षणायोगिन्यायपदस्य धात्वर्थः संगच्छत इति चेत् न शास्त्रान्तरसंकोचार्थं पर्युदासान्तरं कर्तव्यतापत्ती-
ति शानुषंगिकी उक्तत पर्युदासे तु फलमिति वैलक्षण्योपपत्तेः। न च शास्त्रशास्त्रस्यापार्थिका निषेधशीतीति विकल्प-
मापादयति गर्दभाभिधानस्यामंत्रविकल्पापत्तेः। अत उपचारेण साक्षात्प्रतिषेधत्वेनावगृह्यमाणां पर्युदासमाश्रित्यैव सं-
भवति सिद्धान्त इति न्यायसुधाकृतः स्यादिशायन्तथा।। मिश्रास्तु प्रतिषेधादिकल्पप्रसक्तिमनुपपन्नमेव प्रतिषेधप्रतिषेधस्वा-
भ्यां विकल्पस्यापि नूतनं वाक्यार्थीहृताद्वा वाक्यान्तरविषयो नूतनस्यानिष्टं कल्पनमन्येषामकरणमिति स्माहुः। कथमे-
तदुपपद्यत इति चेत्। श्रूयते यथाह्यादशाहांगत्वेनावगतायाः एकादशिन्या अंगत्वेन प्रायणीयोदयनीययोरेकादशि-
नानालम्भे प्राप्ते निवारके न प्रायणीयोदयनीये देशाः एव विधीयते। अत एव विवक्षितसत्वाहिःस्य पशूनामुभयत्र विभज्यैका- ए॰म॰
दशिनानामनुष्ठानमिति स्मकृत्दशमे। तथा न प्रथमयज्ञे पशूनां दीक्षा न ननु भावे नाव ज्योतिष्टोमांगत्वेन प्राप्तस्य प्रवर्ग्य १४८

स्यप्रथमप्रयोगो देशत्वेन विधीयते। यत्र तु नञभावे विधेयतया प्राप्तौ यत्नेन तस्यैव नञा निषेध्यत्वमुचितमिति पूर्वोक्तन्याये-
न देशनिषेध एवायं ननु प्रवर्ग्यनिषेधः। तथा च शास्त्रप्राप्तस्य निषेधाभावान्न विकल्पप्रसक्तिः। अमुनैवाशयेनाह भवदे-
वः प्रथमप्रथमैकप्रयोगविषयः प्रतिषेधस्तदानन्तसामान्यविधिबाधेनैव निषेधाव्यवच्छिन्नविषय एव विकल्पः प्रथ-
मप्रयोगे। ननु द्वितीयादावनुष्ठानमिति निषेधप्रतिप्रसवाभ्यां तुल्यविकल्पप्रसक्तिर्वाच्या। अनूयाजवाक्योप्रसंहृता-
ष्टोमवाक्यस्य त्वनूयाजसामान्यविशेषनिष्ठत्वात्तेन संकोचनमिताः विकल्पप्रसक्तिः। सामान्यनिषेधोऽनूयाजविषयत्वेनाव-
तिष्ठत इति विकल्पस्यानूयाजविषयत्वोक्तिर्निष्कारणा यानुमञ्जाव्याख्येयेति मिश्रानुसारिणां पन्थाः। सर्वे प्येते पन्थानः
शिष्टानां संरक्षणाय प्रवृत्ताः। ननु बुद्धिमतां स्वीकर्तुमुचिताः। तथा हि सिद्धे विनिषेधो विकल्पापादकत्वेन नानूयाजेष्विस्तादोपे-
न स्वीक्रीयते ते ऽग्निष्टोमे प्रवृत्ताकौल्यस्य विकल्पापादकं प्रतिप्रसवत्वं किमिति साधीयः। तत्र कस्माच्चर्यं तत्र हि किं मे न करोतीति
चेत्। अनूयाजवाक्यादनूयाजकर्तृकत्वेन शास्त्रप्रवर्ग्यस्याग्निष्टोमनिमित्तत्वं बोध्यते। अनूयाजवाक्यं तु पयस्याहृजं तीति

मा.दा. १५९
149

सामान्यविधेर्न्न प्रथमयज्ञः स्यदनेन द्वितीयादिप्रयोगविषयतां नीतस्यानूचानविषयताज्ञापकं भवतु सर्वशास्त्राणां
पररूपतानाञ्चोचनेनोत्पत्तिशास्त्रालोचनयैव प्रवृत्तेरोचित्यात्। अग्निष्टोमवाक्ये च निमित्तसंबंधप्रतिप्रसवाभावापेक्षया
निमित्तसंबंधमात्रबोधने लाघवात्। अनूचानवाक्यादनूचानकर्तृकक्रतौ ऋत्विक्संबंधापायः प्रवर्ग्यनिवृत्तेरनूचानक
र्तृकनिमित्तः द्वितीयप्रयोगेऽपि प्राप्तत्वेन लाघवाच्च अग्निकार्य्याध्यावर्तनस्वभावनिमित्तसमर्पणात्सर्वशाखाधिकारिप्रा
प्तिमपेक्ष्य प्रवृत्तेरोचित्यात्। एतेन यत्केश्चिन्निषेधस्याविकल्पप्रसंजकत्वं स्वीकृत्यास्त्विष्टानसंरक्षणायोक्तं। अग्निष्टोमे प्रवृ
ज्जीति वचनं प्रथमप्रयोगे वैकल्पिकत्वेनावगतस्य प्रवर्ग्यस्यातिरात्रप्रथमप्रयोगासदिसंख्यार्थो द्वितीयादिप्रयो
गेऽसंतानाप्तस्य निवृत्तिप्राप्त्यर्थं तस्मात् निवृत्तिके प्रथमप्रयोगे निवृत्तिनियमने नियमविधिप्रसक्त्या लाघवात्। सामान्यप्रवृत्तस्यापि
विधेर्हैरण्यगर्भमंत्रविधिगोचरत्वादाशमिकत्यायेन लाघववशेन विशेषविषयत्वसंभवात्। न चेयं परिसंख्या त्रिदोषाश्र
नामंत्रविधिनालैंगिकरूपातिकल्पनायाः एवानेनापि विधिनाऽतिरात्रप्रथमप्रयोगेऽपत्रवृजनीतस्यातिदेशाकल्पना राम. १५९

प्रतिबंधादितिनन्विदं तत्तु क्रंरीत्या द्वितीयादिप्रयोगे लाघवस्यामान्यात्वात्। न होतारं वृणीत इति वृत्सर्युद्दासेन शाकप्रपरि
हारस्य विकल्पस्याविनाकारणाम प्रथमप्रयोगा ज्ञासर्वप्रयोगस्य र्वपदार्थसाधारणातिदेशस्य प्रथमप्रयोगगत
प्रवर्ग्यमात्रबाधकशास्त्रेणाप्रतिबंधायोगाच्च। संकोचेनाप्यशास्त्रबाधव्यवहारे विशेषशास्त्रादिना सामान्यशास्त्रबा
धस्याप्यशास्त्रबाधत्वापत्तेः। अतः पूर्वोक्तन्यायद्वैविध्येन पर्युदासं निषेधयात्वीकृत्य प्रथमप्रयोगमात्रे नित्यं प्रवर्ग्या
करणमेवोचितं स्वीकर्तुं द्वितीयादिप्रयोगेऽग्निष्टोमसंस्थेऽनूचानस्य चित्यं करणं अनूचानस्य नत्रेतरसंस्थाद्विती
यादिप्रयोगे च सर्वेषां नित्यमकरणमिति व्यवस्था स्वीकार्येति चेन्न द्वितीयादिप्रयोगे विकल्पप्राप्त्यभावेनैच्छिकविक
ल्पयाचिनः काममित्यस्यानुवादत्वासंभवात्। दृश्यते हि काममं यस्मै कामयेतां तस्मै दद्यातामित्यापस्तंबवादिनां व्या
चक्षाणानां धूर्तस्वामिप्रभृतीनां काममित्यस्य वचनबलादेव विकल्पो हि। न चानूचानवाक्ये विकल्पो विधीयत इति युक्तं। प्राप्त
प्रवर्ग्येऽनूचानसंबंधस्य विकल्पस्य च विधाने वाक्यभेदात्। न चानूचानकर्तृकप्रवर्ग्यानुवादेनं हविकल्पो विधीयता

भा॰द्य॰
१५०
150

मिति शंक्यं। विधिशेषानुवादे वाक्यभेदात्। अत एवाग्निष्टोमवाक्ये [illegible] यद्यप्यनूचानवाक्येन प्रवर्त्तते तथाप्यनू
चानवाक्ये विकल्पानुवादनिर्वाहाय न प्रथमयज्ञ इत्यस्य विकल्पापादकमेव प्रतिषेधत्वं स्वीकृत्य नन्वित्सि‍द्धं वैकल्पिक
करणानुवादेनानूचाना संबंधविधिपरमनूचानवाक्यं स्वीकार्यं प्रथमप्रयोगेनूचानकर्तृकं वैकल्पिकं करणं
शक्यानुपपत्तितंतस्याग्निष्टोमनिमित्तत्वमग्निष्टोमवाक्येन बोध्यत इति यथावार्त्तिकं सिद्धांत्यभिमतानुष्ठानसिद्धिः।
अग्निष्टोमं प्रथमं प्रयोगे नूचानस्य वैकल्पिकं करणं तत्रान्येषां मते एत्र प्रथमप्रयोगे सर्वेषां नित्यमकरणमिति। या
नुवार्त्तिके नूचानवाक्योदाहरणानन्तरमपि अग्निष्टोमवाक्यस्य विकल्पकादित्वप्रतिपत्तव्योक्तिः सा पूर्वाभ्युपगतयो
न्त्यपो वाक्योपलक्षणत्वेनेति बोध्यं। एतेन स्त्रीकरोपन्यस्त पर्युदासाश्रिणकरणाय न प्रथमयज्ञ इति निषेधस्यैव नैमित्तिकनि
षेधत्वेन विकल्पानापादकलोक्तिर्नयविवेकस्थानिरस्ता। उक्तरीत्या विकल्पापादकनिषेधस्यैव शास्त्रानुमतत्वादित्यनव
द्यं। अत श्चेतिचेति चोद्यशाशस्तं शास्त्रानामित्यनंतरोक्तेयोऽश्मशा शस्त्रस्य जन्मनः चसंग्रहाय स्वर्गादिकर्मकभावना

राम॰
१५०

समभिव्याहारलभ्यस्य यागादिगतस्य स्वर्गादीष्टसाधनत्वस्य घटादिवल्लौकिकागम्यस्य चापार्यत्वस्यान्यलभ्यत्वान्न विध्यर्थत्व

पु [illegible] चितं। उचितं तु प्रवर्तनाया आज्ञादेः पूर्वोक्तनयात्रे साधयेनाह। स एवेति हविनमपि दोषान्तराभिधानायानुवदति यत्त्वि

ति। न्यायस्तु धात्वन्तं प्रपञ्चयितुं स्मारयति। स चेति। यद्धर्मावच्छिन्ने यत्स्वरूपावच्छिन्नशक्तिग्रहो जानन्तद्धर्मप्रकारकबोधेनेनशब्द

न जनिते सति तद्धर्माश्रयप्रसिद्ध्याकीनां विशेष्यत्वानुपपत्तेः स तस्याप्रसिद्ध्यक्तिमास्ति येन बाधः पर्यवसन्नीत्सपूर्वोक्तमिक

कार्यविध्यर्थवादिमते लोके च प्रसिद्धन्यायं प्रेरणाविध्यर्थमते योजयति। तथा चीसारीनां तन्नेव वार्त्तिकं योजयति अथ

मेव चेति। मिश्रमतमाह। अन्ये त्विति। तस्यापीत्यनेनतं (स्या तस्येति शेषः। यत्तु प्रेरणावादिमिरुच्यते ज्ञातेष्टसाधनत्वेपि न प्र

वर्तन्ते प्रेरणाज्ञानाच्च प्रवर्तन्त इति तद्दूषयति स्वमविशं भवती साधयेनाह। अन्ये ति आवश्यकत्वादिति। ज्ञातायाः समिहितसा

धनतायाः प्रवर्तनात्वरूपेण पूर्वस्य स्वीकार्यत्वादिति। न्यायमेयं विशेषरूपेण प्रेपस्य त्वमतेप्यपरिहार्यत्वात्। एवं चेति

ननु प्रतिकूलमेतत्। अयं मा प्रवर्त्तयतीति प्रत्ययाः प्रतीतेः प्रसादेन प्रवर्तनाया वाच्यत्वासिद्धेः तथा च यथा लोके प्रवर्त्तनायाः पु

भाट्टा॰ १५१ १६१

निष्ठत्वसिद्धिस्तथा तथैव वेदे न स्यात्। शब्दनिष्ठत्वसिद्धेरिति चेन्न लोके प्रवर्तनायाः शब्दनिष्ठत्वाभावेपि एतच्छब्दो मां प्रव
र्तयतीतिवत् वेदेपि शब्दनिष्ठत्वमंतरेणा तथाप्रतीत्युपपत्तेः। वैदिकलिङ्गाधिगतत्वविशिष्टस्यैव यागादेः स्वर्गादिष्टसाधन
ताश्रयत्वेन लिङ्गव्यापाराश्रयकोटिनिक्षेपणतयाप्युपपत्तेश्चानन्वेवमपि यागो मां प्रवर्तयतीति व्यवहारः स्वर्गादिष्टसाधनता
रूपप्रवर्तनायाया वा स्थितत्वादिसाशंक्याह किंचेति। वऽमिति नैमित्तिके दृष्टानिमित्तानुसरणां कार्यं न तु निमित्तमस्तीति नै
मित्तिकापादकनिमित्ताभावादपि न उपपत्तेरिति विषयाः इष्टिपातित्वस्मिन्प्रवर्तयतीतिवदिष्टसाधनत्वेनावगतो यागः
स्वज्ञप्तिस्तु रूपप्रवर्तयतीति संभवस्येव व्यवहार इति चेत्संभवत्सर्व इहाकदेशो वाभ्युपगमो नैकदेशो वाभ्युपगमात्प्रकृते शब्दाशयः
।नन्वर्थप्रतीत्युद्देश्यो लिंगादिगतो योऽभिधाव्यापारोऽसावपि समिहितसाधनत्ववद्वाच्यक एव कथमस्यैव प्रवर्तनात्वेन लि
ङ्गवाच्यत्वं न स्वीक्रियते एवं चाभिधाभावनामाऽस्त्विति वार्तिकमते क्रमेणैतदुक्तं भवेत् अभिधाशब्दस्य प्रवृत्तिहेत्वर्थत्वाभिकरणात्। राम॰
कोसौ व्यापार इति चेत् शक्तिरिति केचित्। परे त्वाहुः। योयमागंतुकं धर्मं प्राप्य कार्यापर्यायो भवति स तद्व्यापारः। तेन शब्दो १५१

र्थप्रतीत्यैपर्याप्तः। अतो ज्ञानमेव व्यापारः। न च ज्ञाने कर्मीभूते शब्दज्ञानात्मिकायामभिधायां कथं कर्तृत्वेन करणत्वेन
वा व्यवहार इति शंक्यं। एकस्या अपि क्रियायास्तत्तत्फलावच्छेदकत्वेन तत्तद्धात्वभिधेयत्वायाः कर्तृकर्मादिवैचित्र्यस्येव कर्मापि सं
भवात्। दृश्यते ह्युपगमनादिक्रियायां कर्मणोऽपि परशोर्द्वैधीभावाख्यफलावच्छेदकत्वे छिनत्त्यभिधेयतायां तस्यां करणत्वं स्वा
तंत्र्यविवक्षया कर्तृत्वं च। तथैकस्यामपि ज्ञानक्रियायां शब्दप्रकाशार्थप्रवृत्तीनां कर्मत्वाच्छब्दस्यैवाकर्मत्वकर्तृत्वकरणत्वा
नि च नानुपपन्नानीति। अतः कथं सामिहितसाधनत्वस्यैव प्रवर्तनात्वेन लिङभिधेयत्वमिति शंकां निराकर्तुं सादानत्वस्यैवेति
मिं न क्रम एवकारः। स्वेतस्य ज्ञानान्तरस्यादि शब्दस्तु वा शब्दार्थविशिष्टभावनाप्रतिपादनमेव शब्दव्यापारः प्रवर्तनात्वेन लिङ्वाच्यः
। उक्तो ह्ययमपि पक्षः षष्ठाध्याये शास्त्रदीपिकायां मिश्रैः। यद्विज्ञातं सम्यक्प्रवृत्तिहेतुत्वेन कृत्संज्ञस्यैव प्रवर्तनात्वेन रूपेण विधिज्ञाप्य
त्वकल्पनमुचितं। अन्यथेच्छायाः साक्षात्प्रवृत्तिहेतुत्वेन कृतायास्तत्त्वेन तदभिधेयत्वस्य दुर्निवारत्वात्। तत्र प्रेरणा स्वत एवाकृ
ष्टा शक्तिरूपाभिधा तु स्वतः सिद्धा विप्रवृत्तितेन सिद्धा शब्दज्ञानात्मिकाभिधा विशिष्टभावनाभिधानं वा प्रवृत्तिहेतुत्वेनासिद्ध

भा॰ट्टी॰
१५२

152

मपि न ज्ञातं सत्तत्सत्तथा क्रत्वंतत्विष्टहेतुत्वं ज्ञातं सत्प्रवृत्तिहेतुत्वे साशयः। नत्र यजेतेत्यादिरूपानुपूर्वीज्ञानात्सती प्रवृत्तिहेतुत्वे
नक्रमाकथंस्त्वगतासेवनत्वेन नवा अनन्याहान्येति। एवं निष्टप्रवर्त्तमानाभिधानेयानुपपत्तिस्तु कूल्पत्वादिरर्थः। न कलंजं
भक्षयेदित्यादौ त्वाकरे विध्यर्थानुवादेन नञ् प्रतिषेधनीतिवचनव्यक्तिर्दर्शिता सा च प्रेरणाभिधाभावानाप्रतिपादनानुपूर्व्याः
णामन्यतरस्य च निष्टस्य लिङ्प्रवर्त्तनात्वेनाभिधानेनोपपद्यते। न हि भक्षयेदिति मलयगजगुरुकप्रकाणामन्यतरदपि
प्रवर्त्तनारूपमनुवदितुं योग्यं भ्रांसापि प्रामाण्याभावात् न हि निषेधांतगतः प्रत्ययः प्रवर्त्तक इति कस्यचिद्भ्रमसंभवः। क्लेशेन तु
तद्रूपोपपादनमनुत्रीयेनाथयोत्रीतं पुरस्तात्। काजेतु भक्षणागतेष्टसाधनतायाश्च निष्टानुबंधित्वेनागृहीतायाः प्रवर्त्तनात्वभ्र
मेपत्तिलिङ्गतद्रूपनिषेधोऽलंकषेन वोध्यितुं पदंनभोजनाहाविवक्कलंजभक्षणेपीष्टहेतुत्वं प्रवर्त्तकत्वेन ज्ञातं तत्तथा कलं
जभक्षणाप्राक्केष्टत्वानिष्टानुबंधित्वादिति। न चेयमनिष्टानुबंधीष्टसाधनत्वस्य प्रवर्त्तकत्वायजेतेत्यादिलिङभिधानाप रा॰म॰
त्तेः। पदार्थभूतेष्टसाधनतागतस्य प्रवर्त्तनात्वान्यधर्मस्य लिङ्प्रतीत्यसंभवेन वाच्यत्वस्य दुर्निरूपत्वात्। प्रवर्त्तनात्वस्यामर्थ्य १५२

लभ्यत्वेनान्यलभ्यत्वाच्च । इष्टहेतुतायास्तत्त्वेनैव लिङ्गार्थत्वे परमतेष्टोद्देश्यता न च हि प्रवर्त्तनात्वहेतुः स चानिष्टा-
ननुबंधित्वविशिष्टायामेव तस्यां विधने । अनिष्टाननुबंधीष्टहेतुत्वनिर्णयेनैव हि प्रवर्त्तमाना दृश्यंते प्रेक्षावंतः । विशि-
ष्टाया एव वाच्यत्वे निषेध्यत्वोपपत्तेश्च । अन्यथाऽनिष्टाननुबंधितायाः अशब्दार्थत्वे तन्निरूपे इष्टहेतुतायाश्च प्रत्यक्षसिद्ध-
त्वेन निषेध्यत्वासंभवात् । अतो यागगते इष्टहेतुताया एव प्रवर्त्तनात्वेनैव विध्यर्थत्वमित्याशयः । ननु यागगतकृत्यर्हत्व-
मेव भवतु तदर्थः । शक्यते हि न प्रेक्षावत्प्रवृत्तिहेतुत्वेन निरूपयितुं । इष्टहेतुतानिष्टाननुबंधित्वाभ्यां कृत्यर्हत्वमेव हि निर्णी-
य प्रवर्त्तंते प्रेक्षावंतः । संभवति च कृत्यर्हत्वमनूद्य निषेधः । न तु इष्टहेतुत्वस्यानिष्टहेतुत्वस्य वा प्रतिपत्तिश्च । यथा पुत्रकाम्यः
सोऽयं न कुर्वीतेत्यादौ कर्त्तव्यतावचनो भावनायां पुरुषे प्रवर्त्तयतीत्यादिराकरग्रंथश्चैवमनुसृतो भवतीत्याशंक्य । निराक-
रोति हेत्वंतरसमुच्चयाभिधायी च । इदं तत्र कृत्यर्हमतः कुर्यात् । यद्यपि नैतत्कृत्यर्हं तथापि कुर्वीतेत्यादिप्रयोगोपपत्तेरिति । न त्वे-
वं प्रयोगो भवति तत्र कृत्यर्हमतः कृत्यर्हमिति । न वा नैतत्कृत्यर्हमतः कृत्यर्हमिति । संभवति तु सर्वोऽपीदृशः प्रयोगः प्रवर्त्तना

भा.द्व.
१५३
153

त्वेनेष्टहेतुतायां लिङ्गाद्यर्थत्वं इत्याशयः। ननु प्रवर्त्तनायामध्ययनविधिप्रेरिता लिङादयः प्रवर्त्तकतां प्रतिपद्यन्ते तेषां प्र-
वर्त्तकत्वमहिम्ना च कर्मण इष्टहेतुतासिद्धिरित्याकररीतिः न च लिङादिव्यापारस्य प्रवर्त्तनात्वे प्रवर्त्तनायां लिङादयः
प्रेरयितुं शक्ताः। व्यापारे सर्वेषामपि प्रयुक्तत्वात् इति न्यायात्। अतस्तेषां प्रवर्त्तकत्वासिद्धौ कर्मण इष्टहेतुत्वमपि न सिध्येदि-
त्याशङ्क्याह। न चेति। यथा व्यापारेऽपि गोदोहनपंचमवर्षादौ पुंव्यापारभूतप्रणयनोपनयनादिव्यापाराविष्टः पुरुषः प्रव-
र्त्तते न तथाऽव्यापारभूतायामपीष्टहेतुतात्मकप्रवर्त्तनायामभिधानात्मकशब्दव्यापाराविशिष्टायां स्वभावस्येव शब्दस्य
प्रवर्त्तकत्वस्य व्याहतेः। न च यागभावनायाः पुंनिष्ठव्यापारत्ववत् प्रेरणात्मभावनायामपि शब्दनिष्ठव्यापारत्वमस्तीति येनात्र नापेक्ष-
णया शब्दप्रवृत्तिविषयं भावं वाञ्छेत। अतः प्रेरणामन्तेपीत्यमेव समाधेयमित्याशयेन मन्तेपीत्यपि प्रयोगः। प्रवर्त्तक-
त्वमपेक्ष्य कर्मण इष्टहेतुत्वमात्रसिद्धौ विधिवाक्यानुशक्या न ते न तत्र कां रागतेरेणा विसाधयितुमित्याशयेनाह। विध्यभिहि- राम—
तस्येति। न न्विष्टहेतुतायाः प्रवर्त्तनात्वे लिङर्थत्वे कथमिष्टहेतुता लिङर्थ्यवादेऽपि प्रसङ्ग्यन्त दोषानापत्तेः। कथं वा प्रा १५३

ष्टानिष्टोपायाः शाब्दभावनात्वव्यपदेशः। स्वाभिधा भावनामाहुरिति वार्त्तिकस्य गतिरिति शंकाः क्रमेण निरस्यति। न चेत्या
दिना। नन्वेवमपि नैष प्रयोगस्तत्वोपपद्यते। यद्यपि जवैतन्नेष्टसाधनं तथापि तत्कृतिस्वरूपतो निषिद्धस्वरूपान्तरेणापि
प्रतिपादनासंभवात्। न हि घटो नास्तीत्यप्रमितप्रतिषेधस्य घटस्याद्यप्रमत्तीति द्व्यलाकारेण सत्वप्रमासंभवतीति चेन्न।
नापह्नवगतेष्टविशेषसाधनत्वप्रतिषेधेपि इष्टान्तरसाधनत्वस्य प्रवर्तनात्वेन प्रतिपादनसंभवात्। यद्यपि तवनेष्टसाध
नं तथापीष्टसाधनमिति प्रयोगस्य सर्वथाप्युपहसनीयत्वात्। उक्तेर्थे मंडनसंमतिमाह। यथेति। अभावादिसनन्तरं प्रवृत्त
स्यार्थभावस्य वनायामभेदान्वयापत्तेः करणत्वाद्यन्वयानापत्तेश्चेति शेषः। अतो यागत्वेन प्रवृत्तस्यार्थस्याविभावनात्वेन प्रत्य
पार्थत्वे किं बाधकमिति शंकानिरासः। न्यायसुधाकृन्मतमाह। अत्रेति। प्रयत्नो भावनेत्येव प्रकृत्ये प्रकृतोदाहरणोपलक्ष
मान्यानिष्टतया भावनात्वमुपपादयितुं स्वर्गजनितत्वमुक्त्वा यागस्य भावनायां कर्मत्वकरणत्वे उपपादयितुं यागावि
षयत्वमुक्तं। विषयत्वप्रतीतेश्च यथा कर्मत्वकरणत्वपर्यवसानं तथोक्तमधस्तात्। मूल इतिपदत्वविशिष्टपरामर्शः। यत्न

त्वविशिष्ट एवात्मोक्तवाच्यो यत्नत्वमेव तस्य शक्ततावच्छेदकं न व्यापारत्वं जातित्वेन यत्नत्वस्यैव लघुभूतत्वादिति सूच
नार्थ एवकारः। पाकयत्नवान्देवेति संशयनिवृत्तिस्तावत्पचतीतिश्रवणाज्जायते। न च पाकयत्नविशेषं विना संभव
तीत्यात्मोक्तेन यत्नविशेषस्यावश्यं वाच्यत्वात्पचति पाकयत्नवानिति विवरणदर्शनाच्चेति हेत्वंतरसमुच्चयार्थश्चः।
न च यत्नं विना भूतपाकेन यत्नानुमानात्तद्विशेषोपपत्तिरिति वाच्यं। चैत्रः पचतीत्यादाववश्यं यत्नस्य लडर्थवर्त्तमा
नत्वाद्यन्वयित्वेन चैत्रादिवृत्तित्वेन च प्रतीत्यभावापत्तेः। जानातीत्यादौ हि वर्त्तमानत्वाद्यन्वयो धात्वर्थे दृष्टः। पचतीत्यादौ वा
ख्यातार्थव्यापारे न त्वनुमेये पर्थे क्वचिदपि सोनुभूतः। न च चैत्रवृत्तित्ववर्त्तमानत्वाभ्यां विशेषितेन पाकानुकूलव्यापारेणैव
तदुभयविशेषितं तदनुकूलयत्नानुमानमिति वाच्यं। तद्वृत्तिवर्त्तमानतादृशव्यापारस्यान्यवृत्तित्वे वृत्तीतयत्नादप्रसिज
न्यसंभवेन हेतोर्व्यभिचारात्। न चैतादृशस्थले लक्षणया प्रयत्नस्य शाब्दत्वं वरा हि तमो रथो गच्छतीत्यादौ व्यापारे लक्षणा
भ्युपगता। प्रथमतः स्वीकार्यशक्ततावच्छेदक एव लाघवस्यानुसरणीयत्वात्। पश्चात्स्वीकार्यलक्षणतावच्छेदके गौरवस्य

फलमुखत्वेनादोषत्वात्। जायमानत्वादिति सिद्धवन्निर्देशेनादृष्टप्रतीतिजन्मनश्चाकरणसिद्धतां दर्शयति। उक्तं त्वयास्माभिरर्थ
प्रदर्शनावसरे भावार्थाधिकरणे भाष्यकृता तथा यत्नेनैव किंचिद्भवतीति। गुणकर्माधिकरणेऽपि। अनुरूप्यादिति शब्दस्येत
त्सामर्थ्यपद्धोमविधिषु प्रयत्नमाहेति। यद्वानादृष्टनिर्देशेन यजेनेत्यत्र तत्साध्यत्वस्य रक्षीकार्यतां दर्शयति। चेतनव्याप
रभूतयत्नाभिधाने हि विधेश्चेतनप्रवर्तकत्वविनियमः संगच्छते कथमन्यथा काष्ठादिप्रवर्तकत्वाभावः। यथा कुर्यादिपदबुधा
वृत्तः चेतनप्रेरकत्वं हि विधेस्तद्विषयत्वात्। का बाधा अन्यथा कस्मान्न प्रेरयति वायुवत्। विध्यर्थज्ञानतोऽप्रेर्यं चेत्काष्ठादि
नतः कथासौ धन्वनानिपातादेः प्रेर्यस्याधिकारिता। विधिस्त्वा प्रेरयस्यत्र तत्प्रेर्यतापत्तेः कथं। विदुद्भिर्लापनाद्देवप्रेर्यत्वेऽन्यो
न्यसंश्रयमिति। करोतिपर्यायत्वेनापि यत्नवाचित्वमाख्यातेऽस्तु इति तु करोतेर्यत्नवाचितां साधयति। यश्चेति। करोतेर्यत्न
वाचित्वे हेत्वन्तरं समुच्चयार्थश्चः। व्यापारसाध्यत्वावगमे तुल्येऽपि हि प्रयत्नसाध्यतासाध्यत्वप्रतीतेरेवौदनयोः कृताकृत
व्यपदेशावस्थादृश्यते दृश्यते च सर्वकारकाणां व्यापारात्मयत्ने तुल्येऽपि यत्नाश्रय एव कर्तृव्यवहारः। संभवति चैतदुभ

भा.द्वा.
१५५
155

यमपि यत्नस्य कर्तोस्त्वर्थत्वेऽप्य विषयार्थधात्वर्थतरकर्मनिष्ठाया विषयार्थत्वात्। ओदनस्याप्युद्देश्यतया तद्विषयत्वात्। अत्र वि
षयार्थधातूनां तच्चाश्रयार्थत्वादाश्रयत्वस्य च सर्वकारकेषु समत्वादित्याशयः। उक्तं च न्यायाचार्यैः। कृताकृतविभागेन
कर्तृरूपव्यवस्थया। यत्न एव कृतिः पूर्वापरस्मिन्स्तेव भावेनेति। विधेरन्यत्वोपपादनस्य करोतिसामानाधिकरण्येन यत्न
वाचितां दर्शयितुमाह पचतीति। रथो गच्छतीत्याद्यनुरोधेन गम्युत्तराख्यातस्यापि न व्यापारवाचित्वमुचितमित्याशयेनाह ग
च्छतीति। वोढ्रेत्यपि न्यायसुधाकृता पक्षान्तरमप्युक्तं स्त्रीत्वाभावे विस्वद्धदोदाहरणाद्विपत्सयोपयथा। प्रयुज्यते तथास्मात्तंय
त्वाभावेऽप्यचेतने। धातोरनन्वयहार्थवाच्यान्तरंधियेषवेति। तथाप्याख्यातत्वाशस्याप्यर्थवत्वसंभवेनानर्थक्यमुचितमित्याशये
नेत्थमेवोक्तं। औपचारिकत्वमिति। आश्रयत्वलक्षणोऽसावप्ययः। मिश्रमतमाह। अन्ये त्विति। तत्र व्यापारमात्रस्याख्यातवाच्यतां
वक्तुं प्राभाकरमीमांसकानामाख्यातजन्यप्रतीतिविषयनिरूपणपरं वचः॥ प्रा०उक्तं तत्र सर्वव्यापारसाधारणं दर्शयति भ
वितुरिति। घटइति व्यापारत्वविशिष्टपरामर्शः। व्यापारत्वमेवघटकानावच्छेदकं यत्न त्वं व्यापारत्वस्याखण्डोपाधित्वेन जाति

राम.
१५५

तुल्यत्वात्। न च तत्सखंडोपाधित्वे मानाभावः। श्रुत एव मधुररसः स्वाश्रये जलाभिलाषगोचरज्ञानयतीति व्यवहारानुरो
धेन तत्समवायतज्ज्ञानादेश्च स्वरूपवत्त्वव्यापारत्वस्य तज्जन्यत्वाघात्मत्वासंभवेनाखंडोपाधेरेवोचितसायातत्वादिति सूचना
र्थ एवकारः। अस्तु वा गुर्वेव व्यापारत्वं तथापि तदेवावच्छेदकं पचतीत्यस्मात्साकयत्नस्यैव हि पततिफलं वृक्षादित्यादौ गुरुत्व
स्य स्रवति जलं गिरेरित्यादौ द्रवत्वस्य व्रजति शरो दूरमित्यादौ वेगस्य कंपते पत्राणि तरोरित्यादौ वायुसंयोगस्यापि संग्राह्य
त्वेहत्या निश्चयोऽभ्युपेयः। अस्ति च गुरुत्वादौ वर्तमानताद्यन्वयस्य फलवृत्तित्वादेश्चवस्ययोगतो नानुमानिकत्वेनापि तद
न्यथासिद्धिः। भवंति च यत्नत्ववद्गुरुत्वत्वादीनि जातय इति कथं गुरुत्वत्वादीनि विहाय यत्नत्वमेव शक्यतावच्छेदकत्वेन शक्य
मवधारयितुं। भवतु सर्वेषामपि शक्यतावच्छेदकानि व्यापारत्वमेतु न तथात्वसिद्धिरिति चेन्न। परस्परानपेक्षानेकशक्यता
वच्छेदकाभ्युपगमेनानेकवाच्यवाचकभावाभ्युपगममपेक्ष्य गुरुभूतैकशक्यतावच्छेदकाभ्युपगमेनैकस्यैव वाच्यवाचकभाव
स्य स्वीकर्तुमुचितत्वात्। अनेकपदार्थघटितोपाध्यात्मनो हि व्यापारत्वस्यावच्छेदकत्वे तदाश्रययत्नमनेकेषां कल्प्यमिति मोर

भा॰ द्वा॰ १५६ 156

वेवांशं आश्रयांशावच्छेदकत्वं तु सर्वेषु पर्याप्तमेकमेव स्यात्। यत्नत्वाद्यनेकावच्छेदकाभ्युपगमे लाघवापित्वमप्यनेकत्र

कल्प्यं संवृणानेकं त्वे चेत्स पि गौरवमिति हेत्वंतरं कथनार्थस्य। व्यापारत्वस्य व्याप्ततया शक्यतावच्छेदकत्वे लौकिके वैदिक

वाक्ययोर्बोधप्रकारं दर्शयति कुठारेणेत्यादिना। आख्यातानुसामान्यतरश्चेति त्वयोर्मिन्नक्रमो। सामान्यमेवाहान्येति। सामा

न्यतो व्यक्तस्य विशेषाकांक्षा हि कथमिति व्यपदिश्यतो संभवति चेषा व्यापारत्वेनाख्याताद्भावनावगमे। यागविशेषविष

ययत्नत्वेन तद्वगमे तु उरूपपादास्यादिसाशयः। व्यापारत्वस्य शक्यतावच्छेदकत्वे विनैव लक्षणाम चेतनेन क्रियावाचि

धुस्वर्ण्याने प्रतीति निर्वाहं दर्शयति। रथश्रुतिचेतन न कर्तृक क्रियावाचि धपियत तदूत्स्यादि शुपरम नरेव लक्षणाप्रसक्ति

र्नास्मन्मतइत्याह एवमिति। अपि तु कर्तृकक्रियाविनो भवती स्यादेः संग्रहार्थमुक्तं सर्वत्रेति उपादिता हि भवती सा दाववपव

भेदेन प्रयोज्यप्रयोजकभेदमंगीकृत्य भावनाप्रतीतीति वार्त्तिककृद्भिर्व्वार्थाधिकरणे वस्तुतस्तु पथे च भवती सत्र भावनाप्रती

त्युपपादनं वार्त्तिककाकारीयमतिशयार्थं तथैवेहापि रथो गच्छतीत्यादिषु तदुपपादनमतिशयार्थमेव। न हि रथो गमनं करोति

राम॰ १५६

पुरुषो यत्नं करोतीति घटो भवत् करोमीति कस्याप्यनुभवोऽस्ति। अतो यत्नोत्पादानुकूलत्वं ज्ञानादेर्व्यापारसामान्यमेव
सर्वत्राख्यातार्थ इत्येतावत्यर्थे ग्रंथतात्पर्यं। यथा चेदृशोदाहरणे रथाश्रितो गमनव्यापारैः पुरुषाश्रितो यत्नव्या
पारः घटाश्रितो भावनव्यापार इति द्विविनैव लक्षणां बोधोपपत्तिस्तथोपपादितमधस्तात्। नन्वाकरे हि युजेत्सादोपनेते
स्याख्यातार्थविवरणाद्भवतु प्रयतत इत्यादावाख्यातस्योपचारिकत्वमत आह। न चात्रेति। आपतत्स्याख्यातार्थत्वमु
क्तं न च व्यापारत्वस्य शक्यतावच्छेदकत्वेन बाधः। तस्याप्याख्यातार्थेऽनुप्रवेशादसत्वात्। तादृशाख्यातार्थैतस्य विव्यापा
रान्तरानुप्रवेशो न स्यान्नियतत्वाद्यन्यस्यैव नियतत्वात्स्वरं यत्नस्याख्यातार्थत्वकथनं न च परेणापि यतनेनेति विवरणा
नुरोधेन यततेराख्यातस्य च सर्वात्मनानुस्यार्थत्वं शक्यं वक्तुं यततेरित्याख्यातस्यापि कर्मानपेक्षक्रियाभिधायित्वा
पत्तेः भवतु वाक्यं विरोधः। प्रतिपाद्याख्यातानां सर्वेषां सामञ्जस्यानुरोधेन तत्रैवासामञ्जस्यं वक्तुमुचितं न तु तदनु
रोधेनान्यप्रतिपाद्याख्यातेष्वसामञ्जस्यमितिसाशयेनात्रेति। न च चेतनप्रवर्त्तकत्वनियमानुपपत्तिः। तदनुष्ठेयधात्व

मा॰ द्वा॰
१५८
157

र्थानुरक्तव्यापाराभिधायित्वेन तन्नियमोपपत्तेः । अहमत्र प्रेर्य इति साक्षात्स्वं प्रत्यावास्येव प्रयुक्तः प्रतीतिभाज एव प्रे
र्यत्वनियमाच्च न च यत्नत्वं करोतेः शक्यतावच्छेदकं येनात्मान्तरस्यापि करोतिना विवरणान्न तथा स्यादित्याह करोतेः सर्थ
श्चेति । व्यापारत्वं शक्यतावच्छेदकं न यत्नत्वमित्येतावति तात्पर्यम् । अन्योन्यस्य तु कूलत्वस्य तु शक्यतावच्छेदकतां भा
वेन प्रतीत्याक्षेपाद्धे सन्देतन्न । अत एवाह । करोतेरिति । तत्कर्तृकव्यापाराभिधायित्वेनाख्यातस्य तत्कर्तृकत्वाय
थैव चैत्रः पचतीत्यस्य पाकं करोतीति विवरणं दृश्यते तथा स्थाली विभर्ति इत्यस्यापि धारणं करोतीति विवरणं दृश्यते
स्थाली पचतीत्यस्य च पाकं करोतीति न च तत्करोतेर्यत्नवाचित्वे संगच्छत इत्याशयः । एतेन कृताकृतविभागकर्तृव्य
वस्थे अपि निरस्ते । दृश्यते च यत्नजातेऽपि कृतव्यवहारो यत्नाभाववति च कर्तृव्यवहारः अग्निना घटपाकः कृतोऽ
ग्निः पाककर्तेति । यत्नरूपयत्नसाध्यत्वासाध्यत्वाभ्यां क्वचित्कृताकृतव्यपदेशः । सयत्नसाध्ययोरेव द्वयोर्मध्येऽन्यत्न
साध्येऽकृतत्वव्यपदेशो व्यापारसाध्यत्वाविशेषेऽपि क्वचिद्यत्नन्यूनत्वेनैव तत्तद्व्यापारसाध्यत्वादकृतव्यवहारोपप
घा ।

एम॰
१५८

तेर्नाऽसंभवी। यत्नाश्रयत्वेन तुल्येऽपि चैत्राश्वयोः स्वातंत्र्यपारतंत्र्याभ्यां यथा कर्तृकरणव्यपदेशव्यवस्था भवति चैत्रोऽश्वे
न गच्छतीति न तु कदाचिदश्वश्चैत्रेण गच्छतीति। तथा करोतेर्व्यापाराभिधायित्वेऽपि सर्वकारकाणां व्यापाराश्रयत्वेन तुल्ये
ऽपि ताभ्यामेव संभवति सा व्यवस्था। यथा च सत्यपि तदनुकूलयत्ने स्वातंत्र्याभावेन कर्तृत्वनिषेधव्यवहारो यथा परव
शो वदति इतो नाहमस्य वक्ता परवान् एवास्य वक्तेति तथा सत्यपि तदनुकूलव्यापाराश्रयत्वे तदभावविवक्षयैव संभव
ति कर्तृत्वनिषेधव्यवहारो वातादिना स्पंदमाने। स्वातंत्र्यविवक्षया तु भवति तस्मिन्नपि कर्तृत्वव्यवहारः। यथा तदी
यस्पंदेन मयैकेनेदं भग्नं मन्येऽनेन वनान्येनेति। अतो न व्यापारस्य स्वातंत्र्यत्वे किंचिद्बाधकं प्रकृते तयाकानुकूलय
त्नवत्त्वस्य चैत्रेश्वरयोस्तुल्यत्वाच्चैत्रः पचतीतिवदीश्वरः पचतीत्यापि प्रयोगापत्तिर्यत्नस्य वाच्यत्वे बाधकं च
थेच्छाजन्यतावच्छेदको यत्नत्वव्याप्यो जातिविशेष एव स्वातंत्र्यत्वावच्छेदकः यद्वा धात्वर्थस्य व्यापारादेः स्वातंत्र्यार्थयत्ने
चेष्टादिद्वारकमेव जनकत्वं संसर्गः। आख्यातार्थयत्नस्य वा प्रथमांतपदार्थे चैत्रादाववच्छेदकत्वं संसर्ग इति स्वीकृते ईश्वरः

पचतीतिप्रयोगं वारयामः नहीश्वरो जन्यकृतिमान्नापि तत्कृतेश्चेष्टाद्वारकं जनकत्वं नापि कृतिजन्यनिश्चैत्रस्ये भा॰ द्वा॰
वेश्वरस्यावच्छेदकत्वमिति चेन्न । तथा सतीश्वरकर्तृकक्रियावाचिनां वेदपुराणेतिहासगतानामाख्यातपदानाम १५८
नुपपत्तेः । तत्रागत्या भक्त्याश्रयणादिति चेत् । नशास्त्रस्यावान्निमित्तत्वादित्यत्रोक्तेन निरूढत्वर्वेश्ववालादिन्याये
न तादृशपदानुसारिणामेव मुख्यत्वेन रूपीकार्यत्वात् । किं च यथावंतःपाकजनकयत्नात्तिप्रत्ययेऽकर्माख्यातवाच्यः किं 158
वा यावतो यत्नसमुदायस्य फलोपधाननियमस्तावान्समुदायो वाच्यः आद्ये तादृशयत्नत्वं तंकचित्यं च तादृशस
मुदायघटकं समुदितमेव तादृशावचः प्रयोगस्यात् । नापमयाक्षीत् किंतु पर एवेति । पाकजनकयत्नसमूहोऽपि सत्वाद्विशे
षणात् । द्वितीये यत्नत्वं न शक्यतावच्छेदकं तस्य प्रत्येकसमाप्तत्वेन समुदायावृत्तित्वात् । असमन्मतेतु व्यापारत्वस्य शक्य
तावच्छेदकत्वेऽपि फलोपहितत्वसंबंधेन माव्यनिष्ठस्यैव तस्याख्यातेन प्रत्याय्यत्वात् फलोपहितत्वस्य च व्यापारांतिचयव राम॰
त्तित्वाद्व्यापारत्वस्य चाद्यपरिस्पन्दस्य फलसामान्याहितताभावेनेति व्यवहारात् कोऽसौ व्यापारः इत्याकांक्षायां मन्त्राभाना १५८

दिग्मात्रस्य तात्पर्येणां तत्त्वदर्शार्थनिश्चयस्यायमसौ व्यापार इत्यन्वयकथनात्स्वसमुदाये पि व्यवहारोपपत्तेः संभवन्ति व्यापा
पार निश्चयवसात्स्वातन्त्र्ययोगनियम इत्यलं बहुना। अर्थभावनानिरूपणमुपसंहरति। नात्रेति। इति। तद्द्वारकं या
गादेर्विध्यन्वयं दर्शयितुं तस्याश्च व्यापाराभिधेयरूपप्रदर्शनपूर्वकमंशत्रयपरिपूर्णतया विध्यन्वयमापादय
ति। सैव चेत्साध्यता विशिष्टभावनां विषयीकुर्वता च विधिना तद्द्वारा विशेषणीभूतस्य यागस्यापि विषयीकारणाद्धि
साधिकरणन्यायेन चाविषयीकृतस्य स्वर्गादेः रूपनयेव स्वीकरणाद्भूयात्। आकांक्षधर्मलक्षणाकांक्षत्वेन यागादेर्धर्मत्व
सिद्धिरिति ग्रंथार्थमुपसंहरति एवं चेति। अंशत्रयपूर्णतया भावनाया विध्यन्वये सतीत्यर्थः। अत्र केचित्कपिलगौतमादिप्रणी
तशास्त्राणां मोक्षार्थतत्त्वज्ञानकत्वात्परमपुरुषार्थपर्यवसायित्वं न तु जैमिनिप्रणीतशास्त्रस्य तस्य तियावत्कर्मणां मोक्षाजन
कत्वात्तात्तदजनकत्वे वक्तव्य इति चेन्न। स्वर्गादिफलानां तरोहितोभेदकर्मणां विधिदर्शनात्। न कर्मणा न प्रजया धनेन त्यागेनैके
ऽमृतत्वमानशुरिति मोक्षकर्मणि न्यूनत्वप्रतिषेधदर्शनात्। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति मोक्षे ज्ञा

भा॰टी॰ १५९ तानैकसाध्यत्वश्रवणाच्चनचभगवदर्पणबुध्याऽनुष्ठितानामपितेषांमोक्षहेतुत्वं। कर्मशुद्धिर्मदर्पणमित्यादिशास्त्रव
शेनभगवत्समर्पणस्यानन्तफलार्थकर्मवैगुण्यपरिहारार्थत्वेनकर्मांगत्वात्। परार्थतावगमेचफलश्रुतेरर्थवादत्वादित्याशंक्य
। तन्निराकरणायाजेनस्मृतिप्रामाण्यंदर्शयितुमाह सोयमिति। तुशब्दस्तन्त्रसत्त्वोदृश्यकहतिव्यवच्छेदार्थः। एषतुवागतिवा
दीत्यादेरनुशब्दस्यतथाशक्यवधारणात्। यद्यपितन्त्रसत्त्वोदृश्यकाण्डज्ञानेऽर्पणबुद्धिर्वैगुण्यपरिहारमात्रार्था। तथापिफ
लान्तरेदृशमन्तरेणभगवत्प्रीत्यर्थकेशात्मकार्पणबुध्यानुष्ठीयमानकर्मणांमुक्त्यर्थतावश्यमभ्युपेया। वेदोदितानिकर्मा
णिकुर्यादीश्वरतुष्टयेयथाश्रमंत्यक्तकामःप्राप्नोतिपरमपदं शुभाशुभफलेरेवंमोक्ष्यसेकर्मबन्धनैरित्यादिस्मृतेः। पुराणे
तिहासवचोभ्यः। संयोगपृथक्त्वन्यायेनानन्तफलार्थानामपिमुक्त्यर्थत्वसंभवान्। विध्येकवाक्यतामन्तरेणार्थवादतायादुर्व
चत्वात्। नचफलान्तरेविनियोगस्यान्यानामनित्यनैमित्तिकानामेवमोक्षेविनियोगइत्यपिशंक्यं। तेषामपिप्रातिस्विक
विधिभिःपापक्षयेविनियोगात्। त्यक्तकामःशुभफलैर्मोक्ष्यसइतिपदाभ्यांवक्ष्यमाणतेश्वरकाम्यंविषयभोगार्थमिहामुत्र राम॰ १५९

प्रवृत्ते मोक्षाय उद्धृतं तद्विवक्षार्थं तथापि प्राकृतमिति स्फुटेन वचोत्तरेण काम्यानामपि मोक्षार्थत्वप्रतीतेः स्थानं च न कर्म
णो मोक्षादिश्रुतिविरोधः। सामान्यप्रवृत्तत्वात्तस्यास्तात्पर्यार्थेण तु द्विसूत्र्य कर्मविषयत्वोपपत्तेः। नापि तमेव विदित्वेति श्रुति
विरोधः। कर्मानुष्ठानसहितस्यात्मज्ञानस्यापवर्गाभिमोक्षजनकत्वाभ्युपगमात् यथोक्तं बृहद्दीपिकायां। न तु निःश्रेयसं ज्ञाना
द्वैधहेतोर्न कर्मणः। नैकस्मादपि तत्किंतु ज्ञानकर्मसमुच्चयादिति नाप्येवकारश्रुतिविरोधः। तस्या मोक्षजनकीभूतज्ञानेतरब्र
ह्योपायान्तराभिन्नविषयनिरासार्थत्वात्। नापि नान्यः पंथा विद्यतेऽयनायेति श्रुतिविरोधः। तस्या एवकारबोधितनिरासानुवादि
त्वात्। एकारसमभिव्याहृतनिषेधस्य सर्वत्र तथात्वदर्शनात्। अन्यथा वाक्यभेदापत्तेः। नन्वेवमपि श्रौतेन ज्ञानस्य मुक्तिसाधन
त्वेन कर्मणां मुक्तिसाधनत्वस्य स्मार्तस्य बाधः स्यादिति चेन्न। मोक्षविरोधिपापनिवृत्त्युत्पत्त्यादिद्वारा कर्मणां मोक्षविरोधि
कर्तृत्वाद्यभिमाननिवृत्त्यर्थत्वप्रकाशनकारणस्य ज्ञानस्याभिनाव्यान्तरकार्यत्वेन वा अविकल्पयोरनाशंकत्वात्। अत एवोक्तं
बृहद्दीपिकायां नित्यमेभिरितिकर्त्रेव कुर्वाणो दुरितक्षयं। ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयन्। वैराग्यात्पक्वविज्ञानः कैवल्यम

भा॰ द्वा॰
१६०
160

त्तेन इत्ति यजेत स्वर्गकाम इति वत् ज्ञानस्य मोक्षसाधनता विधेः स्पष्टस्यादर्शनाद्यामानांतरसंवादविसंवादरहितेन त
रति शोकमात्मविदिति दृष्टेनेव विधिशून्येनापि वचसा तस्याः सिद्धिरिति चेत्। न प्रयाजानुयाजाद्यंतेभ्यात् व्यस्याभिभूत्सा
इति वचसः प्रयाजानुयाजानां क्रत्वाभिभवार्थत्वापत्त्या फलवत्फलन्यायेनांगत्वासंभवापत्तेः प्रकरणसहायेन वाऽ
मुनाऽसार्वकाम्यशास्त्रावगतदार्शिकफलभूतस्मात् क्रत्वाभिभवे प्रसक्ते एव क्रतूपकारद्वारेण ढिकया साधनत्वापत्तेः। न चैतर
ति शोकमित्यादौ विधिकल्पनेनापि ज्ञानमोक्षयोः साध्यसाधनत्वोपपत्तिः। औपनिषदैर्ज्ञानविध्यनंगीकारात्। पुरेऽपि मि
थ्याज्ञाननिवृत्त्यधीनजन्मनिर्मोक्षे तत्त्वाज्ञानाधीनतायाः लोकसिद्धत्वात् प्रयोगमेन विधिकल्पनायाः कर्तुमनुचितत्वात्। अत ए
व लोकसिद्धसाधनत्वानुवादिनी श्रुतिर्नेष्ठा तत्कर्मसाधनत्वस्य बाधापातात्। न हि कर्मणां मोक्षसाधनत्वं ज्ञानस्येव लोक
सिद्धं येन स्मृतेरप्यनुवादत्वं प्राप्नुयात्। अस्मन्मते तु सत्यपि ज्ञानविध्याश्रयणाभिनिवेऽत एकार्यत्वेनैवाक्रीत्वाबाधपरिहा
रात् तदा अपवर्गफलत्वं तत्र मेव वक्ष्यामः। न हि परमतेन लोकसिद्धज्ञानस्य मोक्षहेतुत्वं शास्त्रीयेण कर्मणां हेतुत्वे न बाध्य

ग॰ म॰
१६०

नेति कर्मणो व मोक्षसिद्धिरिति कर्कोक्तं साधितं चेतन। अपूर्वविधिकरणन्यायेन लोकप्रसिद्धवस्तुस्वभावानतिक्रमेणैव शा
स्त्रप्रवृत्तेः। लोके च मिथ्याज्ञाननिवृत्तेस्तत्त्वज्ञानाधीनत्वावगमात्। तामंतरेण मोक्षासंभवात्। अतो यथैव पश्वादिप्राप्तिहे
तुत्वेन विहितं चित्रादि लोकावगततद्भावशरीरादिसहितमेव स्वफलप्रापकमिति संगीकृतं तथैव मोक्षहेतुत्वेन विहि
तानि कर्माणि ज्ञानसापेक्षाण्येव तत्प्रापकाणीत्यभ्युपेयं। अत एव ज्ञानकर्मणोरन्यतरव्यतिरेकतोपि मोक्षाभावं दर्शय
ति श्रुतिः। अंधं तमः प्रविशंति ये विद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः इति। अतोपासते रताः इति चैकत्र निष्ठो
क्त्या परव्यतिरेकः कथ्यते। तेनोभयनिष्ठा एवं तमस्तरंतीत्युक्तत्वात् समुच्चितोभयमेव मुक्तिहेतुरित्युक्तं भवति। न च कर्मणां प्र
तिबंधकदुरितनिरासेनान्यथासिद्धत्वान्न फलहेतुत्वमिति सांप्रतं ज्ञानस्यापि प्रतिबंधकमिथ्याज्ञाननिवर्तकतया प्रस्तु
त्वात्। प्रतिबंधकनिरासस्य व्यापारत्वकल्पनाया अपि समत्वात्। न च मुमुक्षुप्रतिवेलानिं मृच लोकमपुं च परित्यज्यात्मा
नमन्विच्छेदिति वेदैककर्मत्यागश्रवणान्न कर्मणां मोक्षहेतुत्वमिति सांप्रतं। ज्ञानमात्रस्त्वविरुद्धानां ज्ञानेन सह मुक्तिहेतुत्व

भा.टी. स्यज्ञानपरिपाककालीनत्यागेन सह विरोधाभावात्। यथा रोगिणं प्रति कश्चिद्ब्रूयात् प्रथममपक्वं क्वाथो यात्यस्ततस्तं
१६१ परित्यज्येदं चूर्णं सेक्रमेव स्वास्थ्यं भविष्यतीति। न चैवं सति चूर्णमेव स्वास्थ्यहेतुर्न क्वाथ इति शक्यं वक्तुं। तथा ज्ञानप
रिपाककाले कर्मणां त्यागश्रवणेऽपि न मोक्षहेतुत्वानुपपत्तिः। उक्तं हि न्यायसुधायामपि परिपक्वेन ज्ञानेनात्मनः कर्मसंबं
धो वार्यत इति। अत एव तत्र तत्र लक्षणया कर्मानुष्ठानत्यागाभिप्रायत्वं त्यागावसंज्ञानपर्वोक्तं काम्यानां कर्मणां
न्यासं संन्यासं कवयो विदुरिति। एवमपि ज्ञानादेव तु कैवल्यमिति श्रुतिविरोधोऽपरिहार्य इति चेन्न। यदि रथंतरसोमः स्या
दित्यत्र रथंतरेणत्वप्रतिस्पर्द्धिरहस्याहृत्तिवत्। तत्त्वज्ञानवाचिज्ञानपदोत्तरैवकारेण न तत्प्रतिस्पर्द्धिनोऽतत्त्वज्ञानस्ये
व निरासोचित्वात्। नन्वेवमपि ज्ञानस्य मोक्षहेतुत्वे प्रामाणिके विविदिषाकाच्च कर्मणां ज्ञानहेतुत्वेऽवगते स्वर्गाद्यर्थं
विहितैस्तैरपूर्वस्येव मोक्षाय विहितैस्तैर्ज्ञानस्य व्यापारत्वाभ्युपगमात् प्रामीमांसीयवत्कर्मज्ञानयोर्मोक्षे समुच्च राम
यसिद्धिरिति चेन्न। आत्मनोऽन्तरमप्यनुष्ठेयानां नित्यादिकर्मणां मोक्षप्रतिबंधकदुरितनिरासमात्रार्थत्वेन मोक्षोपयोगि १६१

नां ज्ञानव्यापारत्वासंभवात् । करणावच्छेदकरूपावच्छिन्नेपज्ञनयित्वैव फलं जनयतीति तस्यैव व्यापारत्वनियमात् । ननु
देहादिभिन्नजीवात्मज्ञानस्योपनिषदस्यापि यदेव श्रद्धया करोतीति विद्ययोपनिषदेति वचने उपनिषच्छब्दोक्तस्यानेनैव वा
केन लिंगेन वाक्यत्वर्थं नानावदाकारे संवेधवार्त्तिकादौ कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्योत्तरस्तरस्यादिनोक्ता । अपहतपा
प्मत्वादिसत्यकामत्वादिगुणवदात्मनोन्तरस्य सोन्वेष्टव्यः स विजिज्ञासितव्यो मंतव्यो बोद्धव्य इत्यादिशास्त्रविहितस्य तु विज्ञा
नस्य स सर्वांश्च लोकानाप्नोति सर्वांश्च कामानाप्नोति संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्याद्यर्थवादोक्ताभ्युदयफलार्थत्वं वा
कारणाधिकारे निर्दिष्टं । आत्मानमुपासीतेति श्रुतिविहितस्य निर्गुणात्मतत्वज्ञानस्य तु स खल्वेवं वर्त्तयन् यावदायुषं
ब्रह्मलोकमभिसंपद्यते न स पुनरावर्त्तत इत्यपुनरावृत्त्यात्मकं परमात्मप्राप्त्यवस्थाफलसंकीर्त्तनान्निःश्रेयसार्थत्वमिति तत्रै
वोक्तं । परमशब्दोऽनौपाधिकत्वपरः अनौपाधिकस्वात्मा ब्रह्मशब्दवाच्यः परमानंदोपभोगहेतुत्वाल्लोकशब्दवाच्यश्च
सन्नस्मातो ब्रह्मलोकमिति कर्मधारयेण विवक्षित इति सूचयितुमौपाधिकरूपपरित्यागेनासंसारिरूपनिजावस्थात्म

भा॰ द्वा॰ कत्वेन तत्प्राप्तेरक्षयत्वं च तत्त्वचयितुं शक्याति निर्दिष्टा ब्रह्मलोकप्राप्तिः परमात्मप्राप्तिशब्देन व्याख्याता । तत्प्राप्तौ बंधककर्म
१६२ भावात् मामाप्याः पुनरावृत्ते रंतु वादमात्रेण तत्पुनरावर्त्तत इति न तु ऽथ ब्रह्मलमेत इति वक्तुं तस्मा एवापुनराह सात्म
कत्तोक्ते तिम्याय सुधायां व्याख्यातं । अस्मा च ग्रंथादकर्त्तृमोक्तृत्वाद्यात्मकात्मसंसारिरूपात्मनस्तत्त्वज्ञानस्यानवच्छिन्नानं
दात्मकमोक्षप्राप्यकर्त्वमतीतेस्तादृशात्मज्ञानोत्तरं च कर्मानुष्ठानासंभवात् कथं ज्ञानोत्तरकर्मानुष्ठानस्य मोक्षोपयोग
वार्त्ता संगच्छते । न तु मोक्षे कथमानंदोपभोगः । न तावद्रूपसन्निमग्नत्वं तत्र प्रकाशात इति शक्यं वक्तुं । सुखोपभोगरूपश्चय
दि मोक्षः प्रकल्प्यते । स्वर्ग एव भवेदेषपर्यायेण तस्यापीच सः । न हि काम्यावलिं चिरदृष्टपि त्वेन गम्यते इति संवेधवार्त्तिके
निरामानाना पिच्छरूपसुखस्य प्रकाशान यापप्रकाशान इति शक्यं वक्तुं । संसारावस्थायामपि प्रकाशापत्तेः । श्रोभिरस्कृतेर
त्तुभवविरुद्धायोस्ता हस्समात्रत्वान्नत्तत्र सोभिभूत इति चेत् न प्रकाशमाने प्रकाशनिवारणात्मकाभिभवस्य तु र्निरूपत्वा राम
त्ता यत्तु केचिदाहुः । मुक्तो वात्स्येंद्रियनिवृत्तावपि मनसो वस्थितेः स्वरूपसुखं मानसप्रत्यक्षेणानुभवत्येवात्मा चतिष्ठत इ १६२

तीति।तत्तुच्छं शरीरं विनाशमानस्य प्रत्यक्षत्वात्।अमनोऽवागिति मनसोपि तदभावप्रतीतेः प्राणाद्यप्रसुप्तावपि मनोपि
धिकात्मनो मुक्तप्राप्यत्वसंकीर्तनेन मनोरूपोपाध्यवस्थितेतत्त्वतन्मनत्वं चेत्ति चेन्न।वायुविक्षिप्तदेशस्थितदीप
प्रभावत्सांसारिकदुःखसंवलितस्य स्वरूपस्य स्वप्रकाशस्य सतोप्यसत्वव्यवहारोपपत्तेः।निर्वाणप्रदेशस्थापिततत्प्रभा
वच्चमुक्तौ तत्स्वाभिव्यवहारोपपत्तेरिति।उक्तं चानिलं यत्रात्मचैतन्यमानं दृश्येष्वपि ते चयः।यच्चानित्यत्वाविभुत्वादिनेनात्मा
मेवास्तु च्यत इतीतिन्यायप्रसुप्तानुसारिणां यथा।।स्यात्मवादग्रंथेपि प्रसक्ताकुं देहव्यतिरिक्तस्याविनाश्यात्मनश्चोपनि
षदं ज्ञानमध्ययनविधिविहितार्थज्ञानवल्लिंगात्तथा लौकिकफलकलपं इत्याद्यनास्तिकानिराकारिष्णुरात्मास्तितां भाष्य
कृदत्र युक्त्या।।दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदांतनिषेवणेनेति वार्त्तिकोक्तेः।प्रदेशविशेषचिंतनाद्यात्मकेतिक
र्तव्यताविशिष्टोपासनानां चास्मुद्यार्थत्वं।शांडिल्यादीति कर्तव्यतोपेतोपासनानां काम्यनिषिद्धवर्जनसहितनित्यनैमि
त्तिकानुष्ठानसहितानां मुक्त्यर्थत्वं मुक्तिश्च भोगायतनभोगसाधनभोग्यात्मकत्रिविधबंधस्य सांतिको विलयः।न तु सु

भा॰द्वा॰ १६३ स्वप्रकाशः। अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति श्रुतेः प्रियस्पर्शस्यापि निषेधात्। विज्ञातारमरे केन विजानीया
दिति श्रुतेश्चात्मप्रकाशनिवारणाच्च। आनंदशान्तिश्रुतयो दुःखाभाव एवोपचारेण गमयितव्याः। इष्टदृष्टेर्विपरिलो
पोऽत्र विधीयत इति च प्रकाशाशक्तविलोपाभिप्रायेण। न च प्रियाप्रियस्पर्शविवचनं वैषयिकसुखनिषेधाभिप्रायं यतः श्रुतौ वि
163 शेषमानान्तरेण निर्णयः कर्तुमुचितः। बाधितं च स्वरूपसुखं नेदानीमहं किमपि सुखमनुभवामीति प्रत्ययेन सौषुप्तिके
न सुखानुभवेन च। बाधितं च तृप्तिग्रासितिक्षितिस्पृष्टिविजातीनां नियतचक्षुरादीन्द्रियजन्यनियतगंधादिविषयज्ञानात्मकां
नां मुक्तौ सत्त्वात्। वार्तिकेऽपि संबंधग्रंथे तस्मात्कर्मक्षयादेव हेतुत्वभावेन मुच्यते। न त्वभावात्मकं मुक्तौ मोक्ष इति तत्त्वकारणं। न च
क्रियापाकस्याश्रितेष्वाकफलमिष्यते। न ज्ञानात्मतत्वान्नाभोगात्सर्वक्रियाफल्ये। उक्तं च प्रचयापसत्वाद्देहो नोत्पद्यते पुनरिति
सोपपत्तिकाभावात्मकमोक्ष इति पादनादानंदशास्त्रिवचनमुपन्यासमात्रमिति। आस्मिन्नविमते उपासनाव्यापारस्तु तं देह एम॰ १६३
भिन्नात्मतत्त्वसाक्षात्कारस्य तस्मानंतरं कर्मसुप्रवृत्तिः संभवति। देहसंबंधोपाधिकेन ब्राह्मणोऽहमित्याद्यभिमानेन ब्राह्मणा

णत्वादिव्यपदेशभाज एववृत्तानां प्राधानेऽधिकारः। व्यवस्थापाद्यपूर्वाधिकरणाकारग्रंथेऽभिधानात्। उक्तत्वसाक्षात्कारानंतरं
च तादृशाभिमाननिवृत्तेरवश्यंभावात्। न च युक्तमेतन्मतं श्रौपनिषदस्य देहव्यतिरिक्तात्मज्ञानस्यालिंगात्परलोकफलवि
हितकर्मांगत्वे तादृक्फलनिषिद्धकर्मांगत्वमपि प्रसंगेन। तादृशात्मज्ञानशून्यस्य तादृक्फले कर्मणि प्रवृत्तेरिव तादृक्फलानि
षिद्धानिवृत्तेरप्यसंभवात्। न चेष्टापत्तिः। अनात्मज्ञेन हतब्रह्महत्यादेर्वैकल्येन प्रत्यवायाजनकत्वप्रसंगात्। अत एवात्मज्ञा
नस्य क्रत्वर्थत्वप्रतिज्ञायां वार्त्तिकोपन्यस्तस्य तेन विना परलोकफलेषु कर्मसु प्रवृत्तिनिर्वाहस्यासंभवादिति हेतोर्भाष्ये चसरेष्याकरणा
धिकरणोन्यायसुधायामुक्तं। उपकारकत्वमात्राभिप्रायः क्रत्वर्थशब्द इति। न च बंधनिवृत्तिमोक्षस्यापि साधुदुःखनिवृत्तत्वस्य पुरु
षार्थत्ववत्सुखनिवृत्तिवशेनापुरुषार्थत्वापत्तेः। अनिष्टनिवृत्तेर्लोके काम्यत्ववद्दिष्टानिवृत्तेर्द्वेष्यत्वस्यापि दर्शनात्। सुखाभिव्यक्त्य
र्थतया दुःखनिवृत्तेः कामनादर्शनेन स्वतः पुरुषार्थत्वाभावाच्चेति चेत् न। आत्मज्ञानरीत्याऽध्ययनविधिसिद्धार्थज्ञानस्यापि क्रत्वंगत्वेनांगता
पत्तेः। अध्ययनविहितप्रवृत्तेरिव निषिद्धनिवृत्तेरपूर्वसाधनत्वाभावेन नोगयादकत्वं। निषेध्यस्य सत्यपि पापापूर्वसाधनत्वे राग

भा. टी. तो यथा तस्यासंन्यादृशस्येव तस्यानिष्टहेतुत्वज्ञापनाज्ञानाकांक्षा न तरां तद्धेतुकत्वं विहितेषु गूक्ष्मबाधकाभावात्संभवत्सध्यय
१६४ नस्तिष्ठार्थज्ञानस्यागतत्वमिति। तर्हि तुल्यन्यायतयाऽन्यज्ञानस्यापि विहितकर्मांगत्वं स्वीक्रियतां। यथा च निषेधाध्ययननियमो नि
षेधेष्वनुपयुज्यमानोपि निमित्तनिश्चयद्वारा प्रायश्चित्तेषूपयुज्यते तथोक्तात्मज्ञाननियमो निषेधेष्वनुपयुक्तोपि प्रायश्चित्ता
164 धिकारहेतुभूतामनुतापहेतुकां निवृत्तिं संपादयन्प्रायश्चित्तेषूपयुज्यत इत्यभिप्रेत्य धार्मिके तेन विना निवृत्त्यसंभवात्कृत्वर्थ
त्वमित्युपन्यासः संगच्छते। दुःखैव स्वसंसारादिकसुखेपि विवेकिनां द्वेष्यत्वं दर्शनात्तं तन्निवृत्त्या मोक्षस्य पुरुषार्थत्वोपपत्तिः। अत ए
व सुखानुबंधमतेरप्यदुःखनिवृत्तेः कामनादर्शनात् दुःखनिवृत्तेः पुरुषार्थत्वोपपत्तिः। यथाहुर्मिश्राः। सुखे दुःखोपभोगो हि सं
सार इति शब्द्यते। तयोरनुपभोगस्तु मोक्षं मोक्षविदो विदुः॥ श्रुतिरप्येवमेवाह भेदं संसारमोक्षयोः। नह वै सशरीरस्य प्रियाप्रियविहीं
नता। अशरीरं वाव संतं स्पृशतो न प्रियाप्रिये। आनंदात्मकमात्मानं ये वदंति स्वयंप्रभुं। तन्मतेपि च संसारान्मुक्तैरेतावतीमदे रम.
तिमिश्रानुसारिणां यथायः। द्वयोरपि च यथोक्तत्वज्ञानोत्तरं नित्यादिकर्मानुष्ठानं व्यर्थं ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते ज्ञ १६५

नेतिस्मृतेस्तत्त्वज्ञानेनैव सर्वदुरितनिवृत्तिसिद्धेरिति चेन्न। अप्रामाण्यशंकानास्कंदितत्वरूपात्तत्त्वज्ञानपरिपाकात्प्राक्कृष्या
पि धर्मस्यानिवृत्तस्य संभवेन कर्माधिकारोपपत्तेः। संवंधग्रंथवार्त्तिककारैर्ज्ञानाग्निरित्यादिस्मृतेरौपचारिकताभ्युपगमेन ज्ञा
नस्य कर्मनाशकत्वनिषेधाच्चाप्याहुः। यद्यप्यज्ञानजन्मत्वं कर्मणामवगम्यते। रागादिवत्तथाप्येषां न ज्ञानेन निराक्रि
या। कर्मक्षयो हि विज्ञानादिष्टो न तु निःशेषमाणकं। फलस्यास्य स्वाचारान्न राजपुत्रापराधवदिति। तस्माद्युक्तमुक्तं ज्ञानोत्त
रमनुष्ठेयानां कर्मणां ज्ञानस्याव्याप्यत्वमिति। किंच ज्ञानस्याव्याप्यत्वे प्राग्भवीयपूर्वार्जितकर्मणां ज्ञानेनप्रसंगत्वं वाच्यं न च त
त्संभवति। एकाधिकारिकयोरेव विहितयोरंगांगित्वसंभवात् कर्मणां च जीवनादिनिमित्तवदाधिकारिमात्रार्थत्वात्
कर्मणां मुक्तिज्ञानस्य मुमुक्षुमात्राधिकारिकत्वात्॥ विविदिषावाक्यं तु मोक्षार्थत्वं न विविदिषार्थत्वेन वा कर्मणां विधा
यकं तस्मात्समप्राधान्येनैव ज्ञानकर्मणोर्मुक्तिहेतुत्वं। यदि वा ज्ञानद्वारा कर्मणां मुक्तिहेतुत्वे सर्वथापि कर्मणां मुक्तिफ
लत्वात्कर्मविचारार्थस्य शास्त्रस्य संभवति मुक्त्यौपयवसानमित्याशयः। ननु नीत्यनुसार्पणानुध्यानुष्ठीयमानानां वेदोक्तस

भा॰ दी॰ मस्तकर्मणां परस्परसहितानां मुक्त्यर्थत्वेन विधानेऽप्यकार्थविधिः स्यात्। न हि समस्तकर्माणि केनापि कर्तुं शक्यन्ते।
१६५ अतो वेदोदितानीत्याद्युदाहृतशास्त्रेण मुक्त्यर्थत्वेन कर्मानुष्ठाने प्रमाणमित्यत आह न चेति। यथा हि यत्करोषि यदश्ना
सीति ये क्रिये स्वभावतः कर्तव्यतया प्राप्ते तयोरीश्वरार्पणबुद्ध्यानुष्ठानं विधीयते न त्वपूर्वे क्रिये विधीयेते तथैव
165 होमदानतपांस्यपि यान्येव यस्य पूर्वं स्ववर्णाश्रमानुसारेण कर्तव्यतया प्राप्तानि तत्तच्छास्त्रेभ्यस्तान्येव तादृशबु
द्ध्या कर्तव्यतया विधीयन्ते न त्वपूर्वाणि कर्माणि। यच्छब्दोपबंधानुपपत्त्यापातात्। यथाश्रमं सक्रकाम इति शास्त्रा
नराश्चानश्चैवमुक्तीर्थ्यायाश्रितोपासनानामिव शास्त्रकर्तव्यताकर्माश्रितापात्तादृशबुद्धेरेव मुक्तिफलत्वेन विधिरस्तु
न कर्मणामिति वाच्यं। तथा सत्यश्रय जेऽप्यत्सेऽप्यः फलान्तराण्यमापत्तेः। तत्र च शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैरिति
वाक्यशेषानुपपत्तेः। न चैवं स्वभावप्राप्तस्य गमनादेरपि सम्भगवदर्पणाङ्गीकारे निषिद्धस्यापि देवान्तरपूजनादेरप एम॰
त्तिः। देवतानां गुरूणां च मातापित्रोस्तथैव च। शापदेयं प्रयत्नेन नापराधं चोदितं क्वचिदिति माधवोदाहृतानिरोधवच १६५

नात्। अपुण्यशब्दस्य धर्मशब्दपर्यायत्वात्। अर्पणशब्दस्य दानवाचितायाः प्रसिद्धत्वात्। अनुस्मृतिशब्देन यदि ता
न विशेषस्तन्मूलकं वचो या विवक्ष्यते उभयथापि न तस्य प्रामाण्यं संभवति। अनधिगतार्थगन्तृताया अभावात्। पौरुषे
यवाक्यस्यापि धर्मप्रामाण्यं संभवे वेदापौरुषेयत्वसमर्थनस्य वैयर्थ्यापाताच्च। अथ स्वतन्त्रप्रामाण्यसिद्ध्येनतत्क्वान्तं स्मृ
तीनां तु प्रमाणं तन्मूलत्वेन पराधीनप्रामाण्यं मूलं इति चेत्। न। प्रत्यक्षसूत्रे निरस्तधर्मप्रामाण्यानां प्रत्यक्षादिलौकि
कप्रमाणानां मूलत्वासंभवात्। श्रुतिरपि मूलत्वेनोच्यमाना नित्यानुमेया वा स्यात्। उत्सन्ना वा। इदानींतनप्रत्यक्षा वा
। नाद्यः। अन्धपरंपराप्रसंगात्॥ द्वितीयेऽपि स्मार्त्तधर्मनिबंधनरूपायाः कस्याश्चिच्छाखाया एव तावन्नोत्सादो वक्तुं शक्यः
। प्रतिवेदं शाखानां नियतसंख्यत्वात्। नापि नानाशाखाविप्रकीर्णस्मृतिमूलभूताः श्रुतय उत्सन्ना इति शक्यं कल्पयितुं।
असंतानावहिताध्येतृकासु मात्रामात्रस्याप्युच्छेदासंभवात्। न तृतीयः। अनुपलब्ध्याबाधितत्वात्। शाखान्तरीयत्वेन परप्रत्य
क्षायामप्युपलंभकाभावेन पाठानुपलब्धिः संभवत्येवेति चेत्। प्रमाणसिद्धस्यानुपलंभे वक्तुमुचितमेवमेवं। न च स्वयं

भा॰द्वा॰ १६६ 166

प्रत्यक्षतयाऽनुपलभ्यमानायाऽअपि परप्रत्यक्षायाः स्मृतिमूलश्रुतेः सत्वे प्रमाणमस्ति। न तावदनुमानं पौरुषेय
वचसो वेदमूलकस्यापि लोके व्याकरणे च दर्शनेन वेदमूलकत्वाविनाभावाभावात्। न च धर्मशास्त्रप्रवर्त्तकत्वे
न परिगणितमन्वादिवाक्यस्य वेदमूलकत्वाविनाभावः। विरोधाधिकरणे भाष्योक्तन्यायेन श्रुतिविरुद्धस्मृति
वसुकृत्व्यभिचारप्रतीतेः। वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां। आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेत्या
दिषु स्मृतिपक्रमगतवचःस्वेव व्यभिचाराच्चानन्तरेषां वेदमूलत्वसंभवः। चोदनासूत्रादौ स्मृतिपादे चमुसादिन्याय
मूलत्वात्। एतेन प्रामाण्यानुपपत्तिप्रसूतार्थापत्तिरेव वेदमूलत्वे प्रमाणमिति निरस्तं। श्रुतिविरुद्धस्मृतिषूदाहृत
स्मृतिवच्चस्मृतित्वहेतुना सर्वस्मृतीनां वेदमूलत्वाभावनिश्चये धर्मे प्रामाण्यस्यैवाबाधात्। न च वेदमूलकत्वाभावेन
शाक्यादिस्मृतीनां धर्मे प्रामाण्यासंभवे युक्तस्मृतिवदर्थान्तरेऽपि प्रामाण्यं वक्तुं शक्यं। अर्थान्तरस्याप्रतीतेः। न हि वेदो
ऽखिलइत्यादेर्न्यायानभिज्ञप्रतिभायसिद्धमप्यर्थमनधिगतं बोधयतो वचनस्य प्रामाण्यमप्रतिहतमिति चेन्न। उ

राम॰ १६६

क्तस्य स्वार्थस्य स्मार्यमाणोऽपि निरूपणानर्हत्वात्। तथा हि। नाखिलवेदस्य धर्ममूलत्वं शक्यं वक्तुं श्येनादिवाक्यानां नि-
षेधवचसां च तदसंभवात्। न च तद्विदामित्यनेनोक्तं स्मृतिकर्तॄणां स्मृतिमूलवेदवित्त्वं संभवति। अथर्वणो वेदशा-
तानां मूलभूतवेदेनैव सर्वेषां धर्मप्रतीतिसंभवेन स्मृतिप्रणयनेऽप्युपयोगात्। न च तद्विदामित्यनेनातद्वित्स्मृ-
तेर्धर्ममूलत्वाभावः शक्यो बोधयितुं। चतुर्दशविद्यास्थानसंवादिन्याः सत्यवदनादिगोचराया अतद्विद्वात्स्मृतेरपि धर्मे
प्रामाण्योपपत्तेः। न च चतुर्दशविद्यास्थानानामेव धर्मे प्रामाण्यनियमनादन्यस्मृतेः प्रामाण्यमनभिगतयथार्थबो-
धकेषु च स्मृतिप्रामाण्याभावस्य दुर्निरूपत्वात्। प्रवर्तनाविषयत्वेन तद्बोधितसत्यवदनस्य श्रेयःसाधनत्वाभावान्न यथा-
र्थबोधकत्वमस्येति चेत्। न सत्यवदनं श्रेयःसाधनमित्येवास्य वचसोऽर्थः। ननु त्वद्बोधितं तन्न साधनमिति। न च सत्यव-
दनं न श्रेयःसाधनं येनायथार्थत्वं स्यात्। तथापि स्वबोधितसत्यवदनात्मकस्वार्थैकदेशस्यादप्रामाण्यमिति चेन्न। वाक्य-
स्यास्यानुष्ठापितसत्यवदनात्मकैकदेशोऽमन्वादिस्मृतिप्रामाण्यस्यापि वक्तुं शक्यत्वात्। न च शीलस्य पृथगुपन्यासः सं

गच्छते। न नावज्ञाद्विष्टां च स्मृतिशीले इत्यत्र हरदत्तेन शीलपदस्याचारतया व्याख्यानादिहापि शीलपदमाचारपर
मिति शंक्यं। आचारस्यैव स्मृतामूलतामित्यनेन नयोनरुक्त्या तेन च शीलं रागद्वेषपरिहारं तत्र च न ज्ञापकत्वेनाधर्ममूलत्वं किं
तु निर्वर्तकत्वेनेत्यस्यार्थ इति गोविंदराजोक्तं साधु एकस्य धर्ममूलशब्दस्य वेदादिविषये शीलविषये च भिंनार्थबोधक
त्वायोगात्। मनोजयविधायकमिवचःपोनरुक्त्यात्स्वा। एतेन ब्रह्मण्यता देवपितृभक्तिता सौम्यताऽपरोपतापिताऽनसूयुताम्
दुताऽपारुष्यं मैत्रता प्रियवादित्वं कृतज्ञता शरण्यता प्रशान्तिश्चेति त्रयोदशविधं शीलमिति हारीतोपदिष्टमिह शीलपदा
र्थ इति कुल्लूकभट्टोक्तं निरस्तं। अस्यापि धर्मनिर्वर्तकत्वोपदेशो पूर्वोक्तदोषानपायात्। अनुवेदविदां बहूनां चित्तप्रसादः शी
लं धर्मप्रमाणं स्मृतेर्दुर्बलमाचारात्स्वपरवलं निर्निर्बंधनत्वान्मिथ्याप्रसिद्धिमूलत्वेन नाशंकात्वाच्च। आत्मतुष्टिस्तु वेद
विदः एकस्य चित्तप्रसादः उक्तमानान्तरेभ्यो दुर्बल इति सर्वज्ञनारायणीयं व्याख्यानं तदप्युक्तम्। एकपुरुषीयप्रसादस्य प्रामा
ण्योक्तौ कैमुतिकन्यायेन बहुपुरुषीयप्रसादस्य प्रामाण्यसिद्ध्या शीलोपन्यासस्य वैयर्थ्यापत्तेः। प्रसादे तत्त्वान्यविषय आ

क्षेपपरिहारेण शास्त्रार्थनिरूपणप्रवणतात्मरूपो मनोधर्मः समाधिः शीलमुच्यते। शीलं समाधाविति धातुपाठात्। स्मृ-
तिशीले इति द्वंद्वेन चोक्तः शीलस्यापेक्षा स्मृतिधर्मे प्रमाणमिति कथ्यते तेन वेदार्थविदामप्युक्तसमाधिशून्यानां स्मृतिर्न
प्रमाणमिति मेधातिथिव्याख्या स्वीकार्येति मैवं यदि स्वस्माभिः स्मृतिकर्तॄणां मन्वादीनां मध्ये केसमाधिशून्याः केचन
इदन्ते इति विवेकः कर्तुं शक्येत तत्र दोक्त समाधिशून्या वेदवित्स्मृत्यनादरप्रसिद्ध्ये फलवानेवायमुपदेशोऽस्मान्प्रतिस्यात्। नच
चिरातीतेषु मन्वादिषु विशेषविवेकः शक्योऽस्माभिरिति वैयर्थ्यापत्तेः। आचारश्चैव साधूनामित्यस्यापि किमिदं रूपसर्वाचारस्य धा-
रणत्वं स्वीकारेणाभिहितः उत स्मृतिवत्प्रत्येकमूलकृतित्स्य न पानायः। विशेषरूपेण च मूलकृतिशून्यतया निर्णीतिस्या-
पि सदाचारस्यानुसरणीयत्वापत्तेः। न द्वितीयः प्रतिदेशं प्रतिकुलमनंतावारेषु स्मृतीनां संभावनाऽयोगात्। आत्मनस्तुष्टिरपि धर्म-
मूलत्वं कारकहेतुत्वेन वा स्यात् ज्ञापकहेतुत्वेन वा। आद्ये पिनकुलदंशेनौषधेर्विषनिर्हरणशक्तिवच्छिद्रात्मनस्तुष्ट्यास्य विषया-
णां श्रेयःसाधनशक्तिजननाद्धर्मत्वप्रतिकारकत्वं स्यात्। यद्वा सिद्धश्रेयःसाधनशक्तिके धर्मेऽधिकासंपादनेन साक्षाद्भवते

मा दा॰ नवाकारकत्वं स्यात्। सर्वथापि वेदार्थस्य ज्ञापकहेतुत्वं तावद्वेदो धर्ममूलशब्दस्यानन्वयापत्तिः। अथ संदिग्धार्थनिराश्रिय
१६८ कत्वेन ज्ञापकहेतुत्वमेवास्तु। तथा च श्रुतिः यद्वै किंचनानूचानोऽभ्यूहत्यार्षं तद्भवतीति कविवचश्च सतां हि संदेह
पदेषु वस्तुषु प्रमाणमंतःकरणप्रवृत्तयइति। मेवंचात्मतुष्टेरनियतविषयत्वेन धर्माधर्मयोरव्यवस्थापत्तेः। अ
168 थ वैकल्पिकानां मध्ये यत्रात्मतुष्टिस्तस्यैव श्रेयःसाधनत्वनिर्णयं कुर्वतीमवतु धर्ममूलं। तथा च स्वस्य च प्रियमात्म
न इति याज्ञवल्क्यस्मृतेरनत्समानार्थाया व्याख्यानं कृतं विज्ञानेश्वरेणानुष्ठितं चेहापि मेधातिथिना। आह च गदाधव्या
सः। वैकल्पिके आत्मनस्तुष्टिः प्रमाणमिति। तच्च नावैकल्पिकानामन्यतरस्यात्मतुष्ट्यैव धार्यत्वाद्यालोकदृष्टत्वेनोप
न्यासवैयर्थ्यात्। दृष्टो ह्यर्थिनस्तत्तदाराणामणीनामन्यतरे स्वतुष्ट्यैव प्रवृत्तिनियमः। एतेन श्रुतिः स्मृतिः सदाचारः स्व
स्य च प्रियमात्मनः सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतमिति याज्ञवल्क्यस्मृतेर्थस्मावमरेयदपरार्केणोक्तं। प्रि
यं मनस्तुष्टिः यत्कर्मद्रव्यसुध्यादिमनस्तुष्टिपरिच्छिन्नं तया विधीयते यथास्मिन्कर्मण्युपक्रान्ते मनसः स्यादलाघवं तास्मि

त्तावन्न कुर्याद्यावत्तुष्टिकरमेवेदिति तस्य निश्चये मनस्तुष्टिर्मूलं। अनेन साधयामीति मनःकर्मणि संकल्पः तज्जः का
मः धर्मचिकीर्षा सापि धर्मनिश्चये मूलं पदद्वयेनं अत्रोपनमे दृष्टा दधीत श्राद्धं व्रतिः त्वचि श्वेवे सा दाविति तदापि निरस्ता
यपारीसामनस्तुष्टिसंकल्पजकामयो धर्ममूलत्वमिह विवक्षितं ततपारीसो दाहृतशास्त्रिस्वकविधिभिरेव धर्ममूलत्व
याजयोः स्तिःद्वावस्योपदेशस्यैवैयर्थ्यात्। अतः स्मृतिप्रक्रमगतवाक्यानामप्रामाण्येन दृष्टांतेन दृष्टं स्मृतीनामप्रा
माण्यं। अथ यत्किंच मनुरवदत्तद्भेषजमिति श्रुत्यैव मनुस्मृतेः प्रामाण्यकथनात् प्रामाण्यशंकेति चेत्तन्न। सोमारौद्रा
यागप्रकरणपठितस्य मानवी ऋचो धाय्ये कुर्यादित्यस्य विधेः समीपाम्नातस्य यद्वै किंचेत्यस्य स्तुतिपरत्वेन स्वार्थना
स्पर्शाभावात्। वदत्यर्थोच्चारणकर्मणः शब्दस्य दृष्टार्थवक्तृपरत्वादिद्वारा दोषनिवर्तकत्वेन प्रामाण्यस्याप्युपपत्तेश्च
वदत्यग्निमन्त्रणो दिशब्दवन्मनुशब्दस्य श्रुतिसामान्यमात्रत्वेन पुंविशेषपरत्वासिद्धेश्च। एतेन स होवाच व्यासः पाराश
र्यइति श्रुतेरपराशरपुत्रत्वमुपजीव्य व्यासस्मृत्तत्वादचेत्समहिमापराशरइतिमाभवोक्तपरास्तं अतः कथं व्यासव

भा दी० १६९ 169

णीनेति हासांतर्गतस्य पकरोषीत्यादेः प्रामाण्यमतत्त्राहुस्त्रस्ता श्चेति। चोपपद्यपीस्त्वर्यो पौरुषेयत्वाम्नायगमार्थः। यद्यप्य
स्याः पौरुषेयत्वं तथाप्यष्टकादिस्मृतिवत्संभवत्स्येव प्रामाण्यमिति दृष्टान्तमात्रेण स्मृतिप्रामाण्यं व्यवस्थाप्यते। नता
वेदैदेव धर्ममूलमिति वृद्धानां धर्मत्वेन स्मरणं तादृशानां पारंपर्येण तथा स्वीकरणं चाष्टकादिषु वेदमूलत्वं विना
संभवति। उक्तं न नित्यानुमेयवेदमूलत्वाद्भवेः। पिशाका तएवं नानाथा तो विप्रकीर्णप्रस्पष्टवेदवचोमूलत्वं नि
रूपयितुं। स्मृतिमूलविज्ञानात्मककार्यलिंगकात्कारणसामान्यानुमानाल्लाघवतत्क हेतुकपरिशेषसहकृतात्सिद्ध
स्य मूलभूतता दृशावदस्यानुपलंभेन निरासायोगात्। न हि भ्रमविप्रलंभौ शक्यानुमानौ चिरमनेकपुरुषभ्रमा
नुवृत्तिकल्पनायां गौरवातिशयात्। न च प्रत्यक्षश्रुतिविरोधोऽन्यायमूलता वा। अष्टकादिस्मृतिषु तस्मिन् येनोक्तानुमान
बाधोऽर्थान्तरतावा सम्भावितास्यात्। उक्तं न श्रुतिमूलकत्वे विप्रकृते स्तुत्सादस्य च कल्पनायां गौरवात्। नित्यानुमेय
श्रुतिमूलत्वेपि तत्र तत्स्तु रूपीयश्रुत्यनुमानलिंगभूतानां श्रुतिकल्पनागौरवात्परिदिपरं स्मृतिकर्त्रा[illegible]तेवेनतेषामु राम० १६९

त्संनाः पाठप्रयोगादनुमीयं तद्वत्सकेष्वतिव्याप्तोञ्ञा च हरद्वत्तेन स्मृतीनामुक्तेन वेदमूलत्वं स्वीक्रियते तथा निरुक्तं म
न्त्रार्थवादानुमेयश्रुतिमूलकानां कासांचित्स्मृत्यादिस्मृतीनां दर्शनादाकरेऽपि कल्पसूत्राधिकरणोस्मृतीनामौत्सर्गिकत
यामूलस्मृतिमूलकत्वनिरूपणाच्चार्थदृष्टानि सानुमेयश्रुतिमूलकत्वमंगीक्रीयते। स्वीक्रीयतामनियमेन तत्रान त्वीह
श्रुतिमूलत्वमेवेति नियमः शक्यनिर्वचनः प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथेत्यादीनां प्रत्यक्षश्रुतिमूलाना
मपि स्मृतीनां भूयसीनामुपलंभात् [illegible] अत एवमप्यापमूलकत्वे
न निर्णीतस्मृतिदृष्टांतेन स्मृतित्वाद्वेदमूलत्वानुमानं निरस्तं। यत्तु वेदोऽखिलइत्यादेर्नवेदमूलत्वमिति। तत्र पुराणन्या
यमीमांसेत्यादिवदस्यापि वचनस्यैतावत्स्वेव धर्ममूलानीति नियमपरत्वात्। नियमस्य चालौकिकत्वेन वेदमूलत्वावश्यं
भावात्। न चैतद्बाधकार्थस्यन्यायतः सिद्धो नियमपरत्वमस्यास्तु दुर्निरूपत्वं न्यायेनेति वाच्यं। तथाहि धर्ममूलत्वाद्वेदस्मृत्या
वदिहस्ताक्षात्सारूप्येणवाधर्मप्रतिकारके हेतुमेव चदति। पारूप्येणचतत्वं संभवति ज्ञापकाज्ञापकयोः। न च ज्ञापक

मा.टी. स्यंदियादेरिव कथं कारकत्वमिति शंक्या। अथवा यागादेरिव ज्ञापकानामपि केषांचिद्धर्मं प्रति नियमविधिना तादर्थ्या
१७० वगमात्। तावमाच प्रकृतहेतुना निर्वाहात्। एवं नाखिलवेदस्य धर्ममूलत्वासंभवः। धर्मबोधपत्नामपि श्येनादिवा
क्यानां निषेधानां च पापायणवह्नयज्ञादिनिर्वर्त्तनद्वारा धर्मं प्रति कारकत्वात्। प्रायश्चित्तविध्यपेक्षितनिमित्तसमर्पक
170 त्वेन विद्धद्वाक्यवत्स्वरूपस्याधर्मप्रमोपयोगाच्च। असंभवति च नानाशाखाविप्रकीर्णमूलकस्मृतिविदामपि मन्वादीनां ता
दृशाक्षरस्येव गणाशक्तत्वेन निर्णीतप्रकृष्टेष्वनुकंपया स्मृतिप्रणयनप्रवृत्तिः। तात्विकश्रेयःसाधनत्वबोधिकायाश्च
पि वाल्यस्मृतेस्तादृशबोधद्वारा धर्मं प्रत्यकारकत्वाद्धर्मात एवोक्तविधधर्ममूलत्वाभावोऽपि बोधयितुं धर्ममूलताद्वस्य ज्ञा
पकात्तापकसाधारणाकारकहेतुपरत्वादेव चरमाद्धैपप्रहाणात्मनो ब्रह्मत्रापनायात्मनो वा शीलस्य निर्वर्त्तकतया धर्ममू
लत्वमिति व्याख्यासंभवः। न च मनोजयविधायिवचसा पौनरुक्त्यं तेन रागद्वेषप्रहाणस्य सर्वधर्ममूलताया अप्रसिद्धेन च राम
वेदविदां बहूनां चित्तप्रसादः शीलमिति व्याख्यायां केषुचित्कन्यायेन शीलोपन्यासे वैयर्थ्यादिहात्मपदात्तत्स्य च प्रियमा १७०

स्मन इत्सत्र त्वपदार्थैकपुरुषप्रसादस्पस्य धित्तप्रसादत्वेनैव प्रामाण्यावगतौ पुरुषांतरीयप्रसादस्य प्रामाण्यमि
ऽः। नापि शीलं समाधिरिति मेधातिथिव्याख्यायां तदापत्तेः। इदानींतनवेदार्थविदां मध्ये प्रोक्तविधसमाधियु
क्तत्वस्मृतिः प्रमाणमन्यस्मृतित्वप्रमाणमिति विवेकप्रयोजनत्वात्। न चाचारश्चैव साधूनामित्येवंरूपापाए
वस्त्वीचारस्साधारणाश्च तेऽगीकारेणाचारप्रामाण्ये विशेषरूपविषयमूलश्रुतिस्मृत्याचारस्यानुसरणीयत्वापत्तेः। लो
भादिदृष्टमूलत्वनिर्णयाभावेश्च तिमूलत्वाभावनिर्णयासंभवात् लोभादिमूलत्वनिर्णय एवासाधाचारत्वस्यैवाभावात्।
वेदविदां धर्मबुध्याचरणस्यैव साधाचारत्वेन विवक्षितत्वात्। केषुचिदाचारेषु प्रातिस्विकमूलश्रुतिदर्शनासंदंनैवस्व
श्लाघीयते। नन्वेवमनंताचारप्रामाण्यनिर्वाहायानंतश्रुतिकल्पनापत्तिरिति चेन्न अनंतचरणाध्वार्शाखाम्नातानां
मंत्रार्थवादानुमितानां वा मूलत्वेन स्वीक्रीयमाणानामानंत्यसंभवस्यैवेतिकानुपपत्तिः। न च केषुचिदाचारेषु वि
शेषतो मूलश्रुतिदर्शनेपि सर्वत्र तादृशश्रुतिमूलत्वमेकेस्वधारणासंभवः। आत्मनेष्टेर्न कुलदंपावनश्रेयस्साधन

भा ट्टी.
१७१

शान्तिं प्रति कारकहेतुतया मेधातिथिनोक्तत्वाद्वार्त्तिककारेणाचाराधिकरणेन तस्यात्तद्दृष्टान्तेनाचाराणां च तत्प्रामाण्योपपाद-
नात्स्वं मध्यकं तत्कल्पजः काम इत्यत्र विज्ञानेश्वरेण शास्त्रावबोधितस्यापि शास्त्राविरुद्धस्य भोजनव्यतिरेके राजलंघनयात-
व्यमिति संकल्पजकामस्य धर्ममूलत्वाभिधानाद्विशेषरूपेण श्रेयःसाधनतावबोधकस्याभावे विशिष्टात्मनुष्ठाचा-
रान्यतरविषयत्वेन यत्किंचिदनुष्ठीयते तादृशसंकल्पजकामेन वा श्रेयःसाधनतां नित्यापि प्रहाणिसंभवात्। इदानी-
मपीदृशाकुलधर्मप्रवृत्तफलंभात्। न चात्रस्य धर्ममूलपालस्य कारकहेतुप्रतिपादकत्वासंभवद्रूपयोदितं।
न च शिष्टात्मनुष्ठेः संदिग्धार्थनिर्णायकत्वेऽव्यवस्थापत्तिः। वेदविद्विशिष्टपुंविशेषात्तदनुष्ठेयधर्मविषयत्वनियमसं-
भवात्। अत एवाहुः। यथा रुमायां लवणाकरे वा मेरौ यथा चोज्ज्वलहेममयभूमौ यज्जायते तन्मयमेव तत्स्यात्तथा भवेद्वे-
दविदात्मनुष्ठितिः। न च वैकल्पिकान्यतरावधारणहेतुत्वेनात्मतुष्टिप्रामाण्योपन्यासवैयर्थ्यं पर तुष्ट्याप्यवधार-
णाप्रामाण्ये सात्त्विकात्मतुष्टेरवधारणोपायत्वनियमसंभवात्। नापि श्रुतिः स्मृतिरित्यादेरपरार्कव्याख्यायामनुपदेशा

राम
१७१

वेद्यमर्थ्यं। सिद्धधर्मस्य मूलत्वानामपि पूर्वं स्मार्त्तस्य दुर्बलमिति वलावलत्वापत्तावपन्यासः संभवात्। अत इति स्मृत्या सोक्तविरोधे
स्मृत्यसापेक्षत्वाभ्यामेव वलावलं दृष्टं स्मृतिसदाचारयोः विरोधे स्मृतिनिबन्धनत्वानिबन्धनत्वाभ्यां विशिष्टत्वस्य पुंगतत्वाभ्यां
वा तुल्यप्रत्युपस्थितेर्मनस्तुष्टिपरिच्छिन्नतया विधावविधौ यदि कश्चित्सदाचारेणात्तदिप्सत्वापरिच्छेदः प्राप्यते तदा तेनैव मनः
संतोषव्यं न तु स्वमनस्तुष्ट्यपेक्षया परिच्छेदः कार्यः। सदाचारसिद्धेऽपन्यायाः श्रुतिमूलत्वस्यानुमानिकत्वात्। श्रुतिवि
रुद्धत्वेन संभावितात्मा अपि मनस्तुष्टेः प्रामाण्यायोगादिति ज्ञापयितुं सदाचारानन्तरं स्वस्य च प्रियमात्मन इत्युक्तम्। स्वस्य
प्रियदेवेनं श्रद्धोपनमेदिति शास्त्रे श्रद्धामूलकमनःसंकल्पजकाम एव तोऽप्य विहितं तु न श्रद्धाधानेयदि न मनस्तुष्टि
तदा नियतेव संतापतो हन्तिकादिनक्षत्रे चाधानं कार्यं न तु कालान्तरे सकृद्धर्मांगत्वेन मनस्तुष्टिविधिपरत्वेनापि मेधा
तिथिनाऽत्मनस्तुष्टिरेव चेति वो व्याख्यानात् मनस्तुष्टिमन्तरेणाकर्मचेष्टा ण्यादितिज्ञापयितुं स्वस्य च प्रियमात्मन इत्यस
न्तरं सम्यक्संकल्पजः इत्यस्य कं। एवं चतुर्विधकर्मवाक्यप्रामाण्ये निरुक्ते पूर्वोक्तविधयोपपन्नं स्यात्। तथा प्रामाण्यमपेक्ष्य सं
भवत्येव यद्वेदे किंचेतिस्पष्टो वाचेति च लिंगां। वदन्तेः शाब्दकर्मकत्वं च दर्शकर्मकत्वस्यापि वहुलमुपलब्धेः। रूच्याप्रासिद्धा

भा॰ टी॰ १७२

र्थघ्नति पदकत्वेन मन्वादिस्मृत्योपपन्नावघ्नाप्तिरुद्योगाश्रयणोनार्थान्तरकल्पनानुपपत्तेश्चाघ्नति सर्गसमाननाम्नां पू
साजन्माश्रयतोनाप्याकरेवेदनित्यत्वेनोयथादनाद्या एवं चयदाप्नुण्यविशेषलब्धज्ञानातिशयमन्वादिवचः प्रामा
ण्यं सिद्धं तदा वादरायणोक्तन्यायानुगृहीतश्रुत्याद्यनेकमानसिद्धस्वाभाविकसार्वज्ञस्य चतुर्वेदनिःश्वसितस्य भद
पादोः स्मृतिपादे सर्वलोकप्रमाणत्वेन कीर्तितस्य श्रीवासुदेवस्य वचसि पक्षरोधस्यादावितिहासांतर्गते पिकाप्रामा
णपकथेसाशयेनाहेत्यन्यत्रविस्तरइति॥ दध्नोनन्विहमंथनेन सकलं नेयं दिने किं त्वयाद्यैयमेनवनीतमंबगिरामिस्याव
र्णियं स्याहरेः॥ गोप्यासंघरिंजं सरिस्य थकरैर्नैजे गर्विता सादरं दृष्ट्वा सप्रहंसं सदा वसंतुमांसि तेनयशोदाशिशुः॥१॥ ॥इ
इति श्रीमच्छालितगुरासीम निःसीम निखिलविद्याविद्योतमान श्रीमहापदेव सूरिवरसूनोरनंतदेवस्य कृतौ न्यायप्र
काशटीकायां मांहालंकारागमायां द्वितीयः परिच्छेदः॥ समाप्तोयं ग्रंथः॥ ॥शुभं भवतु ॥ संवत् १८५६ श्राव
णमासे कृष्णपक्षे एकादस्यां भौमवासरे ॥

राम॰ १७२